संस्कृत भाषा

कक्षा
९ २ १०



संस्कृतभाषा

(संस्कृतमाध्यमिक विद्यालयानां कृते)

कक्षा ९ र १० (संयुक्त)

प्रकाशक
जनक शिक्षा सामग्री केन्द्र लिमिटेड
सानो ठिमी, भक्तपुर

सर्वाधिकार जनक शिक्षा सामग्री केन्द्र लि. मा सुरक्षित

पाठ्यक्रम (२०३८) अनुसार
प्रथम संस्करण २०३९, चैत्र
दोस्रो संस्करण २०५२

तपाईंले किनेको पुस्तकमा छपाइ प्रविधि सम्बन्धी कुनै त्रुटि फेला परेमा अधिकृत वितरक (साझा) अथवा स्थानीय बिक्रेताबाट उक्त पुस्तक साट्न सक्नु हुनेछ ।

ज. शि. सा. के. लि.

मूल्य

जनक शिक्षा सामग्री केन्द्र लिमिटेड (एजुकेशन प्रेस) मा मुद्रित ।



"राष्ट्रिय प्रतिभालाई फुलाउने फलाउने
तथा जनताको मनोभावनालाई
विकासमूलक बनाउने नीति लिई लागू
गरिएको यस राष्ट्रिय शिक्षा
योजनाबाट केही वर्षभित्रै एउटा
जागरूक, परिश्रमी र उन्नतिशील
समाजको सिर्जना हुन सक्नेछ भन्ने
मैले आशा लिएको छु।"

श्री ५ वीरेन्द्र

हाम्रो भनाइ

शिक्षालाई जीवन सापेक्ष गराई राष्ट्रिय एकता, सार्वभौमिकता, राजमुकुट र स्वतन्त्रताको रक्षा गर्ने, कर्तव्यनिष्ठ नागरिक तयार गराउने र सामाजिक जीवन यापनका लागि आवश्यक ज्ञान र सीप हासिल गराउने राष्ट्रिय शिक्षा पद्धतिको योजना २०२८ को विशुद्ध उद्देश्य अनुरूप विद्यालयस्तरका पाठ्यक्रम र पाठ्यपुस्तकहरूको विकास गर्ने प्रक्रिया चालू रहिआएको छ ।

श्रमप्रति श्रद्धा जगाई उपयोगी नागरिक तयार गराउने र देशभक्ति, राजभक्ति, तथा ईश्वर-भक्ति सिकाई अनुशासित सुयोग्य नागरिक तयार गराउने माध्यमिक शिक्षाको उद्देश्यमा आधारित संशोधित पाठ्यक्रम २०३८ अनुसार यो पाठ्यपुस्तक तयार गराई प्रकाशमा ल्याइएको छ ।

यस पाठ्यपुस्तकका परिमार्जनकर्ता श्री चेतोनाथ शर्मा आचार्य हुनुहुन्छ ।

सम्बन्धित विषयका अनुभवी शिक्षक, प्राध्यापक एवं विशेषज्ञहरूको सुझाव समेतलाई ध्यानमा राखी यस पाठ्यपुस्तकलाई सकेसम्म स्तरयुक्त बनाउने प्रयास गरिएको छ तापनि यसमा भाषागत, विषयगत र शैलीगत कतिपय त्रुटिहरू अझ हट्न नसकेका होलान् । तिनका सुधारका लागि शिक्षक, अभिभावक, विद्यार्थी लगायत सबै बुद्धीजीवी पाठकहरूको सक्रिय सहयोगको महत्त्वपूर्ण भूमिका रहने हुँदा यस पवित्र सेवा कार्यमा यहाँहरूको रचनात्मक सुझावको यो केन्द्र सदैव स्वागत गर्दछ ।

श्री ५ को सरकार
शिक्षा, संस्कृति तथा समाज कल्याण मन्त्रालय
पाठ्यक्रम पाठ्यपुस्तक तथा निरीक्षण विकास केन्द्र
सानो ठिमी, भक्तपुर ।

विषयसूची

१.	सदाचारः	१
२.	पत्रम् (स्वदेशदर्शनम्)	४
३.	जाति धर्मो हि दुस्त्यजः	७
४.	समयः मनुष्यजीवनञ्च	१०
५.	भ्रातृभगिन्यो संवादः	१२
६.	समाजो व्यक्तिश्च	१५
७.	गङ्गाया अवतरणम्	१८
८.	पत्रम् (गार्हस्थ्यम्)	२२
९.	पत्रम् (विदेशज्ञानम्)	२४
१०.	गाङ्गेयो भीष्मः	२६
११.	नेपालस्य नद्यः	२९
१२.	समुद्रदर्शनम्	३२
१३.	मानबहादुरः	३५
१४.	अतिथिसत्कारफलम्	३७
१५.	बौद्धधर्मो दर्शनञ्च	४०
१६.	विज्ञानं वैज्ञानिका आविष्काराश्च	४३
१७.	जीमूतवाहनः	४६
१८.	पुराण–समीक्षा	५०
१९.	कुमारसम्भवम् (प्रथमपञ्चमसर्गाभ्याम)	५४

सदाचारः

सकलजीवनेषु मनुष्यजीवनं श्रेष्ठम् । तस्य श्रेष्ठत्वं सदाचारे प्रतिष्ठितम् । व्यक्तेः, समाजस्य, राष्ट्रस्य च अभ्युत्थानं सदाचारादेव जायते । यस्मिन् देशे, यत्र च समाजे सदाचारनिष्ठा नास्ति तत्र कदाचाराणां प्राबल्यं स्वाभाविकम् । सदाचारकदाचारौ परस्परविरोधिनौ । तथा च यत्र सदाचारः समनुष्ठीयते तत्र पारस्परिकविश्वासः, सौमनस्यं, सुखं शान्तिश्च परिणामा संजायन्ते ।

यत्र कदाचारस्य प्रभावो विद्यते तत्र तद्विपरीतं अविश्वासः,दैन्यं,कलहः, अशान्तयश्च समुद्भवन्ति । सदाचारकदाचारयो रीदृशं सुफलं दुष्फलञ्च विचिन्त्य आत्मनः समाजस्य चाभ्युन्नतिमिच्छद्भिसदाचारस्यानुसरणं दुराचारस्य परित्यागश्च कर्तव्यः ।

इदानीन्तन समाजे व्यक्तौ वा सदाचारस्य प्रभावः क्षीणप्रायः। अत एव स्वार्थसाधने संलग्ना जना यत्स्वानुकूलं तदेवयुक्तं मन्यन्ते । परार्थं परहितं वा ते काकिणीमात्र मपि न गणयन्ति । ये भृशमर्थं-

लोलुपाः, स्वार्थपराः कामान्धाश्च ते यादृशं तादृशं च कर्तुं यतन्ते । परं यः स्वदेशं नस्निहयति, स्व समाजं नस्मरति, स्वजातिं वा नगणयति तस्य जीवनं वस्तुतोऽजीवनमेव ।

सदाचारशब्दस्यार्थो विद्वद्भिर्विविधरूपेण निरूपितः । तथा च सतांसज्जनानामाचारः अथवा सत्परमात्मप्राप्त्यर्थं समुचित आचारः सदाचारः इति । अनया व्युत्पत्या ज्ञायते रागद्वेषौ परित्यज्य चित्तशोधन पूर्वकमात्मोन्नतये समर्था ये आचारा स्ते सदाचाराः । तथा चोक्तं स्कन्देनागस्त्यं प्रति

विद्वेषरागरहिता अनुतिष्ठन्ति यं मुने ।
विद्वांसस्तं सदाचारं धर्ममूलं विदुर्बुधाः ।।

स्कन्द – काशीखण्ड
३।२५

ये जना ज्ञानादज्ञानाद्वा सदाचारं परित्यज्य दुराचारमाश्रयन्ते ते नकेवलं गर्हणीया भवन्ति अपितु विविधैर्व्याधिभिः पराभूता, दुःखभाजः स्वल्पायुषश्च भवन्ति । कदाचारीणो न केवलं स्वयमेव दुःस्थितिमनुभवन्ति अपितु स्वसम्बन्धिनो जनानपि भयं दुरवस्थां चानुभावयन्ति ।

अस्तु शरीरं यादृशं तादृशं वा, वसतु यस्मिन् कस्मिन् वा स्थाने, जातो भवतु यस्य कस्यापि वा कुले तथापि सदाचाररतो जनः श्रद्धास्पदं पात्रं गण्यते, मान्यते सर्वैः, शतं (बहु) वर्षाणि च निरापदं जीवति ।

तथाचोक्तं मनुना

सर्वलक्षणहीनोऽपि यः सदाचारवान् भवेत् ।
श्रद्धधानोऽनसूयश्च शतं वर्षाणि जीवति ।।

ये यावज्जीवनं सदाचारं परिपालयन्ति ते इहलोके विमलां कीर्तिं परलोके शुभां गतिं च प्राप्नुवन्ति ।

धर्मार्थकाममोक्षाणां मूलमारोग्यं, आरोग्यमूलञ्च सदाचारः । यस्य शरीरं रोगरहितं, हृदयं च पवित्रं स एव सर्वमपि सुकार्यं कर्तुं शक्नोति । रघुकुलस्य कुलगुरो र्वशिष्ठस्य कथन मस्ति ये सततं स्वाध्यायमधीयाना अपि सदाचारं न परिपालयन्ति पक्षिशावकाः पक्षतीनां समुद्भवे नीडमिव तान् शास्त्राणि परित्यजन्ति (नोपकुर्वन्ति) ।

अत्र इदमपि विचारणीयं विद्यते यत् सदाचारः सर्वैः समानरूपेण परिपालनीय इत्यत्र न कोऽपि शङ्कालेशः । तथापि स्वभावभेदेन, स्थानभेदेन, वर्णभेदेन च तत्स्वरूपे काचिद् भिन्नताऽपि

वर्तते । तथा च चेतसि शमनशीलता, विषयेषु इन्द्रियाणां नियन्त्रणम्, तपोमयं जीवनं, बाह्यमान्तरिकं च शौचम्, सहनशीलताया अनुसरणम्, व्यवहारेषु ऋजुता (सरलता), शास्त्रीयज्ञाने अनुप्रवेशः, अनुभवे दृढता, आस्तिक्ययुक्तः स्वभावो ब्राह्मणानां स्वाभाविकाः सदाचाराः ।

संग्रामे शौर्यप्रदर्शनम्, स्वभावे धृष्टता, मानसिकं धैर्यधारणम्, कार्यक्षेत्रे कौशलप्रदर्शनम्, युद्धक्षेत्रेऽपराङ्मुखता, ईश्वरभावः (नियमनशक्तेः स्वीकरणम्) च क्षत्रियाणां स्वाभाविकाः सदाचाराः ।

तथैवाध्ययनं, कृषिकर्मणि संलग्नता, पशूनां परिपालनं, वाणिज्य मावश्यकवस्तूनां समुचित (विनिमयः) दानञ्च वैश्यानां समुचिताः सदाचाराः ।

एवं द्विजातिशुश्रूषणं, कृषिकरणम्, पशुपालनम्, शिल्पकर्मकरणं, कुशीलव (गायन, नृत्य, वाद्यवादनादि) कर्मकरणञ्च शूद्राणां स्वाभाविकाः सदाचाराः । सर्वप्राणिनामहिंसनम्, सत्यभाषणम्, अस्तेयम् (अचौर्यम्) शौचम् (पवित्रता) इन्द्रियनिग्रहश्च सर्वेषां समानाः सदाचाराः ।

वस्तुतो यैः कर्मभि र्व्यवहारैं र्वा व्यक्तौ समाजे च स्नेहो, मैत्री, दया, सुखं च समुत्पद्यन्ते, तिष्ठन्ति च ते सदाचारा स्तद्विपरीताः कदाचारा इति ।

अभ्यासः

प्रश्नाः

(१) मनुष्यजीवनस्य श्रेष्ठत्वं कुत्र प्रतिष्ठितम् ?
(२) सदाचारस्य परिणामाः के ?
(३) कदाचारफलानि कानि ?
(४) आधुनिकसमाजे सदाचारप्रभावः कीदृशः ?
(५) केषां जीवन मजीवनम् ?
(६) सदाचार शब्दस्य कोऽर्थः ?
(७) सदाचारफलानि कानि वर्णितानि ?
(८) किं सदाचारस्य स्वरूपभेदोऽप्यस्ति ? अस्ति चेत् कीदृशः ?
(९) के समानाः सदाचाराः ?

पत्रम्

(स्वदेशदर्शनम्)

प्रियमित्र रमेश,

मधुरं स्मरणम् ।

त्रिवेणीक्षेत्रात्

२३–११–२०३९ मितवै

तव शुभकामनयाऽहं कुशली । आशासे त्वमपि कुशलीस्याः ।

अह मिदानीं परासीमण्डलस्य त्रिवेणीप्रदेशेऽस्मि । राजकीयनियमानुसारेण मम पितुः सेवास्थानपरिवर्तनं जातम् । अहमपि अवकाशसमये भ्रमितुमागतो ऽस्मि । अस्मद् गृहन्तु गोरक्षमण्डले



वर्तत इति तु त्वं जानास्येव । पञ्चषेभ्यो दिनेभ्योऽहमत्रा गतोऽस्मि । आगमनवेलायां देवघट्ट प्रदेशान्नावासमागतः । मयैतादृशी नौमात्रा जीवने प्रथमवारमनुभूता। समतल प्रदेशे सर्पाकारैः प्रवाहैः प्रवाहितायां नारायण्यां तरिणीविहारोऽतीव रमणीयः । भगवतो गण्डस्थला त्रिसुतायाः

कृष्णाया यदा त्रिशूल गण्डक्यासह मेलनं भवति तदुत्तर मस्या नारायणीति नाम परिवर्तनं भवति। सैव नारायणी स्वल्पोदकाभ्यां पञ्चखोला तमांसा नदीभ्यांसह मिलितेऽस्मिन्स्थाने त्रिवेणीनाम्ना प्रसिद्धा।

प्रतिवर्षं माघ कृष्णामावास्यायामत्र मेला लगति। गतायां माघ कृष्णामावास्यायामप्यत्र मेलाऽऽसीत्। मेलायां पञ्चलक्षतोऽप्यधिका जनाः संघटिता आसन्। लक्षतोऽप्यधिका जना नौभिः पारावारे कुर्वन्तोऽदृश्यन्त। यात्रिषु पितॄनुद्दिश्य मुण्डनपूर्वकं श्राद्धकर्तारोप्यासन्। नेपाले सम्पद्यमानासु मेलासु अत्रस्था मेला सर्वाभ्यो विशाला। यत्र स्वदेशीयानां विदेशीयानां च जनानां समानरूपेण संघटनं द्रष्टुं शक्यते।

अन्यस्मिन् विषयेऽप्यहं किञ्चिल्लिखन्नास्मि। आशासे अनेन प्रिय मित्रस्य सपरिचयं मनोरञ्जनं भविष्यति। त्रिवेण्याः समीपे वाल्मीकेराश्रमो वर्तते। अयमाश्रमश्चतुर्दशशताब्द्याः पूर्वं स्वमहिम्ना प्रसिद्धः। चतुर्दशशताब्द्यां बङ्गाधिपस्य यवनसेनापतेः समशुद्दीनस्याक्रमणेनैषो ध्वस्तः। गण्डक्या योजनाया अवसरे अयमाश्रमोऽपि जनानां दृष्टिपथे आगतः। अयमाश्रमः कस्यापि वसति रासीदित्यस्मिन् सम्बन्धे बहूनि प्रमाणानि सान्ति। अत्र दशद्वादशसंख्यका मूर्तयो विद्यन्ते। या आश्रमस्येतस्ततः प्रसृता आसन्। कतिपयास्तु नष्टाः, अवशिष्टा एकस्मिन् गृहे सुरक्षिताः सन्ति। मूर्तयो लिच्छविकालिकमूर्तिभिः सह साम्यमवधारयन्ति। ता दर्शने सुन्दराः परिष्कृताश्च।

अस्मिन् स्थले प्राप्ताभिरिष्टकाभिः प्रयुक्तै र्वास्तुकलाप्रयोगैरनुमातुं शक्यते यत् प्राचीन समयेऽयं कस्यापि मुनिवरस्याऽऽश्रम इति। चतुष्कोणाकारैः पाषाणखण्डै र्निर्मितो गभीर कूपः, चतुर्भिस्तम्भैर्निर्मिताऽग्निशाला चाऽऽश्रमस्य प्रमाणं प्रकटयतः। वाल्मीकेराश्रम स्तमसायास्तीरे वर्तते इत्युल्लिखितं प्राप्यते। त्रिवेण्या नाम यदि तदा तमसा स्यात्तर्हि निश्चयप्रचमयं वाल्मीकेराश्रमः।

अस्तु, अन्वेषकाः पश्चादस्य याथातथ्यं निर्धारयेयुः। मया यद् दृष्टं श्रुतं च तन्मित्रस्य परिचयाय प्रस्तुतम्। समायान्तरे संयोगो भविष्यति, अधुना लेखन्या विश्रामः।

सहृदयः उमेशः

अभ्यासः

प्रश्नाः

(१) उमेशो देवघट्टात् केन पथा त्रिवेणी मगच्छत्?
(२) कयो र्मेलने सति नारायणीति नामधेयं भवति?

(३) त्रिवेणी कस्मिन् मण्डलेऽवस्थिता ?

(४) प्रतिवर्षं त्रिवेण्यां कदा मेला भवति ?

(५) अन्य मेलाभ्य स्त्रिवेणीमेलाया: को विशेष: ?

(६) वाल्मीकेराश्रम: कुत्रावस्थित: ?

(७) वाल्मीकेराश्रमे प्राप्ता मूर्तय: कीदृशा: ?

(८) किं त्वया काऽपि यात्राऽनुभूता ?

(९) स्वानुभूतां कामपि यात्रामाश्रित्य स्वमित्रं पत्रमेकं लिख ।

जातिधर्मो हि दुस्त्यजः

कस्मिंश्चिद् वने व्याधैः स्थापिते पञ्जरे कोऽपि सिंहः पतितः । पतनान्तरं पञ्जरान्निर्गन्तुं तेन महान् प्रयत्नः कृतः । तथापि दृढत्वात् सः पञ्जरः स्वस्थानात् तृणमात्रमपि नाचलत् । विहितेऽपि प्रयत्ने स सिंह स्तस्य द्वार मुद्घाटयितुमक्षमः । एवं पञ्जरबद्धत्वाद्विपन्नः सिंहः कस्याऽपि दयालोः पथिकस्य मार्गं विलोकयन्नवस्थितः ।



समयान्तरे निकटवर्तिना मार्गेणाऽऽगच्छन् कोऽपि पथिको ब्राह्मण स्तेन दृष्टः । तं दृष्ट्वा दीनमनाः स प्रणम्य तमुवाच ।

ब्रा– भो दयालो ब्राह्मण, सर्वस्य परोपकारी भवान् । भूतदया च भवतो धर्म इति मया बहुवारं श्रुतम् । पश्यतु, ममेदृशी दशा । कारागारे पतितोऽहं नृशंसैर्व्याधैः । मोचय मामस्मात्पञ्जरात् । महत्पुण्यं प्राप्स्यति भवाननेन परोपकाररकर्मणा ।

ब्रा– व्याघ्रस्य दीन वचनं श्रुत्वा मनसि व्यचारयत् । जना वदन्ति व्याघ्रः प्रकृत्या क्रूर इति । क्रूरस्य तु कारागार निवास एव योग्यो न स्वातन्त्र्यम् अकथयञ्च प्रत्यक्षम् ? यद्यहं

त्वां मोचयिष्यामि तदा सपद्येव व्यापादयिष्यसि गवादीन् । न 'केवल गवादीन, किन्तु मुक्तमात्रो मामपि व्यापादयिष्यसि घातशीलस्त्वम् । तथा च मारात्मके त्वयि विश्वासः कर्तव्यो दया वा दर्शयितव्या ।

व्या– अयि पुण्यदर्शन ब्रह्मन्, कथं नाहं विश्वासपात्रम् ? यतः पश्चात्तापेन दग्धं मे पूर्वदुश्चरितम् । तत्र यत्किमप्यवशिष्टं तदपि नष्टं भवतो दर्शनेन । यदि भवानस्माद् बन्धनान्मोचयिष्यति तदा भवतःशिष्यत्व माचरिष्यामि, तपस्तप्त्वा भगवत्प्राप्तिं च साधयिष्यामि ।

ब्रा– साधारण दृष्ट्या तु पश्चात्तापेन तव पापाचरणं दग्धमिव दृश्यते । अन्यथा कुत एतादृशस्य धर्मज्ञानस्यसम्भवः । अतस्त्वां मोचयिष्यामहम् । इत ऊर्ध्वं धर्मं चर । प्रतिज्ञाभङ्गं माकुरु । इत्युक्त्वा ब्राह्मणेनोद्घाटितं पञ्जरस्य द्वारम् । तत्क्षणमेवोत्प्लुत्य बहिरागतो व्याघ्रः । चिरमुपोषितः स पशुभक्षणार्थं मितस्ततोऽवलोकयत् । ब्राह्मणं विहाय तस्याग्रे नान्यत्किञ्चन भक्ष्यमासीत् ।

अतः सहसैव गृहीत स्तेन स ब्राह्मणः करालनखै र्हस्तैः । तेन भीत भीतः सोऽवदत् ।

ब्रा– रे नृशंस कृतघ्न पशो ! किमधुनैव स्वप्रतिज्ञां विहाय मामेवोपकारिणं व्यापादयितु मिच्छसि ? क्वगतं तव धर्मज्ञानं प्रतिज्ञा च ?

व्या– रे मूढ ब्राह्मण ! का कथाऽधुना धर्मस्य । चिरकालमनशानात् क्षुधितोऽहम् । जातिधर्ममेव जानाम्यस्मिन्क्षणे न किमप्यन्यत् ।

ब्रा– हा कष्टम् ! इत्युक्त्वा मनसाऽचिन्तयत् व्यर्थघातशीलेऽस्मिन् पशौ विश्वासः कृतो मया कृतघ्नतमोऽयं व्याघ्रः । किं कुर्यामधुना इति ।

व्या– रे मूर्ख, व्यसनगतः प्राणी यां कामपि प्रतिज्ञां कुर्यात्, यत्किमपि वचनं वा ब्रूयात् परं सङ्कटान्निर्गमनान्तरं न तस्यसर्वस्य परिपालनमावश्यकम् ।

ब्रा– मया रक्षितस्त्वं मामेव भक्षयसि ? नैतदुचितम् । मेवं कृतघ्नो भव । अन्यायं च मा कुरु ।

व्या– नैषोऽन्यायो ब्राह्मण । सदा सर्वत्रै तादृशी परिपाटि रस्मिन् जगति दृश्यते ।

ब्रा– यथा त्वं, तथैव सर्वोऽपिलोको भवति, न मे तत्र विश्वासः ।

व्या– न विश्वसिसि चेत् कमपि साक्षिणं पृच्छ । तस्य च निर्णय मङ्गीकर्तुं तत्परोऽहम् ।

ब्रा– (परिक्रम्य) को नु एष आच्छति । हन्त ! भोः जम्बूकोऽसौ तमेव तावत् पृच्छामि ।

ज– को नाम वृत्तान्तः पुण्यशील ब्राह्मण ! अपि कुशलं भवतः ।

ब्रा– न कुशलं । मया पञ्जरान्निर्मोचितोऽयं व्याघ्रो मामेव ग्रसितुमुद्यतः । अपि न्याय्य मेतत् ।

ज– (**विचार्य**) अहं मन्दबुद्धिः । नावगच्छामि तव भाषणम् । तत्स्थान मेव गच्छावो येन स्पष्ट मेव पश्यामि सर्वम् ।

बृ– भवतु । आगच्छ । एषोऽत्र पञ्जरः । अयं व्याघ्रः प्रथम मासीत् पञ्जरे । अनेन मार्गेणाहमागच्छं तं चामोचयम् ।

ज– (**साकूतम्**) बाढम् । ज्ञातमेतन्मया । त्वं पञ्जरेऽभवः । व्याघ्र आगच्छ त्वां चामोचयत् ।

व्या– (**सकोपम्**) नैवं रे मूढ । अहमासं पञ्जरे ।

ज– (**सव्याजम्**) अहमासं पञ्जरे– नहि नहि अयुक्तमेतत् ।
क आसीत् पञ्जरे ? सर्वोऽयं सऊकरो जातो मम मनसि । अस्तु नाम पश्यामि पुनश्च । आदितः कथय सर्वम् ।

व्या– (**सनिश्चयम्**) रे जम्बूक हतक, कथयाम्येक वारम् । ज्ञातव्यं त्वया । नो चेद् हन्तव्योऽसि । एषोऽहं व्याघ्रः । अयमसौ पञ्जरः । सोऽयं ब्राह्मणः । अहमासं पञ्जरेऽस्मिन् ।

ज– (**सस्पृहम्**) महाराज, कथमविशस्त्वं तत्र ? स्वल्पोऽयं पञ्जरः ।

व्या– एवं रे जडमते ! यथा पूर्वमेषोऽहं पञ्जरेस्थितः । (**पञ्जरं प्रविश्य दर्शयति**)

ज– (**निमिषार्धादेवजम्बूकः पञ्जरस्य द्वारमधः पातयति**) कथयति च त्व मत्रैव मृत्युमुखं प्रतिक्षस्व रे शठ ! कृतघ्नेस्येदृश एव दण्ड उचितः ।

गच्छ भो ब्राह्मण, स्ववर्त्मना । सुविचार्य जीवनमार्गे प्रचल । मारात्मकस्य वचसि विश्वासं मा कुरु ।

एवंविध बुद्धिचातुर्येण शृगालो ब्राह्मणं रक्षितवान् । शठं प्रति शाठ्यमेव कार्यं न तु सत्यम् ।

अभ्यासः

प्रश्नाः

(१) वने सिंहःकुत्र पतितः ?
(२) पञ्जरपतितः सिंहः किंकुर्वन्नवस्थितः ?
(३) सिंहो ब्राह्मणं किमकथयत् ?
(४) व्याघ्रवचनं श्रुत्वा ब्राह्मणः किं व्यचारयत् ?
(५) पञ्जरमुक्तो व्याघ्रः किमकरोत् ?
(६) नृशंसः किं स्ववचने पालयति ?
(७) जम्बूकः कां युक्तिं प्रयुज्य ब्राह्मणमरक्षत् ?
(८) अस्य पाठस्योद्देश्यं वदत ?

समयो मनुष्यजीवनञ्च

विधात्रा सृष्टेषु वस्तुषु स्वरूपगतं वैविध्यं प्राप्यत । उपयोगदृष्ट्या कानि चिद्वस्तूनिसामान्यानि विद्यन्ते. कानिचित्तु विशेषाणि । तथाविधेषु विशेषवस्तुषु समयोऽपि एकः। समयः कालवाचकः । अत एव कालसमयौ पर्यायौ ।

धीमतां मूर्खाणां च समयः कथं व्यत्येति अस्मिन् सम्बन्धे नीतिविदा कथितमस्ति

काव्यशास्त्रविनोदेन कालो गच्छति धीमताम् ।
व्यसनेन च मूर्खाणां निद्रया कलहेन वा ।। इति ।

क्षण, लव, मुहूर्त्त, होरा, मास, वर्षरूपेण समयः प्रतिक्षणं परिवर्तते । तादृशं परिवर्तनं सर्वे दृश्यते, अनुभूयते च । तथापि तस्य तात्विकं मूल्यं तु कतिपयैरेव परिगणितं भवति । समयो नामैतादृशं वस्तु यद् द्रव्यं दत्त्वा क्रेतुं न प्राप्यते । समयोपयोगेन द्रव्याणि अर्जयितुं, गृहक्षेत्रादि वस्तून्युपार्जयितुं, विद्यामध्येतुमन्यविध पुण्यकर्माणि कर्तुं च वयं शक्नुमः । परं पूर्वोक्तैः समस्तैरपि वस्तुभिः क्षणमात्रमपि समयं क्रेतु मर्जयितुं न्यासरूपेण ग्रहीतुं वा कैरपि न पार्यते । कर्मकराः समयेन कार्यं कुर्वन्ति । विद्यार्थिनः समयै विद्यामर्जयन्ति । कृषकाः समये बीजानि वपन्ति । उप्तेभ्यो बीजेभ्यः समुचितानि फलानि लभन्ते । ये जना आलस्यात् समयोचितं कार्यं न कुर्वन्ति तान् समयो न प्रतीक्षते । यो गतिशीलं समयमनुसरति स एव जागरूकः ।

दृश्यतां तावत् अस्तु विद्यानाशः, भवताद् धनहानिः, म्रियतां पितरः, भिन्ना भवन्तु परिवाराः तथापि मानवो जीवितुं शक्नोति । समाप्ते समये तु सर्वाण्यपि वस्तूनि विद्यन्तो परमायुषोऽ भावान्मनुष्यः क्षणमात्रमपि अवस्थातुं न शक्नोति । अनेनैवानुमातुं शक्यते समयस्य महत्त्वम् ।

यथा समयः सर्वाण्यपि वस्तून्यतिशेते तथैव मनुष्य जीवन मपि सर्वजीवनानि । संसारे प्राप्यन्ते बहुविधा जीवाः । तेषु कतिपया मानवापेक्षया स्थूलाः, शारीरिक दृष्ट्या च बलवत्तराः । परन्तु ते सर्वे सर्वथा प्रकृतिप्रेरिताः, मूढाः, अविवेकिन श्चामनुष्यस्तु स्वतन्त्राः, विवेकिनः बुद्धिमन्त श्च । परं तेषां बुद्धिमत्त्वं, विवेकित्त्वं च तदैव सार्थकं यदा समुचितरूपेण समयं सदुप कुर्युः मानवोचितं शील मर्जयेयुः, लाभं च प्राप्नुयुः । मानव शरीरोचित लाभस्तु न केवलं वित्तोपार्जन, कामोपभोगो लौकिक प्रशंसा प्राप्ति र्वा । चातुर्यमूलं जीवन मेव वास्तवं जीवनम् । चातुर्य मपि तदेव यदुभय लोकसाधने साधकं भवति । यथा चोक्तं भगवता श्रीकृष्णेन भागवते-

सैषा बुद्धिमतां बुद्धि र्मनीषा च मनीषिणाम्।
यत्सत्य मनृते नेह मर्त्ये नाप्नोति मामृतम् ॥ इति ॥

तथा च बुद्धिमतां बुद्धि र्मनन शीलानां मनीषित्वं च तदैव सार्थकं भवति यदा मनुष्या अनृत शरीरेणामृतं (आत्मानं ईश्वरं वा) प्राप्नुयुः (जानीयुरिति)।

अभ्यासः

प्रश्नाः

(१) द्विविधेषु वस्तुषु समयः सामान्ये विशेषे वा गण्यते ?
(२) धीमतां मूर्खाणां च समये को भेदः ?
(३) किं समयः कुत्रापि क्रेतुं याचितुं वा प्राप्यते ?
(४) कस्याभावान् मनुष्यो जीवितुं न शक्नोति ?
(५) को जागरूकः ?
(६) इतर जीवेभ्यो मनुष्यजीवः कथं भिन्नः ?
(७) मनुष्याणां बुद्धिमत्त्वं कथं सार्थकम् ?

भ्रातृभगिन्योः संवादः

भ्राता– अयि आर्ये श्रान्तोऽस्मि चिरकाल पठनेन । अधुना कञ्चित्कालं विहर्तुमिच्छामि ।

भगिनी– आगच्छ वत्स, तर्हि उद्याने विहरावः, वार्तालापं च कुर्वः ।

भ्राता– साधूक्तं भवत्या । तदेव छायासनाथं स्थलं गच्छावः, यत्र शीतल मनुभूयते ।

भगिनी– आगतं तत् स्थलम् । एतत् स्थलं सान्द्रया छायया व्याप्तम् । वत्स ! पश्य तावद् एतानि सुगन्धीनि जपापुष्पाणि ।

भ्राता– अहो ! विविधा मनोहरा श्चैतेषां वर्णाः । द्वे पुष्पे अहं लुनामि । एकं तुभ्यं दास्यामि अन्यच्च मदर्थं भविष्यति । को नु वर्णो रोचते तुभ्यम् ?

भगिनी– वत्स, मा एवं कुरु । पुष्पाणां मनोहरदर्शनेन सुगन्धेन चाहं प्रीतास्मि । नहि व्यर्थं पुष्पाणा मवचयनं समुचितम् । भगवतः पूजनार्थं मेतानि पुष्पाणि श्वः प्रभाते ग्रहीतव्यानि ।

भ्राता– आर्ये ! बहु रोचते खलु मह्यं मेतदारक्तं जपापुष्पम्, तेनाधुनैव लवितु मिच्छामि ।

भगिनी– अपि नस्मरसि त्वं पितृचरणानां कथनम् । येऽस्मान् प्रायेण प्रतिदिन मुपदिशन्ति ।

भ्राता– किमिति, को नाम तस्यात्र सम्बन्धः ?

भगिनी– सर्वाणि वस्तूनि प्रथम मीश्वराय समर्पय, खाद्यं चेद् दीनेभ्यः किञ्चिद्देहि । अनन्तरं स्वयं सुखेन सेवस्व इति ।

भ्राता– दिष्टया सम्यग्बोधितोऽस्मि भवत्या । स्मृतं मया तातपादानं कथनम् । नाह मेक मपि पुष्प मधुना लुनामि ।

भगिनी– अस्त्वेवम् । न केवलं पुष्पेषु अपितु समस्ता वनस्पतयो यथा निर्दयं न लुनीयु स्तथैवास्माभि र्व्यवहर्तव्यम् ।

भ्राता– तर्हि किं वृक्षाणां कृन्तन मपि भवत्यै नरोचते ?

भगिनी– अथ किम् ? वृक्षाणां महत्त्वन्तु पुष्पेभ्योऽप्यधिकतरम् । यतो विविधानि फलानि-नानाविधानि पुष्पाणि, निर्माणसाधनानि काष्ठानि पचनोपयोगीनि दारुणि च वृक्षेभ्य एव प्राप्यन्ते । अतएवास्माकं शास्त्रकारैरपि वृक्षाणां संवर्धनं संरक्षणं च बहुषु स्थलेषु वर्णितमस्ति ।

भ्राता– किं वृक्षेभ्योऽन्येऽपि लाभाः सन्ति ?

भगिनी– वृक्षेभ्यो लाभा बहुविधाः । जलवर्षणे ते सहयोगिनः । वर्षितं जलं वृक्षाः स्वमूले चिरकालं

रक्षन्ति । वर्षासु बहुवृष्टया जायमानं भूस्खलनं ते निरुन्धन्ति, मृत्तिकाया संरक्षणञ्च कुर्वन्ति । प्रकृत्या सौन्दर्यवर्धका वनस्पतयः । वायवीयं स्वास्थ्यं वृक्षाः सम्पादयन्ति । निरामयोपपादकानि औषधानि वनस्पतिभ्यो निर्मीयन्ते, बहुविधानां वन्यजन्तूनां निवासस्थान मपि जङ्गल मेव । तथा च वृक्षाणां तत्समूहानां वनानां च महात्वं बहुविधक्षेत्रेषु प्रसिद्धम् (सूतम्) ।

भ्राता– एवञ्चेद् वृक्षाः खलु बहूपयोगिनः । अहो ! वृक्षेषु खगानां कलकल, किमर्थं नु ते एतादृशं कुर्वन्ति ।

भगिनी– एष सन्ध्याकालो वर्तते । खगा अस्मिन् समये स्वगृहं निवर्तन्ते । तान् दृष्ट्वा तेषा मपत्यानि सहर्षं कलकलं कुर्वन्ति । तत्रैव तावद् गच्छावः ।

भ्राता– किमानयन्ति ननु खगा गृहम् ? किं तेषां खाद्यं कुत्रापि सुरक्षितम् ?

भगिनी– न सुरक्षितम् । मनुष्या इव ते कृषिकार्यं कर्तुं नशक्नुवन्ति ।

तेन पतितान्नकणान् कीटान् वा तेऽन्विष्य स्वयं भक्षयन्ति गृहञ्चानयन्ति ।

भ्राता– कस्मै प्रयच्छन्ति ते तत् खाद्यम् ?

भगिनी– आत्मनोऽपत्येभ्यः । पश्य अस्यां शाखायां कपोत्या नीडम् ।

भ्राता– अहो रुचिरमेतन्नीडम् । किं करोति एषा कपोती ?

भगिनी– आत्मनोऽपत्येभ्यो धान्यकणान् प्रयच्छति । इयं खलु तेषां माता यथाऽऽवयो रम्बाऽऽवाभ्यां खाद्यं पेयं च यच्छति तथैव करोति इयमपि ।

भ्राता– अहो ! वात्सल्यं कपोत्या स्वेष्वपत्येषु । कथं खगा नीडानि निर्मान्ति ?

भगिनी– नज्ञातं त्वया ? एतन्नीडमेतेषां गृहमेव वर्तते । तृणानां काष्ठखण्डनां च चयनेन ते नीडानि निर्मान्ति । कपोती तत्रैव अण्डानि प्रसूते । अण्डेभ्यः कालान्तरे शावका निस्सरन्ति । एतानि कपोत्या अपत्यानि कदापि मा स्पृश ।

भ्राता– अस्त्वेवम् । पिताऽपि खलु तथैवोपदिशति । विचित्रा ईश्वरसृष्टिः ।

भगिनी– एहि वत्स, अधुना अस्यां शिलायामुपविशावः, एकं नीतिश्लोकं पठावः ।

कस्यचित्किमपिनो हरणीयं मर्मवाक्य मपिनोच्चरणीयम् ।
श्रीपतेः पदयुगं स्मरणीयं लीलया भवजलं तरणीयम् ॥

अभ्यासः

प्रश्नाः

(१) जपापुष्पाणि कीदृशानि ?
(२) सर्वाणि वस्तूनि प्रथमं किं कर्तव्यानि ?
(३) वनस्पतिषु अस्माभिः कथं व्यवहर्तव्यम् ?
(४) वृक्षेभ्याः के के लाभाः सन्ति ?
(५) खगाः कथं नीडानि रचयन्ति ?
(६) पक्षिणां खाद्यं किम् ?

समाजो व्यक्तिश्च

अद्यतनसमये 'समाज' इत्येतत् पदं नितान्तं व्यापकमर्थं निधाय पदसमूहे प्रचलति। यतः सर्व एव मानवीयाः सम्बन्धाः संस्थाश्चेदानीं 'समाज' इत्येतेन नामधेयेन व्यवह्रियन्ते। मानवस्यकृते स्वजीवनं गोपयितुं, स्वभावनावलिं तोषयितुं स्वव्यक्तित्वं संवर्द्धयितुं च समाजस्यापेक्षा जायते। न हि क्षण, लव, मुहूर्त, मासमात्रम्, किन्तु जननमारभ्यो परमपर्यन्तं द्वितीयमालम्बते जनः। यः शिशुर्मातुर्गर्भाज्जायते स पित्रोर्वात्सल्यमयं संरक्षणं, बन्धुबान्धवानां मधुरं स्नेहं, सवयसां च मोदप्रदं सान्निध्यं विना न जीवितुं शक्नोति। यदा च स स्वस्य शिशुतां सम्पूर्णं विद्याध्ययनाय पाठशालां गच्छति तदापि गुरुभिः सखिभिश्च सह तस्य सम्बन्धो जायते। अध्ययनं समाप्य जना यदाऽर्थोपार्जनाय प्रवर्तन्ते तदापि तेऽन्येषां साहाय्यमपेक्षन्ते। एवञ्चाध्ययनार्थं विद्यालयानां, मनोरञ्जनार्थं गोष्ठीनां, चित्रशालानां, नाट्यगृहाणां, संगीतालयानाञ्चापेक्षा भवति। वाणिज्य-व्यवसायादिसमृद्धयर्थं सम्भूय सहयोगोऽपेक्षितः। विविधक्षेत्रेषु कार्यकारिणां, जीवनसाधनीभूतानां संस्थानां संरक्षणार्थं संवर्धनार्थं च संगठितजनसहयोग आवश्यकः। ईदृशरूपेण जीवनस्य सर्वविध विकासाय संघटितानां समुदायानां संस्थानां च समष्टिरेव समाज शब्दस्यार्थः।

अत्रेदं विचारणीय मस्ति यत् केवलं मानव समुदाय एव 'समाज' संज्ञां लब्धुं शक्नोति। कोशकारेणापि तथैव कथितमस्ति।

पशुनां समजोऽन्येषां समाजोऽथ सधर्मिणामिति।

अर्थात् पशूनां समवायः समाजः। सधर्मिणां समावायः समाजः। तथा च सोद्देश्यक-शान्ति-सौमनस्य-सौहार्द्रादिभावनायुक्तो जनसमुदाय एव समाजः। न केवलं जनसम्मर्दमात्रं समाजः। मनुष्यस्य स्वाभाविकी प्रवृत्ति रिदृशी, येन स शान्तिं मृगयते, आनन्दमन्विष्यति, एकाकिनायां न रमते, न च तस्मै विविक्तता रोचते। इत्थञ्च पारस्परिकस्नेहसहानुभूतिसंयुक्तो जनसमुदायः समाजः।

समाजं विहाय कोऽपि मनुष्यो जीवितुं नशक्नोति। यद्यपि समाजे तादृशा व्यक्तयो दृश्यन्ते, येषु केचिद् भिक्षव; केचिद् योगिन अन्ये च संन्यासिनो विरागिणो वा। परं पारिवारिक सामाजिक-बन्धेभ्यो मुक्तास्ते स्वेनोपार्जितैं गुणैः समाजं भूशमुकुपर्वन्ति। तथा च तेषामपि सामाजिकं जीवनं समानम्। न हि समाजं परित्यज्य कस्यापि हितं सम्भवति। वस्तुतस्तु तथा करण मसम्भवम्। यतः

समाजेनैव मानवचरित्रस्य निर्माणं भवति । समाज सहयोगं विना मानवो न स्वचरित्रं संस्कर्तुं परिमार्ष्टुं वा शक्नोति । समाजे तिष्ठन् मनुष्यः स्वार्थपरतां विहाय स्वकीयेऽन्तःकरणे समन्वयात्मिकीं भावनां सञ्चारयितुं क्षमते । सर्वस्यापि कथनस्यायमेवाभिप्रायो वर्तते यत् मावनजीवनस्य सार्वत्रिकविकासाय समाजस्य सत्ता सर्वथैवापेक्ष्यते ।

संक्षेपतोऽधोलिखितानि कारणानि समाजस्यावश्यकतां निर्दिशन्ति–

१. **भोजनाच्छादने**– शरीरस्य कृतेऽशनं वसनञ्च परमावश्यकम् । नहि भोजनं विना शरीरं चलितुं शक्नोति । तथव वसनं विनापि तस्य संरक्षणं दुष्करम् । एवञ्च शरीर साधनीभूता न्नोत्पादनाय, वसननिर्माणाय च बहूनां मनुष्याणां सहायता भवत्यपेक्षिता । तथा च मानवः सामाज मपेक्षते ।

२. **सरंक्षणम्**– हिंस्र पशुभ्यः, दस्युजनेभ्यः, आततायिप्रभृतिभ्यः स्वीयां रक्षां मनुष्यः समाज सहयोगेन कुरुते ।

३. **प्राकृतिक प्रकोपः**– नकेवलं जन्तुभ्यः किन्तु प्राकृतिक प्रकोपेनापि मनुष्यः पीडितो भवति । कदाचिद् भूकम्पः, कदाचिद् भूस्खलनम्, केदाचिच्चातिवर्षणजन्यजलोपप्लवः, कदाचित्तु अवर्षणजन्यादुभुक्षाक्षाज्वाला प्रवर्तते । उक्ताष्ववस्थासु समाज एव पीडिताम् समुद्धरति ।

४. **आधयोव्याधयश्च**– नानाविधा आधयोव्याधयश्च मानवमनुधावन्ति । यदा ते मानव माक्रमन्ते, निपीडयन्ति, अपकुर्वन्ति वा तेषां निवारणाय भिषजां मौषधाना पेक्षाञ्चाभवति । तथाविधानां भिषजामौषधानाञ्च सम्प्राप्तिः समाजसहयोगेनैव सम्भवति । एवं विचार्य निश्चप्रचं कथयितुं शक्यते मानवस्यकृते समाजस्यापेक्षा पदे पदेऽनुभूयते ।

सम्प्रतिप्रश्नोऽय मुत्तिष्ठति समाजे व्यक्तेः स्थानं कीदृशमिति । अपि व्यक्तिः समाजाद् गरीयसी ? उत समाजो व्यक्ते र्गरीयान् ? समाजशास्त्रिभि रस्मिन्सम्बन्धे भिन्नानि मतानि प्रकटितानि सन्ति । केषाञ्चिन्मते समाजो व्यक्ते र्महीयान् । तथा समाजस्य प्रातिष्ठार्थं कार्यं करणमेव व्यक्तेः धर्मः । समाजः साध्यम् । व्यक्तिस्तु साधनमात्र मिति ।

पर मन्ये विचारका एतद्वीपरीतं कथयन्ति । तेषां मते व्यक्तीनां समष्ट्यैव समाजस्य निर्माण भवति । व्यक्तिभ्यो विना समाजस्य नैवं स्वत्वं नास्ति । मानवः स्वाभिलाषपूरणायैव समाजं जनयति । तस्मात् समाजस्य लक्ष्यं व्यक्ते र्निर्माणम् ।

वस्तुतः समाजः शरीरम् । व्यक्ति रङ्गम् । अङ्गाना माधारः शरीरम् शरीरमपि अङ्गानांसमूह एव । तथा च शरीरे नष्टे नहि तस्याङ्गानि स्वस्थानि स्थातुं प्रभवन्ति । तथैव क्षतविक्षतैरङ्गैरन्वितं शरीरं निरामय मिति कथयितुं शभ्यते । एवञ्च सिद्धान्ते समाजस्य व्यक्तेश्च सम्बन्धः परस्पराश्रितः । अङ्गिनो विकासेऽङ्गानां विकासः । अङ्गानि च अङ्गिनि समाश्रितानि ।

अभ्यासः

प्रश्नाः

(१) 'समाज' शब्दः केष्वर्थेषु प्रसिद्धः ?

(२) किं व्यक्तेरुज्जीवनं समाजं विना नसम्भवति ?

(३) पशुसमुदाये समाजशब्दव्यवहारः प्रसिद्धो न वा ?

(४) यात्रायां सम्मिलितो जनसमूहः समाजशब्दभाग् भवति ?

(५) कानि करणानि समाजस्याऽऽवश्यकतां निर्दिशन्ति ?

(६) समाजव्यक्त्योः कस्य प्रमुखत्वम् ?

(७) सिद्धान्ते समाजव्यक्त्योः कीदृशं रूपं वर्तते ?

गंगाया अवतरणम्

पुरा भारते सगरो नाम धर्मात्मा भूपति र्बभूव। तस्य द्वे भार्ये आस्ताम्। एका विदर्भ-राजस्य दुहिता केशिनी अपरा चारिष्टनेमेर्दुहिता सुपर्णभगिनी सुमतिर्नाम। ताभ्यां पत्नीभ्यां सह सगरो हिमवन्त मासाद्य भृगुप्रस्रवणे सानौ तपस्तेपे। पूर्णे वर्षशते तपसाऽऽराधितो मुनि र्भृगुः सगराय वर ममदात्। एका भार्या वंशवृद्धिकर मेकं पुत्रं जनयिष्यति अपरा षष्ठिसहस्राणीति। एवं भाषमाणं मुनिं राजपुत्र्यौ प्राञ्जली भूत्वोचतुः। कस्या एकः सुतो भविष्यति, का च बहून् पुत्रा-ञ्जनयिष्यतीति।

परमधार्मिको भृगु र्बभाषे। अत्र यथेच्छं विधीयतामिति। ततः केशिनी वंशकरं पुत्रं जग्राह, सुमतिश्च षष्ठिषहस्राणि पुत्रान् वव्रे। तदुत्तरं ऋषिं प्रदक्षिणीकृत्य प्रीतो राजा सगरः सभार्यः स्वपुरं जगाम। व्यतीते काले ज्येष्ठा महिषी केशिनी पुत्रमेकं प्रासूता समञ्जनामधेयम्। सुमतेस्तु षष्ठि सहस्राण्यजायन्त। कालान्तरे ते सर्वे पुत्रा यौवनपदवी मारूढाः। सगरस्य ज्येष्ठः पुत्रोऽसमञ्जः पौराणां बालान् गृहीत्वा सरय्वा जले प्रक्षिप्य मज्जत स्तान्निरीक्ष्य हसति स्म। पापसमाचारः पौराणा महिते रतः स पुत्रः पौरवचनात् पित्रा नगरान्निर्वासितः।

तस्या समञ्जस्यांशुमान्नाम सर्वलोकस्य संमतः प्रियंवदो वीर्यवान् पुत्रः समजनि। अथ गच्छता कालेन सगरो महता समारोहेण यष्टु मुपचक्रमे। यज्ञार्थं विमुक्तस्याश्वस्य रक्षां दृढधन्वा महारथोंऽशुमान् स्वयमकरोत्। यज्ञे विघ्नं वाञ्छन् वासवो यज्ञियमश्वमपाहरत्। तथारूपेणाश्वे ह्रियमाणे उपाध्याया यजमान मब्रुवन्। भो राजन्! अयं यज्ञियोऽश्वोऽपनीयते,एतं चौरं विजित्याश्वं विनिवर्तय, अन्यथा यज्ञध्वंसो भवेदिति।

उपाध्यायवचः श्रुत्वा सगरः षष्ठिसहस्राणि पुत्रान् जगाद। गच्छत पुत्राः, खनत मेदिनीम्। विचिनुताश्वम्। यज्ञे दीक्षितोऽहं पौत्रेणांशुमता सहैव स्थास्यामि। यावदश्वो नागच्छति तावत्प्रतीक्षिष्ये। पितुर्वचनं श्रुत्वा हृष्टमनसस्ते सर्वे गत्वा वज्रसमै र्भुजैः पृथ्वीं बिभिदुः। एवंरूपेण वसुधायां भिद्यमानायां वध्यमानानां नागानामसुराणां च महाक्रिनादोऽभवत्। एवं जम्बूद्वीपं खनन्त स्ते सर्वतः परिचक्रमुः। ततो देवाः सगन्धर्वपन्नगाः संभ्रान्तमनसः पितामहमुपगम्य विषण्णवदना ऊचुः। भगवन्, सर्वा पृथ्वी सगरात्मजैः खन्यते। तेन बहवो जलचारिणो महात्मानो वध्यन्ते। यद्यस्य निवारणं नभवेत्तर्हि सगरात्मजाः सर्वभूतानि हिंसन्तीति।

संत्रस्तानां देवतानां वचः श्रुत्वा पितामहः उवाच—यस्य वासुदेवस्येयं कृत्स्ना वसुधा महिषी। स एव प्रभुः कापिलं रूपमास्थाय धरां धारयिष्यति, तस्यैव कोपाग्निनाऽचिरमेव सगरात्मजा दग्धा भविष्यन्तीति। पितामहवचो निशम्य हृष्टा देवाः स्वं स्थानं जग्मुः।

महीं भित्वा सगरपुत्राः पितरमेत्य ब्रुवत। सर्वा मही परिक्रान्ता, बलवन्तश्च यक्षासुर-पन्नगा निषूदिताः, परं नाश्वं तद्धर्तारं वा पश्यामः किमत्र करिष्याम इति। समन्युः सगरः प्रत्युवाच-भूय पृथ्वीं खनत। अश्वस्य हर्तारमासाद्य कृतार्था निवर्तध्वमिति।

पितुर्वचनं श्रुत्वा सर्वे पुत्रा रसातलं भभ्यद्रवन्। खन्यमाने रसातले तैश्चतसृषु दिक्षु विरूपाक्ष-महापद्म-सौमनस-भद्राख्या दिग्गजाः पृथ्वीधारणे नियुक्ता दृष्टाः। तान् प्रदक्षिणीकृत्य प्रागुत्तरां दिशं रोषेणाऽखनन् सगरपुत्राः। ततः कपिलरूपधारिणं सनातनं वासुदेवं तस्य नाति-दूरे चरन्तं हयं च ददृशु स्ते। भगवन्तं कपिल मश्वस्यहर्तारं मत्वा क्रोधेनाविष्टाः खनित्र-लाङ्गल-धरा स्तमभ्यधावंस्तिष्ठतिष्ठ त्वमस्माकं यज्ञियं तुरगं हृतवानसीति चाब्रुवन्। तेषां तद्वचनं श्रुत्वा कपिलो महता रोषेण हुंकारमकरोत्। तेन रोषाग्निना भस्मराशीभूताः सगरपुत्राः।

पुत्रांश्चिरगताञ्ज्ञात्वा सगरः पौत्रमंशुमन्तमब्रवीत्। शूरः कृतविद्यश्च त्वं, पूर्वजैस्तेजसातुल्यो-ऽसि। तस्मात्पितृणां गतिमन्वेषय। येऽभिवादाहांस्तानभिवाद्य विघ्नकरान् हत्वा च सिद्धार्थो निवर्त-स्वेति। एव मुक्तोंऽशुमान् धनुःखड्गं चादाय पितृभिः खातमार्गेण जगाम। रसातलं प्राप्य दिग्गजा-नपश्यत्। सर्वान् दिग्गजान् यथाविधि सम्पूज्यानन्तरं पितॄन् वाजिहर्तारं मुद्दिश्य पर्यपृच्छत्। तेऽब्रुवन्– कृतार्थस्त्वमचिरमेव वाजिनासह शीघ्रं प्रत्यागमिष्यसीति। ततोऽग्रे गच्छन् भस्म-राशीकृतान् पितृव्यांस्तेषा मदूरे चरन्तं हयं च ददर्श।

पितृव्याणां दशामालोक्य दुःखार्तोंऽशुमांश्चुक्रोश, तेषां जलक्रियां कर्तुमियेष। परं कुत्रापि जलमलब्ध्वा यावन्निपुणं न्यरूपयत् तावत् पितृणां मातुलं खगाधिपं ददर्श। वैनतयोंऽशुमन्तं जगाद। पुरुषव्याघ्र,मा शुचः, वधोऽयं लोकसम्मतः। अप्रमेयप्रभावेण कपिलेन यत इमे दग्धास्तस्मा-ल्लौकिकं सलिलमेभ्यो दातुं नार्हसि। पितृणां सलिलक्रियां हिमवतो ज्येष्ठायां दुहितरि गङ्गायां कुरु। भस्मराशीकृतानिमान् सगरपुत्रान् लोकपावनी गङ्गा यदि स्पृशेत्तर्हि ते स्वर्गं गच्छेयुः। अधुनाऽ श्वंगृहीत्वा निर्गच्छ, पैतामहं यज्ञं च निर्वर्तयेति। सुपर्णवचनं श्रुत्वा ध्यानरतं कपिलं प्रणम्य त्वरितं हयमादायांशुमान्निर्जगाम। दीक्षितं राजानमासाद्य सर्वं तस्मै न्यवेदयत्। सगरो यथाविधि यज्ञं परिसमाप्य स्वपुरमगच्छत्। गङ्गावतरणोपाय मज्ञात्वैव स महता कालेन दिवं गतः। सगरे दिवंगतेंऽशुमान् राजा बभूव। तस्यपुत्रो दिलीपो नाम विश्रुतोऽभवत्। तस्मिन् राज्यधुरं न्यस्य हिमवच्छिखरेंऽशुमांस्तप स्तेपे स्वर्गं च लेभे। कथं गङ्गाया अवतरणं भवेत्, कथं दग्धानां पितृणां जलक्रिया, कथं चैतांस्तारयेयमिति चिन्तापरो दिलीपोऽपि तस्मिन् कर्मणि साफल्यम-प्राप्यैव स्वर्लोकं ययौ।

ततस्तस्य पुत्रो नाम्नाभगीरथः परमधार्मिको मन्त्रिषु राज्यभारं संस्थाप्य गङ्गावतारणे निश्चितमति र्गोकर्णे वर्षसहस्राणि घोरं तपः समाचरत्। ततः सुरगणैः सह पितामहो भगीरथ मुपागम्याब्रवीत्– महाराज, तव तपसा प्रीतोऽहं, तस्माद्वरं वरयेति। भगीरथ उवाच–यदि मयि भगवान् प्रीतस्तर्हि सगरपुत्राणां भस्म गङ्गयाप्लावितं भवतु। अहं च सन्ततिं लभेयेति। धाता

भगीरथं जगाद—महानेष तव मनोरथः। इमां हिमवतो ज्यैष्ठां सुतां धारयितुं हरान्न कोऽप्यन्यः समर्थ स्तस्माच्छूलिनमत्र सन्तोषयेति । भगीरथमेवमुक्त्वा गङ्गां चाभाष्य परमेष्ठी सहदेवैस्त्रिदिवं जगाम। गते पितामहे भगीरथोऽङ्गुष्ठाग्र निपीडितां वसुमतीं कृत्वा वत्सरं यावदुमापतिं समुपास्त । पूर्णे संवत्सरे शंभु नृप मब्रवीत् । प्रीतोऽहं शिरसा शैलराजसुतां धारयिष्यामीति ।

ततो गङ्गाऽतिमहद्रूपमास्थाय नभस्तः शिवशिरसि महता वेगेन पपात, अचिन्तयच्च शंकरं गृहीत्वा स्रोतसा पातालं व्रजामीति । तस्या अवलेपं ज्ञात्वा क्रुद्धोहरस्तां तिरोभावयितुं मतिं चक्रे ।

रुद्रस्य मूर्धनि पतिता सा जटामण्डलान्निर्गमं नैव लेभे, तस्मिन्नेव जटामण्डले बहून्संवत्सरान्बभ्राम। पुनस्तपः आस्थाय भगीरथ शंकर मप्रीणयत् । स गङ्गां बिन्दुसरः प्रति विससर्ज । विसृज्यमानायां

तस्यां सप्तस्रोतांसि जज्ञिरे। ह्लादिनी, पावनी, नलिनी चेति तिस्रोगङ्गा प्राचीं दिशं, सुचक्षुः सीता सिन्धुश्चेति तिस्रः प्रतीचीं दिशं जग्मुः। स्रोतसां सप्तमी दिव्यस्यन्दनमास्थितं भगीरथ मन्वगच्छत्। गगनाच्छंकर शिरस्ततो धरणीमागता गङ्गा यजमानस्य जन्हो र्यज्ञवाटं संप्लावयामास। तन क्रुद्धो जन्हुःसर्वमपि गङ्गाया जलमपिबत्। ततो देवा गन्धर्वा ऋषयश्च जन्हुमपूजयन्। गङ्गा च तस्य दुहितृत्वेऽस्थापयन्। ततस्तुष्टो जन्हुः श्रोत्राभ्यां तामसृजत्। तस्मादेव गङ्गा जन्हुसुता जान्हवी चेति प्रोच्यते। पुन र्भगीरथरथमनुगच्छन्ती गङ्गा सागरं प्राप्य रसातलमुपा गच्छत्सगरपुत्राणां च भस्मनि पवित्रेण जलेनाऽऽप्लावयत्। गङ्गाया जलेन भस्मन्याप्लुते सति ब्रह्मा भगीरथ मुवाच-सगरस्य षष्टिसहस्राणि पुत्रा दिवङ्गताः। यावत्सागरस्य जलं लोके स्थास्यति तावत्सगरस्यात्मजा देववद्दिवि स्थास्यन्ति। इयं च गङ्गा लोके तव नाम्ना विश्रुता भविष्यति भागीरथीति। पुरुषर्षभ, गङ्गावतरणं कृत्वा लोके परमं यशः प्राप्तोऽसीति। एव मुक्त्वा पितामहो देवलोकमगच्छत्। भगीरथो यथाक्रमं पितृभ्य उदकक्रियां कृत्वा स्वपुरं प्रविश्य चिरं राज्यं प्रशशास। अन्ये च परमं पदं ययौ।

अभ्यासः

प्रश्नाः

(१) सगरः कुत्रत्यो राजा ?
(२) सगरस्य पत्न्यौ के ?
(३) सभार्यःसगरः कुत्र तपस्तेपे ?
(४) कैशिन्या पुत्रस्य नाम किम् ?
(५) यज्ञियस्याश्वस्य रक्षकः क आसीत् ?
(६) पितुराज्ञया सगरपुत्राःकिमकुर्वन् ?
(७) कस्य रोषेण सगरपुत्रा भस्मीभूताः ?
(८) वैनतैयोंऽशुमन्तं किमुपादिशत् ?
(९) विधाता भगीरथाय कीदृशं वरं ददौ ?
(१०) नभस्तो गङ्गा प्रथमं कुत्र पतिता ?
(११) जान्हवीति कस्या नाम ?
(१२) गङ्गाया जान्हवीति नामधेये किं कारणम् ?

पत्रम्
(गार्हस्थ्यम्)

काष्ठमण्डपनगरात्
दिनाङ्कः– २०३९.१२.८

श्रीमत्सु पूज्येषु पितृचरणेषु प्रणतयः सन्ततराम् ।

भवतामाशीर्वादेनाहं मद्यपर्यन्तं कुशली । आशासे भगवतः कृपया भवन्तोऽपि निरामयाः स्युरिति । अधुना मम परीक्षा निकटवर्तिनी वर्तते । मनोयोगपूर्वकं सपरिश्रमं पठन्नस्मि । अन्ये विषयाः प्रयोणोपस्थिताः । केवलं गणितविषये काचित् त्रुटिरस्ति । मन्ये, अचिरमेव तस्या अपि पूरणं भविष्यति । तथासति अत्र भवतां प्रसादेन गतवर्षे इवाऽस्मिन् वर्षेऽपि परीक्षायां प्रथमश्रेण्या मुत्तीर्णो भवेय मित्याशास्ति ।

परीक्षां समाप्य भवतां दर्शनार्थं मागमिष्यामि । गृहमागन्तुं दैनिकव्ययार्थञ्च शत-रुप्यकाणा मावश्यकता वर्तते । धनादेशादन्यमाध्यमेन वा रुप्यकाणि लभेय । मातरं मम नमस्कारं श्रावयन्तु । भगिन्याः स्मरणं मुहुर्मुहु रागच्छति । अन्ते पुनः प्रणम्य विरमामीदानीम् ।

भवत्कः प्रियसुतः
शाशिचन्द्रशर्मा

अथवा

दिनाङ्कः– २०३९.१२.८

श्रीमत्सु मान्येषु पितृपादेषु प्रणतयः सन्तु ।
मान्याः !

अत्र भवतामाशीर्वाद पत्रमनुपलभ्यैव बहूनि दिनानि व्यतीतानि । शिक्षापत्रमप्राप्य मम मन-श्चिन्ताकुल मस्ति । अस्माकं परीक्षा नातिदूरे वर्तते । अध्ययने नितरां संलग्नोऽस्मि । केवलं गणित-विषये काचित् त्रुटिरवस्थिता । मन्ये तामपि शीघ्रमपनेष्यामि । झटिति गृहवृत्तं प्राप्नुयाम् । मातरं प्रति मे प्रणामः । अनुजानाञ्च कृते स्नेहराशयः ।

विनीतः
भवदीयो सुतो गोवर्द्धनलालः

आवरणस्य निदर्शनम्

	प्रापकः श्रीयुतः– उमेशशर्मा गोरक्ष–विपणी मण्डलम्-गोरखा अञ्चलम्–गण्डकी देशः नेपालः
प्रेषकः– सागरशर्मा ११।३४६ थापाथली	

अभ्यासः

(१) स्वस्याध्ययनविषये भ्रातुः पत्रमेकं लिखत ।

(२) भ्रातृद्वितीयायां स्वस्यागमनं सूचयितुं भगिन्यै पत्रमेकं लिखत ।

पत्रम्
(विदेशज्ञानम्)

जापानदेशात् ।
२७-११-२०३९

भो चिरजीविन् स्नेहभाजनं भ्रातः !

अधुनाऽहं स्वदेशाद्दूरे जापानदेशेऽस्मि । भूभागदृष्ट्याऽयं देशोऽस्माकं षड्भिः संख्याभिर्महत्तरः । परं विकासदृष्ट्या निर्माणदृष्ट्या च सहस्रसंख्याभिरुन्नतः । हिमवत् कुक्षौ वर्तमानो नेपालश्चतुर्षु दिक्षु भूपरिवेष्टितः, जापानद्वीपस्तु सामुद्रिकजलवेष्टितः । 'टोकियो' नामधेया अस्य देशस्य राजधानी 'पूर्वस्य राधानीति' टोकियो शब्दस्यार्थः । सार्धकोटिपरिमिता जना अस्यां राजधान्यां तिष्ठन्ति । संसारे प्रख्यातषु महानगरेषु 'टोकियो' नामधेयं महानगरमप्यन्यतमम् ।

जापानदेशे सन्त्यसंख्यानि विविधवस्तूनामुत्पादकयन्त्राणि । यै र्नैकविधानि वस्तूनि निर्मीयन्ते, उत्पाद्यन्ते च । निर्मितानि वस्तूनि स्वदेशे प्रयुज्यन्ते, विदेशेषु च प्रेष्यन्ते । यद्यपि समुन्नतेषु देशेषु यानि वस्तून्युत्पाद्यन्ते विक्रीयन्ते तान्येवात्रापि । परं कलात्मकवस्तूनामुत्पादनेऽस्य वैशिष्ट्यं परिलक्ष्यते । अत्र निर्मितानां पाञ्चालिकानां संसारे सर्वत्राभिरुचिर्दरीदृश्यते । पुस्त (लेप्यादि) कार्येऽपि जापानदेशस्था निपुणाः सिद्धहस्ताश्च । समयबोधिकानां घटिकानाम्, आकाशवाणीयन्त्राणां, छायाटङ्कनयन्त्राणामुत्पादनेऽस्य प्राशस्त्यं सर्वत्रप्रसिद्धम् ।

प्रियभ्रातः ! यातायातसाधनानामत्र प्राचुर्यं वर्तते । संसारे ये जलपोताः सन्ति तेषामर्धभाग निर्माण मत्र भवति, द्विचक्रिकाः, त्रिचक्रिकाः, चतुश्चक्रिकाः, धूमशकटाः, पोताः, वायुयानानि चात्र यातायातसाधनानि । सर्वत्रदेशे ष्वशीतिसंख्यका विश्वविद्यालयाः सन्ति । माध्यमिक विद्यालयानां संख्या अपि सहस्रसंख्यातोऽप्यधिकाः । यद्यपि पाठ्यविषया विज्ञानोन्मुखाः, उद्योगोन्मुखाश्च । तथापि धर्मस्य, संस्कृतेः, ललितकलायाः सन्निवशः समानरूपेण विहितः । **'पुराणमित्येव न साधु सर्वं न चापि काव्यं नव मित्यवद्यम्'** इति कालिदासोक्तिरत्र प्रत्यक्षतो व्यवहृता दृश्यते । यतो यद्धितकरं स्वसंस्कृतेरनुकूलं च तत्प्राचीनमपि गृहीतम्, आधुनिक मपि तत्परित्यक्तं यदहितकरं स्वसंस्कृतेः प्रतिकूलञ्च । सर्वमपि शिक्षणं स्वभाषयैव क्रियते ।

भौतिकविकासदृष्ट्या भिन्नोऽपि जापानदेशोऽन्य कतिपयदृष्ट्याऽस्मद्देशेनसह साम्य मपि भजते । यथाऽस्मद्देशे राजसंस्थाया स्थानं सर्वोपरि वर्तते तथैवात्रापि मान्यते । अस्मद्देशे

श्री ५ बडामहाराजाधिराजानां पृथ्वीनारायणशाहानां यन्महत्वं विद्यते तथैव जापानदेशस्य कृते 'मेइजी' नामधेयस्य सम्राजः ।

जापान देशे बौद्धधर्मस्य प्रचारः बहुषु क्षेत्रेषु प्रसृतः । अत्र विशालानि मन्दिराणि सन्ति । मध्यमाकारा बृहदाकाराश्च मूर्तयो मन्दिरेषु विराजन्ते । अनेके भिक्षवो मन्दिरेषु वर्तन्ते । बौद्धधर्म सम्बन्धे पठनं चिन्तनं च तेषां प्रमुखं कार्यम् । जापानदेशीया भगवतो बुद्धस्य जन्मस्थलं नेपालं समीचीन रूपेण जानन्ति, धार्मिक दृष्ट्या संमानयन्ति च । अत्रस्था जनाः स्वदेशस्य गौरवं सर्वाधिकं मन्यन्ते । बालका अपि तत्सम्बन्धे दृढतराः । अस्मद्देशे भूस्खलनं कदाचिदेवानुभूयते परं जापानदेशे प्रायेण प्रतिमासं भूस्खलनं भवति । अतएवात्र निवासानां निर्माणं न इष्टकाभिः किन्तु काष्ठैः, कर्गजैः कटैश्च क्रियते । जापानदेशीयाःकटेषु पङ्क्तिबद्धरूपेण स्थित्वा शलाकाभिर्भुञ्जते । तेषां भोजने तण्डुलनिर्मित भक्तस्य, रसमयमांसस्य शाकस्यच बाहुल्यं भवति । जापानदेशीयां गृहिण्यो प्रियललित कला भवन्ति । विविधैः कलात्मकवस्तुभि स्ताः कोष्ठान् विभूषयन्ति । पुष्पसंयोजनरीति मत्र (इकेबाना) इति कथयन्ति साऽत्र प्रसिद्धा । इहत्या गृहस्थाः प्रायेण न खट्वायां स्वपन्ति, न वा गृहे मञ्चानां बाहुल्यं भवति । गृहं स्वच्छं पवित्रं च स्थापयितुं यतन्ते । उपानहौ अन्त र्नप्रवेशयन्ति ।

नव वर्षारम्भः, बुद्धजयन्ती, पाञ्चालिकोत्सवः, तारोत्सवः, श्राद्धदिनम् अत्रस्था उत्सवाः । सप्त–पञ्च–त्रिरङ्काः पवित्राः ।

राजप्रासादः, संविधानभवनम, पण्यवीथिका, केन्द्रीयंधूमशकटस्थलम्, युइनोद्यानम्, मेजीमन्दिरम्, निहोमसेतः, प्रमुखं क्रीडास्थलम्ः, टोकियोविश्व विद्यालयश्च प्रमुखानि दर्शनस्थानानि ।

यन्मयोल्लिखितं तेन जापानदेशसम्बन्धे तवापि किञ्चिज्ज्ञानं चर्धितं स्यादिति मन्ये । अस्त्वेतावदधुना स्वदेश मागत्य विस्तरेण वर्णयिष्यामि । आगमनसमये तव मनोरञ्जका विविधाकाराः पाञ्चालिका आनेष्यामि । पठने प्रयत्नं कुरु । विरमाम्यधुना ।

स्नेहशीलोऽग्रजः
रमेशः

अभ्यासः

प्रश्नाः

(१) नेपालाद् जापानदेशः कया संख्यया महत्तरः ?
(२) टोकियो शब्दस्य कोऽर्थः ?
(३) केषां वस्तूना मुत्पादने जापान देशस्य वैशिष्ट्यम् ?
(४) जापानदेशस्य पाठ्यक्रमे के के विषयाः सन्निहिताः ?
(५) तत्रस्थ पाठ्यक्रमस्य किं वैशिष्ट्यम् ?
(६) अस्मद्देशजापानदेशयोः केषु विषयेषु साम्यं प्राप्यते ?
(७) तत्र (जापाने) काभिः सामग्रीभि गृंहनिर्माणं क्रियते ?
(८) जापाने पुष्पसंयोजनरीतिं किं कथयन्ति ?
(९) जापानदेशे प्रसिद्धा उत्सवाः के ?

गाङ्गेयो भीष्मः

पुरा किल भारतवर्षे शान्तनु र्नाम राजा बभूव । स च स्वगुणगणैः सर्वत्र प्रसिद्धः, प्रजा-पालने च तत्परः । जगत् पावनी गङ्गा शपथेन तं वृतवती । शान्तनो र्गङ्गायां सप्त पुत्रा जाताः, यान् सा स्वप्रवाहे प्रवाहितवती । अष्टमं देवव्रतपुत्रं प्रसूय राज्ञो निरोधात् शपथभङ्गेन सा पतिं परित्यज्य गता । बालं देवव्रतं नीत्वा गङ्गा स्वयं शिक्षितवती, पश्चात् तं राज्ञे ददौ ।

एकदा मृगयां चरन् शान्तनु र्यमुनां नदीमभितोऽलौकिकं गन्धमजिघ्रत् । तस्य प्रभवस्थानं जिज्ञासमानः समन्तादन्विष्य काञ्चिद्देवरूपिणीं दाशकन्या मपश्यत् । ततो जात कुतूहलो राजा का ऽसित्वं ? किंकरोषीति तामपृच्छत् । साऽब्रवीत् । अहं पितु र्दाशराजस्य नियोगाद्धर्मार्थं तरीं वाहय इति ।

मञ्जुलरूपैं र्मधुरगन्धैश्च संयुक्तां तां दाशकन्यां राजाऽकामयत । तत्कार्यस्यकृते सा कन्या पितर मिङ्गितवती । यदा शान्तनु र्दाशराजसमीपं गत्वा तामात्मार्थे वरयामास तदा दाशराज स्तं प्रत्युवाच–राजन् ! मम पुत्र्याः कृते त्वत्समो नान्यो वरो भविष्यति । परं यदि भवान् मदीयां कन्यां प्रार्थयते तर्हि समयेनैव तां तुभ्यं प्रदद्यामिति । शान्तनुरुवाच–कथय तावत् तव समय मिति । दाशराजः प्रत्यभाषत– विवाहानन्तरं यः पुत्रोऽस्यां जायेत स एव भवदनन्तरं राज्येऽभिषेक्तव्यो नान्य

इति । दाशराजकन्यामभिकाक्षन्नपि राजा तस्य तादृशं समयं पूरयितु नाशक्नोत् तथैव हस्तिन पुरं प्रति न्यवर्तत । निवर्तितोऽपि स तां दाशराजकन्यां मुहुर्मुहु श्चिन्तयन्नतपत् । ततश्चिन्तापरं पितरं दृष्ट्वा देवव्रतो निवेदयामास–तातपाद ! भवतः सर्वतः कल्याणं वर्तते, राज्यं सुस्थिरं, पार्थिवाश्च वशंगता स्तत्किमर्थं दुःखितो भवान् ? अत्र भवत आधिं ज्ञातुमिच्छामि, ज्ञात्वा च यथासम्भवं प्रतिकुर्यामिति ।

प्रियेण पुत्रेणैव माश्वसितोऽपि शान्तनु र्दाशकन्यागतं स्वकीयमनुरागमाविष्कर्तुं नाशक्नो दत एवमुवाच–असंशय महं चिन्तापरः। अस्माकं महतिकुले त्वमेवैकोऽपत्यम् । शूरस्य युद्धप्रिय–स्यच तव विपत्तौ सर्वमेव कुलं नष्टं भवेत्; एतदेव मम दुःखस्य कारणमिति ।

महाबुद्धि र्देवव्रतो नैतन्मात्रं पितुः शोककारण मिति विचार्य वृद्धमन्त्रिसंकेतात् सारथि मपृच्छत् । सारथे र्ज्ञाततत्त्वः स रथमारुह्य तस्यैव दाशराजस्य समीपं जगाम । अब्रवीत् च तम्–मम पित्रे तव कन्यां देहीति । दाशराजश्च पूर्ववत् तमपि स्वसमय मश्रावयत् । विवाहानन्तरं यः पुत्रोऽस्यां जायेत स एव राज्यासनस्याधिकारी भवति चेदहं मम कन्यां दातुं प्रभवामि नान्यथेति। गाङ्गेयो देवव्रतो दाशराजं समयं समर्थयन् जगाद नाहं राज्यासन मभिकाङ्क्षे । अतएत यः सुतो ऽस्यां जायेत स एव राज्यासन मधिरोक्ष्यति, विश्वसिहि नाहं मिथ्यावादी ।

देवव्रत कथनेन दाशराजःकिञ्चिदाश्वस्तः तथापि तस्य मनसि शङ्कोन्मेष कलङ्को न सर्वथा विनष्टः । सोऽब्रवीत्, सत्य वचसस्तव कथने समाश्वस्तोऽपि यः पुत्रो जनिष्यते सोऽपि राज्याधिकारं त्यक्ष्यतीति नाहं विश्वसिमि। एवञ्च भवतोऽपत्यभयाद्भीतोऽहं स्वकन्यां दातुं नोत्सहे ।

अल्पे वयसि एव विविधविद्याभिरुद्योतित स्वान्तो गाङ्गेयः स्वीयं सर्वविधसुखं परित्य-ज्यापि पितुर्मानससन्तोषसम्पादनं समुचितमिति निश्चितवान् जगाद च ममापत्याद् भयमा-शङ्क्य स्वकन्यां दातुं नोत्सहसे चेद् देवान् सम्बोध्य पितृ श्चोद्दिश्याहं शपथं करोमि नाहं कदापि पाणिग्रहणं करिष्यामि. यावज्जीवनं ब्रह्मचर्यव्रत माचरिष्यामि. प्रक्षालिता भवतु शङ्का, देहि कन्या मिति । देवव्रतस्य तादृशीं भीषण प्रतिज्ञां श्रुत्वा नितरां सन्तुष्टो दाशराज स्तस्मै स्व-कन्यां समर्पयत् । रथमारोप्य तां देवव्रतो गृहमानीय पित्रे प्रददौ । पुत्रस्य तादृश प्रतिज्ञया किञ्चि द्दूयमना अपि राजा स्वाभिलाषपूरणेन भृशं सन्तुष्टः पुत्राय स्वेच्छामरणरूपं वरं ददौ ।

ततः परं दारुणप्रतिज्ञया देवव्रतो भीष्मनाम्ना प्रसिद्धः । गाङ्गेयो भीष्मः स्वबुद्धिवैभवेन विशिष्ट चारित्र्यण च समकालिकान् सर्वानतिशेते । महाभारतयुद्धे स दशदिनपर्यन्तं सैनापत्य मकरोत् । परिस्थित्या ऽऽबद्धोऽसौ कौरवपक्षमाश्रितोऽपि पाण्डवगुणैः प्रभावितः । भगवन्तं कृष्णं साक्षात् कुर्वन् गाङ्गेयो द्वादशमहाभागवतेषु सादरं गण्यते । भगवद्भक्तो भीष्मो महाभारतस्य समुज्ज्वलं नक्षत्रम् । शान्तिपर्वणि नैकविधेषु विषयेषु तेन ज्ञानगङ्गा प्रवाहिता ।

स्वगुणैः प्रतिष्ठितस्य महाभागवतस्यास्यनाम्ना भीष्मपञ्चकम्, भीष्मद्वादशीत्यादि पर्वाणि च प्रसिद्धानि । पितॄणां श्राद्धकाले निरपत्यं भीष्ममपि तर्पयन्ति लोकाः ।

(महाभारतात्)

अभ्यासः

प्रश्नाः

(१) गङ्गा शान्तनुं कथं वृतवती ?
(२) शान्तनो गङ्गायां कति पुत्रा अजायन्त ?
(३) गङ्गा किमर्थं शान्तनुमत्यजत् ?
(४) मृगयां चरन् शान्तनुः किमजिघ्रत् ?
(५) दाशराजः शान्तनोः पुरतः कीदृशं समयं स्थापयामास ?
(६) शान्तनु र्दाशराजसमयं पूरयितुं कथं नाशक्नोत् ?
(७) देवव्रतः पितुश्चिन्ताकारणं कथ मजानात् ?
(८) देवव्रतो दाशराजं कथं विश्वासयामास ?
(९) देवव्रतस्य कथं भीष्मेति नामधेयम् ?

नेपालस्य नद्यः

अस्माकं देशः प्राकृतिकरूपेणैव पर्वतबहुलः। अत्र केचन अन्युन्नता अन्ये च मध्यमोन्नताः (पर्वता) वर्तन्ते। देशस्योत्तरदिशि वर्तमानो हिमालय आकारेण स्थूलः स्वरूपेण चोच्चतमः। अस्य शिखराणि सर्वदैव हिमाच्छादितानि। हिमबाहुल्यादेते पर्वता रजताद्रिसदृशा स्तूलराशिसदृशा वा दृश्यन्ते। पूर्वतः पश्चिमपर्यन्तं प्रसृतो हिमशैलोऽनेकेषां नदनदीनां बहुविधानां जलनिर्झराणां चाऽऽकरोस्ति।



नेपाले प्रसिद्धासु नदीषु काश्चन हिमालया दुद्भवन्ति काश्चन महाभारतपर्वताग्निःसरन्ति। तासु हिमनद्यो ग्रीष्मकालेऽपि न तादृशी माकारस्वल्पता माप्नुवन्ति यथाऽन्या नद्यः। हिमानि यदा हिमरेखातोऽधः पतन्ति तदोष्णसम्पर्केण तानि विलीयन्ते। विलीनानि हिमानि नदनदीनां स्रोतांसि जायन्ते। एवं च हिमालयात् प्रभवा महत्यो लघ्व्यश्च वव्हयो नद्यो नेपाले वहन्ति। तासु काश्चन तिब्बतप्रदेशादपि समागताः सन्ति।

नेपालस्य पूर्वस्यां मेचीनदी पश्चिमदिशि महाकालीनदी च सीमारूपेण बहतः। सुदूरपश्चिमे वहन्ती कर्णाली स्वनाम्न्या प्रसिद्धा स्वरूपेण च विशाला। अस्याः सहायिकासु नदीषु शुक्ला (सेती) तिला, भेरी च मुख्याः। इयमेव कर्णाली भारतं प्रविश्य भगवतो रामचन्द्रस्य जन्मस्थलीमयोध्यां स्पृशन्ती सरयू घर्घरेति वोच्यते। भेर्यञ्चलस्य पूर्वस्यां प्रवहन्ती इरावती (रापती) च प्रसिद्धाऽन्यानदी।

नेपालस्य मध्यभागे प्रसिद्धाः सप्तगण्डक्यः प्रवहन्ति। कृष्णा (काली), शुक्ला (सेती), माद्रिका (मादी), कर्मदा (मर्स्याङ्दी), वृद्धागण्डकी (बूढी गण्डकी), अर्कगण्डकी (आँकु), त्रिशूलगण्डकी चेति तासां नामानि। तत्र कर्मदायाः सहायिका च्यवना (चेपे) नदी गोरक्षप्रदेश लम्जुङ्प्रदेशयोः सीमायां प्रवहति। स्वरूपेणाल्पापीय मितिहासे प्रसिद्धा। अस्याः शिरसि दुग्ध पुष्करिणीनाम तीर्थस्थलमस्ति। धर्मावती नामाऽन्या नदी च गोरक्षप्रदेशात् पश्चिमायां दिशि वहन्ती कर्मदयैव सङ्गता भवति। त्रिशूलगण्डक्याः शिरसि बहूनि सरांसि विद्यन्ते। तेषु नीलकण्ठह्रद इति प्रसिद्धं तीर्थस्थल मस्ति।

ज्येष्ठमासस्य दशहरायां भाद्रस्य पूर्णिमायां च बहवो दर्शनार्थिन स्तत्र गच्छन्ति। अस्या गण्डक्याः सहायिका तादी नाम्नी नदी चास्ति। उक्तासु नदीषु कृष्णां विहायान्या स्थाने स्थाने त्रिशूलगण्डक्यां मिलन्ति। पश्चिमोत्तरहिमशैले वर्तमानस्य दामोदरकुण्डस्य परीवाहरूपेण सप्तगण्डकीष्वन्यतमा कृष्णाभिधाना नदी निःसरति। यस्या निकटे पवित्रं मुक्तिनाथक्षेत्रं विराजते। स्रोतोरूपया-ऽऽकृत्या दक्षिणस्यां प्रवहन्ति कृष्णा रुरुक्षेत्र मवतरति। त्रिशूलगण्डक्या सह कृष्णाया मेलनं देवघट्टे भवति। सङ्गमात् प्रभृति इयं गण्डकी नारायणीत्युच्यते। नारायण्या स्त्रिवेणीक्षेत्रं प्रसिद्धं तीर्थ-स्थलम्। माघस्यामावास्यायां स्वदेशाद् विदेशाच्च बहूनां दर्शनार्थिना मुपस्थिति रत्र जायते। वाल्मीके राश्रमोऽपि त्रिवेणीनिकटे विराजते। देवघट्टश्च नेपालस्य तीर्थस्थलेषु प्रसिद्धः, हरिहरक्षेत्रम्, आदिप्रयागश्चेत्यपि देवघट्टस्य नामनी।

नेपालस्य राजधान्यां कान्तिपुर्यामपि वाग्मती विष्णुमत्यौ प्रसिद्धे नद्यौ। वाग्मत्याः सहायिके मणिमती रुद्रमत्यौ च। अल्पप्रवाहाया वाग्मत्या जलं मूलप्रदेशान्नगरे समानीतं वर्तते, तेन च तस्या प्रवाह स्तत्रापि न्यूनः। वाग्मत्याः पश्चिमे तटे पशुपतिनाथस्य मन्दिरं विराजते। प्रतिदिनं तस्य भगवतः स्नानं वाग्मत्या जलेनैव सम्पाद्यते। गुह्येश्वर्या मन्दिर मपि वाग्मत्या समीपे वामभागे विराजते।

नेपालस्य पूर्वे भागे सप्त कौशिक्यः प्रवहन्ति। इन्द्रावती, स्वर्णकौशिकी (सुनकोशी) ताम्र-कौशिकी, लिखुः, दुग्धकौशिकी, अरुणा, तमोरेति तासां नामानि। सप्तानां गण्डकीनां सप्त संख्यकानां कौशिकीनां वाग्मत्यादीनां नदीनां च माहात्म्यानि हिमवत्खण्डे सम्यग्रूपेण वर्णितानि सन्ति। गण्डकीकौशिक्यो रुल्लेखस्तु महाभारतेऽपि वर्तते। उक्तासु नदीषु प्रतिदिनं पर्वसु वा स्नानेन, श्रद्धापूर्वक दानेन, दैवपित्र्युद्देश्यककर्मणा च महत् पुण्यं भवति।

अस्माकं कृते नदीनां महत्त्वं द्विविधम् धार्मिकम् वैज्ञानिकम् (जीवनसाधनोपयोगी-वस्तूना मुत्पादकम्) च तत्र प्रथम न्तूक्तप्रायम्। यथा हैमवतीषु नदीषु स्नानेनऽस्माकं शरीरगत मल-शोधनं भवति। देवानां पूजनमुपासनञ्चास्माभि र्नदीतटे विधीयते। पितृणां तर्पणं नदीजले नैव सम्पाद्यते। नदीतटे प्राणविमोकः प्रशस्यतरः। गतासूना मन्तिमसंस्कारश्च प्रवाहसमीपे विधीयते।

भौतिकदृष्ट्या च नदीना मुपयोगो बहुविधः । यतो हि नित्यं प्रवहमानानां नदीनां जलैः विशालानां धान्यक्षेत्राणां सेचनं भवति। समुचितजलसम्पर्केण वसुमती सततं नैकविधानि जीवनोपयोगीनि वस्तूनि उत्पादयति । विद्युच्छक्ते राविष्कार आधुनिकविज्ञानस्य महनीयोपलब्धिः । सा च विद्युच्छक्ति रत्र नदीजलैः समुत्पादिता विद्यते । उत्तरकाले इतोऽप्यधिकतर मुत्पादनं भविष्यतीति सम्भाव्यते। विद्युच्छक्ते रुत्पादनं बहुविधकार्यसाधकमिति तु न केषामपि तिरोहितम्।

त्रिशलगण्डकी, वाग्मती, कुल्याखानी, पनौती, स्वर्णकौशिकी, सप्तकौशिकी, गण्डकी प्रभृतिभि र्योजनाभिरत्र विद्युदुत्पादन मारब्धम् कर्णाली, कनकावती, बवई, देवीघट्टादिभि र्योजनाभिरपि विद्युदुत्पादने प्रयतमानोऽस्ति सर्वकारः । नदीनां जलानि यातायातसाधनान्यपि । नद्यः प्रवाहे नौकाभि र्विविधवस्तूनां प्राणिना मपि नयनमानयनञ्च स्वल्पकेनैव प्रयासेन सम्भवति । नदीनां प्रवाहेण प्रवाहितानां शिलानां, शिलाशकलानां वालुकानाञ्च गृहादिनिर्माणे बहूपयोगी भवति । चूर्णीकृतैः शिलाखण्डै र्राजमार्गा निर्मीयन्ते । इत्थञ्च नदीना मुपयोगो बहुविधक्षेत्रेषु प्रसृतः । प्राचीनकालतो नद्याः समीप एव बहवो ग्रामाः, नगराणि च विकसितानि । अस्मद्देशे ऽन्यत्र चेयं स्थितिः समाना।

पर मेतदपि स्मरणीय मस्ति यद् वर्षासु विवृद्धप्रवाहा नद्यः कदाचिद् विनाशलीलामपि दर्शयन्ति, सस्यश्यामलां भूमिं प्रवाहयन्त्यपि। तथापि बहूपकुर्वत्यो नद्यः सर्वेषां लाभदायिन्यः प्रियाश्च सन्ति ।

अभ्यासः

प्रश्नाः

(१) अस्माकं देशः कीदृशः ?
(२) नेपाले बहुविधानां नदीना माकरः कोऽस्ति ?
(३) अत्रत्यानि नदीस्रोतांसि कानि ?
(४) नेपालस्य सीम्नि कौ नद्यौ वहतः ?
(५) सप्तगण्डकीनां नामानि लिखत ।
(६) सप्तकौशिक्यो नेपालस्य कस्मिन्भागे प्रवहन्ति ?
(७) कर्णाली नदी कुत्रास्ति ?
(८) अस्माकं कृते नदीनां महत्त्वं कतिविधम् ?
(९) अत्र काभि र्योजनाभि र्विद्युदुत्पादन मारब्धम् ?

समुद्रदर्शनम्

(संवादः)

शिष्याः– भो गुरो ! अस्माभि विगतेषु मासेषु मनोयोगपूर्वकं पठितम्, परीक्षा च दत्ता । परीक्षायाः परिणामः पश्चात् प्रकाश मेष्यति । अस्मिन् समये भ्रमणार्थं गन्तु मिच्छामः ।

गुरुः– समीचीनोऽयं विचारः । यथाऽध्ययनं तथैव भ्रमण मपि ज्ञानार्जनसाधनम् । भ्रमणेन बहुविधानां भौगोलिकानां वस्तूनां सामाजिकीनां स्थितीनाञ्च ज्ञानं भवति । तर्हि कथयत कुत्र गच्छामः ?

शिष्याः– वयं पर्वतबहुले देशे जाताः । अस्मिन् देशे नित्यं प्रवहन्तीनां नदीनां, सुन्दराणां निर्झराणां निर्मलानां गभीराणां च सरसां दृश्यमस्माभि र्दृष्टमेव । परं भूपरिवेष्टितस्यास्यदेशस्य समुद्रेण सह सम्पर्को नास्ति । एकवारं समुद्रं द्रष्टु मिच्छामो वयम् ।

गुरुः– युष्माकं यदि तादृशी अभिलाषा वर्तते तर्हि शोभनं समुद्रदर्शनमेव ।

धूमशकटयात्रां समाप्य प्रस्थितास्ते समुद्रस्य तीरम् । यथा पंक्तिबद्धाः सैनिकाः क्रमेण चलन्ति तथैव छात्रा अपि अचलन् । तान् दृष्ट्वा जना वदन्ति अहो विनीताः खलु एते बालवीराः । एतेषां वेषा अपि साधारणा स्वच्छाश्च । पदानि क्रमशः समकालं भूमौ पतन्ति । वदनानि च प्रसन्नानि प्रतिभान्ति । गुणवान् खलु एतेषां गुरु रिति ।

अनन्तरं ते सर्वे समुद्रतीरं प्राप्ताः, तत्रैव च कस्यचित्तरो च्छायायामुपविष्टाः ।

शिष्याः– शीतल मेतत्स्थलम् । अहो विशालोऽयं सागरः, दृश्यतां तावत् ।

गुरुः– यूयं सर्वे समुद्रस्य किञ्चिज्जलं गृहीत्वा तदास्वादयत । तदा ज्ञास्यथ तत् कीदृशम् ।

शिष्याः– (तथा कृत्वा) हन्त, क्षारं समुद्रस्य जलम् । एतत्पातुं नशक्यते ।

गुरुः– कीदृशं जलं वयं प्रतिदिनं पिबामः । किं तदपि क्षारम् ?

शिष्याः– न हि तत् क्षारं, किन्तु मधुरम् । किमर्थं सामुद्रं जलं क्षारम् ?

गुरुः– युष्माभिः पठितमस्ति विज्ञाने, किं वर्तते पृथ्वीव्या उदरे ?

शिष्याः– लोहं सुवर्णं रौप्यं ताम्र मित्यादयोः बहुविधाः पदार्थाः ।

गुरुः– बाढम् । सैन्धवं नाम क्षारविशेषः । अन्ये च बहवः क्षाराः सन्ति पृथिव्या उदरे । ते समुद्रस्य जले द्रवन्ति । तेन चैतज्जलं क्षारं भवति ।

शिष्याः– एतदपि पठित मस्माभिः समुद्रस्य पृष्ठभागो न कदापि निश्चलः । सततं तरंगास्तत्र विलुठन्ति ।

गुरुः— सत्यमेतत् । यथा मनुजस्य चित्तं न कदापि निश्चलं तथैव समुद्रस्य पृष्ठभागोऽपि । अपिज्ञातं तस्य कारणं युष्माभिः ?

शिष्याः— भो गुरो! ज्ञातं खलु । वायुः प्रवहति। तेन च चलति समुद्रस्य जलं समुद्भवन्ति च तरङ्गाः ।

गुरुः— साधूक्तं युष्माभिः। अपरं च पश्यत । एते तरङ्गा अत्र समुद्रस्य तीरे लघवः किन्तु मध्यप्रदेशे तुङ्गा भवन्ति ।

शिष्याः— हन्त भोः भीषणं खलु तद्रूपं स्यात् ।

गुरुः— युष्माकं कृते तदपरिचितं, तेन भीषणम् । किन्तु नाविकानां कुमारा स्तु रमन्ते तत्र सदैव ।

शिष्याः— (अङ्गुलिनिर्देशेन) पश्यत भोः तत्र जलस्य भीषणं विक्षेपम् ।

गुरुः— बाढम् । वर्तते तत्र कश्चिन्मकर इति प्रतिभाति । समुद्रस्य जले विशाला मत्स्या मकराश्च भवन्ति ।

शिष्याः— अस्मद्देशीय नद्यामपि मत्स्या मकराश्च सन्ति ।

गुरुः— युक्तम् । परं ते क्षुद्रा जलचराः । समुद्रे तु स्थूला जलचराःसन्ति । समुद्रे केचित् कूर्मा महाप्रस्तरा इव दृश्यन्ते ।

शिष्याः— तैस्तु ग्रहणोन्मुखा नाविका अपि वञ्चिता भवेयुः ।

गुरुः— अथ किम् ? केचित्तु कथाशेषा वर्तन्ते । श्रृणुत तिमिङ्गिलो नाम अपरो महान् जलचरः समुद्रे निवसति । महापोतवत्तस्य विशालं शरीरम् । पश्यैतैत् तिमिङ्गिल स्तत्र ।

शिष्याः— अहो विशाल स्तिमिङ्गिलस्याकारः । जले गज इव प्लवत इति मन्यामहे ।

गुरुः— सम्यगुक्तं युष्माभिः । सागरे अयं गज इव भाति ।

शिष्याः— किन्नु खलु एतदूर्ध्वं निःसरति तिमिङ्गिलस्य मस्तकात् ।

गुरुः— अयं किल जलोत्क्षेपःकृत स्तिमिङ्गिलेन । अन्यच्च समुद्रे बहवो नक्राः सर्पाश्च निवसन्ति । पश्यतैनं नक्रम् ।

शिष्याः— अहो उग्रमस्यरूपम्। दंष्ट्रा अस्य निशिताः। समुद्रे सर्वं खलु भीषणं विद्यत इति मन्यामहे ।

गुरुः— नहि नहि । अत्र किञ्चिन्मनोज्ञमपिवर्तते । ननु एतां शुक्तिं पश्यत ।

शिष्याः— अहो उज्ज्वलैषा शुक्तिः । नूनं मनोज्ञाऽस्या आकृतिः । बहवः शुक्तयस्तीरे विकीर्णा दृश्यन्ते ।

गुरुः— यूयं चिनुत काश्चिच्छुक्तीः ।

शिष्याः— अत्र केचिदन्येऽपि रमणीयाः पदार्थाःसन्ति ?

गुरुः— ते हि शङ्खादयो वर्तन्ते ।

शिष्याः— कथ मुद्भवन्ति शङ्खाःशुक्तयश्च सागरे ?

गुरुः— शम्बूकाः कुलीराश्चेति क्षुद्राः प्राणिनो जले वसन्ति । तेषामेते कोशाः । अयं प्रवालस्तु क्षुद्रैर्जन्तुभि विरचितं गृहमेव । काश्चिच्छुक्तयः किमप्यनर्घं वस्तु वितरन्ति । किं तज् ज्ञातं युष्माभिः ?

शिष्याः— मौक्तिकं स्यात्, मौक्तिकं खलु ! तस्य वर्णो विभाति शुक्तेर्वर्णवत् ।

गुरुः— युक्तमनुमितम् । अत एव सागरो रत्नाकर नाम्ना प्रसिद्धः । एतदेवास्य मनोज्ञं रूपम् । भवतु । व्यतीतं दिनम् । पश्यत भोः, तत्रास्तं गच्छति सूर्यः । नमामः तं दिनराजम् ।

शिष्याः— (तथाकृत्वा) अहोरक्तं विशालं च तस्य बिम्बम् । सागरस्य जले स मज्जतीव मन्यामहे ।

गुरुः— एतदपि रमणीयं स्वरूपं सागरस्य । अस्तु । अधुना सन्ध्याकालः सञ्जातः । वयं निवर्तामहै ।

शिष्याः— नमो गुरुभ्यः । भवतां सहयोगेनैव खल्वेतज्ज्ञानमस्माभिःप्राप्तम् ।

गुरुः— स्वस्ति युष्मभ्यम् ।

रत्नाकरः किं कुरुतेस्वरत्नै विन्ध्याचलः किं करिभिः करोति ।
श्रीखण्डखण्डै र्मलयाचलः किं परोपकाराय सतां विभूतयः ।। इति ।

अभ्यास

(१) शिष्या गुरुं किमकथयन् ?
(२) जना गच्छतो विद्यार्थिनो विलोक्य किमकथयन् ?
(३) समुद्रस्य जलं कथं क्षारम् ?
(४) किं समुद्रस्य पृष्टभागो निश्चलः ?
(५) समुद्रे कथं तरङ्गा उद्भवन्ति ?
(६) समुद्रे कीदृशा जलचरा भवन्ति ?
(७) तिमिङ्गिलस्याकारः कीदृशः ?
(८) समुद्रे मनोज्ञं वस्तु किं वर्तते ?
(९) शङ्खाः कीदृशाः पदार्थाः ?
(१०) कस्य नाम रत्नाकरः ? कथं तन्नाम ?

मानबहादुरः

नारायणघट्टे आसीत् मानबहादुर नामा बालकः। दुर्दैवाद् बाल्यकाले एव तस्य पितरौ दिवं गतौ। अन्ये बान्धवाः केऽपि नासन्। एवं सर्वसहायहीनः स विपणिषु ग्रामेषु च परिभ्रमन् याचयित्वा यत्किमपि प्राप्नोति तेनैवोदरं पूरयन् जीवति। भिक्षायै भ्रमन्तं तं कदाचिद् गोपाला कदाचिच्चान्ये बालका उपहसन्ति निन्दन्ति च। किं कुर्याद् मानबहादुरः। भिक्षां विना तस्य जीवनयात्रा न चलति। तेन भिक्षापात्रं गृहीत्वा प्रतिदिनं प्रातः काले निःसरति परिभ्रमति च द्वारं द्वारम्।

एकदा भिक्षाप्रसङ्गेन मानबहादुरः दयारामस्य गृहं प्राप्नोति। अङ्गणे वर्तमानो दयाराम स्तस्य सर्वं वृत्तान्तं पृच्छति। मानबहादुरस्य वृत्तान्तश्रवणेन दयारामस्य हृदये दया समुत्पन्ना। बाल्यात्प्रभृति दुर्भाग्यवशाद् मातृपितृभ्यां विहीनस्यास्य कथमुद्धारो भवेदिति। पश्चात्तस्मै याचकाय पञ्चविंशति रूप्यकाणि दत्त्वाऽवदत् दयारामः। अद्यप्रभृति भिक्षावृत्तिं परित्यज्य त्वं वाणिज्य-वृत्तिं कुरु। एभी रूप्यकैः फलानि क्रीत्वा ग्रामेषु गच्छ। तत्र मुललितस्वरेण फलक्रयणार्थं जनान् संबोधय। विक्रीते फले क्रमेण तव लाभो भविष्यति। द्वितीय तृतीय दिनेष्वपि एवं कुर्वन् गच्छत स्तवलाभांशोऽपि वर्धिष्यति। परमवधातव्यं, मिथ्याव्यवहारो न कर्तव्यः।

भिक्षावृत्तौ संलग्नो मानबहादुरः प्रथमन्तु दयारामस्य वचसि अविश्वस्त इव जातः। किन्तु दयारामेण प्रबोधितस्य तस्य मनसि पश्चाद् उत्साहस्याङ्कुर इव समुत्पन्नः। एवं प्रबोधितो मानबहादुरो दातुर्हस्ताद् रूप्यकं गृहीत्वा स्ववासभूमिं प्रत्यागच्छत्।

इतः परं भिक्षावृत्तिं परित्यक्तो मानबहादुरः प्रातरेव निःसरति। फलानि क्रीत्वा ग्रामेषु परिभ्रमति, संध्ययायां सर्वमपि समाप्य निवर्तते। एवंरूपेण व्यापारं कुर्वत स्तस्य दशद्वादश रूप्यकाणि प्रतिदिनं लाभो भवति। गच्छता कालेन तेन पश्चात् फलानामापणः स्वेनैव स्थापितः। पूर्वं दीनवृत्तिरपि अधुना वर्धित व्यापारो मानबहादुरः सर्वं कार्यजातं स्वयं द्रष्टु नाशक्नोत्। अतो व्यापारकर्मणि सहयोगार्थं स एकं सहयोगिन मस्थापयत्। फलव्यापा-रेण समृद्धाय तस्मै ग्रामान्तरवासिना केनापि धनिकेन सुशीला कन्या अर्पिता। ततश्च गार्हस्थ्य जीवने प्रविष्टस्य तस्यं सर्वमपि कार्यजातं समीचीनतया प्रचलितम्।

आढ्योऽपि मानबहादुरः कृतज्ञो वर्तते। स्वस्य दीनतरं जीवनं परिवर्तयितुं दयारामेण यः सहयोगो दत्त स्तं नविस्मरति स्म सः। तथा चैकदा रं तं प्रति कृतज्ञतां दर्शयितुं दयारामस्य गृहं प्राप्नोति।

वृद्धस्य तस्याग्रे पञ्चशतं रुप्यकाणि समर्प्य प्रणनाम मानबहादुरः ।

दयाराम आगच्छन्तं तं नजानाति रुप्यकाणि च नस्पृशति । केवलं जिज्ञासया दृष्ट्या-पश्यति । वृत्तान्तं स्मारयन् मानबहादुरः कथयति भवतः साहायेनैवाहमधुना स्वपदा स्थातुं प्राभ-वम् । तस्य प्रत्युपकारं कर्तुं तु नाहं समर्थः, तथापि मम श्रद्धारूप मेतद् रुप्यकं गृहीत्वाऽनुगृण्हातु भवान् ।

वृद्धो दयारामः कञ्चित्कालं विचार्य तद्रुप्यकं परावर्तयन्नकथयत् । भगवतः कृपया मम-ल्पोऽपि सहयोगो जले पतित स्तैलबिन्दुरिव त्वयि प्रतिफलित स्तथैव त्वमपि सौभाग्यवञ्चितान् दीनान् सहयोगेन समुद्धरेति । दयारामस्योपदेशेन द्विगुणितोत्साहो मानबहादुरो बहूनसहायान्-साहाय्यदानेनोपकार मकरोत् । एवं परोपकारे निरतस्य तस्य नामग्रहणं सर्वे सादरं कुर्वन्ति ।

अभ्यासः

प्रश्नाः

(१) मानबहादुरस्य पितरौ कदा दिवं गतौ ?
(२) भिक्षाप्रसङ्गेन मानबहादुरः कस्य गृहं प्राप्नोति ?
(३) कस्य वृत्तान्तं श्रुत्वा दयारामस्य हृदये दया समुत्पन्ना ?
(४) दयारामो मानबहादुरं किमुपादिशत् ?
(५) मानबहादुरः कथं फलव्यापारं करोति ?
(६) मानबहादुरः कृतज्ञो वर्तते वा कृतघ्नः ?
(७) मानबहादुरो दयारामं साक्षात्कृत्वा किमकरोत् ?
(८) कस्योपदेशेन मानबहादुरोऽसहायानां साहाय्य मकरोत् ?

अतिथिसत्कारफलम्

कश्चित् क्षुद्रसमाचारः प्राणिनां कालसन्निभः ।
विचचार महारण्ये घोरः शकुनिलुब्धकः ॥१॥

नैव कश्चित्मुहूर्त्तस्य न सम्बन्धी न बान्धवः ।
स तैः सर्वैः परित्यक्त स्तेन रौद्रेण कर्मणा ॥२॥

स पञ्जरक मादाय पाशं च लगुडं तथा ।
नित्यमेव वनं याति सर्वप्राणिविहिंसकः ॥३॥

एकदा भ्रमत स्तस्य वने ह्येका कपोतिका ।
जाता हस्तगता तां स प्राक्षिपत् पञ्जरान्तरे ॥४॥

अथ कृष्णा दिशः सर्वा वनस्थाह्यभवन् घनैः ।
वातवृष्टिश्च महती लयकाल इवा भवत् ॥५॥

ततः संत्रस्तहृदयः कम्पमानो मुहुर्मुहुः ।
अन्वेषयन् परित्राणं प्राप मूलं महातरोः ॥६॥

प्राप्य वृक्ष मवादीच्च योऽत्र तिष्ठति कश्चन ।
तस्याहं शरणं प्राप्तः स परित्रातु मामिति ॥७॥

अथ तस्य तरोः स्कन्धे कपोतः सुचिरं स्थितः ।
भार्याविरहितः शोचन् विललाप सुदुःखितः ॥८॥

वातवर्षो महानासी न्नचागच्छति मे प्रिया ।
तया विरहितं ह्येत च्छून्य मद्य गृहं मम ॥९॥

न गृहं गृहमित्याहु र्गृहिणी गृह मुच्यते ।
गृहं हि गृहिणीहीन मरण्यसदृशं मतम् ॥१०॥

पञ्जरस्था ततः श्रुत्वा भर्तुर्दुःखान्वितं वचः ।
कपोतिका मुसन्तुष्टा वाक्यं चेद मथाह सा ॥११॥

शृणुष्वावहितः कान्त यत्ते वक्ष्याम्यहं हितम् ।
प्राणै रपि त्वया नित्यं संरक्ष्यः शरणागतः ॥१२॥

एष शाकुनिकः शेते तवावासं समाश्रितः ।
शीतार्तश्च क्षुधार्तश्च पूजा मस्य समाचर ।।१३।।

यः साय मतिथिं प्राप्तं यथाशक्ति न पूजयेत् ।
तस्याऽसौ दुष्कृतं दत्त्वा सुकृतं चापकर्षति ।।१४।।
न चास्मै त्वं कृथा द्वेषं बद्धेयं मत्प्रियेति च ।
स्वकृतैरेव बद्धाऽहं प्राक्तनैः कर्मबन्धनैः ।।१५।।
तस्मा त्त्वं द्वेष मुत्सृज्य मद्बन्धन समुद्भवम् ।
धर्मे मनः समाधाय पूजयैनं यथाविधि ।।१६।।
तस्यास्तद्वचनं श्रुत्वा धर्मयुक्तिसमन्वितम् ।
उपगम्य ततोऽधृष्टः कपोतः प्राह लुब्धकम् ।।१७।।
भद्र मुस्वागतं तेऽस्तु ब्रूहि किं करवाणि ते ।
सन्तापश्च न कर्तव्यः स्वगृहे वर्तते भवान् ।।१८।।
व्याधस्तद्वचनं श्रुत्वा प्रत्युवाच विहङ्गमम् ।
कपोत खलु शीतं मे हिमत्राणं विधीयताम् ।।१९।।
स गत्वोल्मुक मानीय पातयामास पावकम् ।
संशुष्कैषु च पर्णेषु तमाशु समदीपयत् ।।२०।।
मुसन्दीप्तं ततः कृत्वा तमाह शरणागतम् ।
प्रतापयस्व विश्रब्धं स्वगात्राण्यत्र निर्भयः ।।२१।।
उञ्छे नैव च जीवामो वयं सर्वे वनौकसः ।
न चास्ति विभवः कश्चिन्नाशये येन ते क्षुधाम् ।।२२।।
सहस्रं भरते कश्चित् शतमन्यो दयापरः ।
मम त्वकृत पुण्यस्य क्षुद्रस्यात्मापि दुर्भरः ।।२३।।
एकस्याप्यतिथेरन्नं यः प्रदातुं न शक्तिमान् ।
तस्याऽनेक परिक्लेशे गृहे किं वसतः फलम् ।।२४।।
तत्तथा साधयाम्येत च्छरीरं दुःखजीवनम् ।
यथा भूयो न वक्ष्यामि नास्तीत्यर्थि समागमे ।।२५।।
एव मुक्त्वा स धर्मात्मा प्रहृष्टेनान्तरात्मना ।
तमग्निं संपरिक्रम्य प्रविवेश स्ववेश्मवत् ।।२६।।
तत स्तं लुब्धको दृष्ट्वा कृपया पीडितो भृशम् ।
कपोत मग्नौ पतितं वाक्यमेत दभाषत ।
नूनं मम नृशंस्य प्रत्यादर्शः सुदर्शितः ।।२७।।

प्रयच्छता स्वमांसानि कपोतेनेति चिन्तयन् ।
प्रतिज्ञां कृतवान् धर्मं चरिष्येऽतः परन्विति ॥२८॥

ततो यष्टिं शलाकां च जालकं पञ्जरं तथा ।
बभञ्ज लुब्धको दीनां कपोतीं च मुमोच ताम् ॥२९॥

लुब्धकेन विमुक्ता सा दृष्ट्वाऽग्नौ पतितं प्रियम् ।
पतिव्रता सुसन्दीप्तं तमेवाग्निं विवेश च ॥३०॥

ततो दिव्यशरीरा च दिव्या भरणभूषिता ।
भर्तारं स्वं दिव्यतनुं सा ददर्श विमानगम् ॥३१॥

शरणागत सन्त्रासादतिथेः पूजनादपि ।
प्राणान्तेऽपि जना एवं शुभां गतिं मवाप्नुयुः ॥३२॥

(पञ्चतन्त्रस्य–काकोलूकीयात्)

अभ्यासः

(१) **प्रश्नाः**

१– लुब्धकः नित्यं किं करोति ?
२– वातवृष्ट्या पीडितो लुब्धकः किमकरोत् ?
३– तरोस्कन्धे कोऽवस्थितः ?
४– कपोतिका कपोतं किं कथितवती ?
५– कपोतो लुब्धकस्य कथं सत्कारमकरोत् ?
६– कपोतस्याग्निप्रवेशं दृष्ट्वा लुब्धकेन किं कृतम् ?

(२) **निम्नाङ्कितानामंशाना मर्थालेख्याः**

(क) सर्वप्राणिविहिंसकः,
(ख) लयकाल इवाभवत्,
(ग) अन्वेषयन् परित्राणम्,
(घ) न गृहं गृहमित्याहुः,
(ङ) न चास्मै त्वं कृथा द्वेषम्,
(च) स्वकृतैरेव बद्धाऽहम्,
(छ) भद्र सुस्वागतं तेऽस्तु,
(ज) तमेवाग्निं विवेश च ।

(३) कपोतदम्पती अतिथिसत्कारस्य फलं किमलभेताम् ?

बौद्धधर्मो, दर्शनञ्च

(संवादः)

रमेशः संस्कृतमाध्यमिकविद्यालयस्य च्छात्रः । सोऽस्मिन् वर्षे पूर्वमध्यमां परीक्षामददात् । अधुना स लब्धावकाशो वर्तते । अवकाशसमये मनोरञ्जनं भौगोलिकं ज्ञानञ्चार्जयितुं सखिभिः सह गृहान्निर्गतः सः । इतस्ततः परिभ्रमन् रमेशो भगवतो बुद्धस्य जन्मस्थली लुम्बिनीं च प्राप्तवान् । तत्र विस्तृतायां भूम्यां तेन लुम्बिनीगुरुविकासयोजना दृष्टा । तत्र निखातं पुरातनमशोकस्तम्भं, तडागं, मन्दिराणि च दृष्ट्वा पुलकितः । तत्राधुना निर्मितानि भवनानि मनोहराणि उद्यानानि च रमणीयानि। एतानि सर्वाण्यपि वस्तूनि दृष्ट्वा हृष्टस्य तस्य मनसि बौद्धधर्मे दर्शनसम्बन्धे च जिज्ञासा समुद्भूता । तां जिज्ञासां समाधातुं रमेश स्तत्रस्थं बौद्धविहारं प्रविष्टः । विहारे समन्तभद्रनामा भिक्षुरासीत् । स च बौद्धधर्मस्य दर्शनस्य च पण्डितः । तत्समीपं प्राप्यानुमतिं गृहीत्वा स्वजिज्ञासां समादिधित्सुः सोऽपृच्छत् ।

रमेशः— बौद्धधर्मसम्बन्धे कथयतु भवान् !

समन्तः— बौद्धधर्मस्य प्रवर्तको गौतमबुद्धः । बाल्येऽस्य नाम सिद्धार्थः । सिद्धार्थः कपिलवस्तुक्षेत्रं स्वजन्मनाऽलंचकार । स च पश्चाद् विरक्तः । तपस्यन् सिद्धार्थः पश्चाद् बुद्धत्वं प्राप्तवान् ।

रमेशः— बौद्धधर्मस्य विस्तारः कथम् ? के च तस्याधारग्रन्थाः ?

समन्तः— बुद्धो यं धर्ममुपादिशत् तच्छिष्या स्तमगृण्हन्, अग्रन्थयञ्च । ते च ग्रन्था स्त्रिपिटक नाम्ना प्रसिद्धाः । ते सन्ति त्रयः, विनयपिटकः, सुत्तपिटकः, अभिधम्मपिटक इति । एते ग्रन्थाः पालीभाषायां निबद्धाः सन्ति ।

रमेशः— त्रयाणां ग्रन्थानां सारं संक्षेपेण कथयतु ।

समन्तः— विनयपिटके बौद्धानां कृते पालनीयाः सदाचारविषयाः समुल्लिखिताः सन्ति । सुत्तपिटके सदृष्टान्तोपदेशा वर्णिताः । अभिधम्मपिटके च दार्शनिका विषयाः संकलिताः । त्रिपिटका बौद्धधर्मस्याधारभूमयः ।

रमेशः— किं बौद्धधर्मे शाखाभेदोऽप्यस्ति ?

समन्त:– एवम् । बौद्धधर्मे द्वे शाखे प्रसिद्धे । तत्रैकाशाखा हीनयानम् अन्या च महायानमिति । अनयो: प्राचीनमतावलम्बिनी शाखा हीनयानम् । संशोधनवादिनी शाखा महायानम् । वज्रयानं नाम तृतीयं यानमपि बौद्धधर्मे प्रसिद्धम् । एतद् यानं पश्चाद्विकसितम् ।

रमेश:– केषु केषु देशेषु कस्या: कस्या: शाखाया: प्राधान्यम् ?

समन्त:– हीनयानशाखाया: प्रचार: प्रथमं दक्षिणभारते प्रसृत: । पश्चात् सा लङ्का, श्याम, ब्रह्म-देशेषु प्राप्ता, अद्य पर्यन्तं प्रचलिता च ।
महायानशाखाया: प्रचारो भारतस्योत्तरप्रदेशे विस्तृत: । नेपाल, त्रिविष्टप, चीन, जापान देशेषु प्रचलिता शाखाऽप्येषैव । नेपाले, त्रिविष्टपे च वज्रयानस्य प्रचारो बाहुल्येन प्राप्यते ।

रमेश:– आत्मन ईश्वरस्य च सम्बन्धे बौद्धदार्शनिकानां विचार: कीदृश: ?

समन्त:– आत्मा शरीराद् भिन्नो न वा ? स चामरो वानित्य: ? संसारो नित्योऽनित्यो वा ? इत्येत द्विषेषु विचारेषु महात्मा बुद्धो नापतत् । स तु केन प्रकारेण दु:खानि विनष्टानि स्यु रित्य-वैव विचचार, विचारयामास च । येषां विषयाणां समाधानाय प्रमाणानि न पर्याप्तानि तेषां समाधानाय प्रयत्नोऽनावश्यक: । तत्त्वविमर्शनमात्रेण मानवो न कमपि लाभं लभते । तस्मात् तदेव विमर्शनीयं येनार्हता वा मुक्ति: संलब्धा भवेत् इति बुद्धस्याशय: ।

रमेश:– नहि बौद्धमते कथं दु:खनाशो मुक्तिश्च ?

समन्त:– शाक्यमुनि र्बुद्धो ज्ञानस्य सारांशं चतुर्षु आर्यसत्येषु सन्निहितं मत्वा जनसाधारणं तमेवो-पदिदेश । आर्यसत्यानि तु हेय–हेयहेतु–हान–हानोपाया: । अर्थात् सांसारिकं जीवनं दु:खाकीर्णम् (हेयम्) दु:खानि सन्ति कारणजन्यानि (हेयहेतु:) दु:खानां विनाश: सम्भव: (हानम्) अस्ति दु:खानां विनाशस्योपाय (हानोपाय:) इति ।
एतानि चत्वारि सत्यान्येव दु:ख–दु:खसमुदय–दु:खनिरोध–दु:खनिरोधमार्गनामभि र्व्यहियन्ते । मानवस्य जीवनमेतै: पीड्यमानं वर्तते । तस्मात्तानून्मूलयितुमेव स उपादिशत् ।

रमेश:– कर्मसम्बन्धे बुद्धस्योपदेश: कीदृश: ?

समन्त:– तस्य महात्मनो बुद्धस्योपदेशसारोऽयम् । द्विविधं कर्म । तत्र प्रथमं तद् यद् रागद्वेष मोहवशात् क्रियते । द्वितीयं तद् यद् रागद्वेषमोहत्यागपूर्वक मनुष्ठीयते । प्रथम-विधं कर्म जन्मन: कारणं भवति, द्वितीयविधं च कर्म जन्म च्छिनत्ति । मानवेन तथाविधं कर्म कार्यं येन निर्वाणं प्राप्येत । निर्वाणं पुनर्जन्म नाशयति, दु:खानि दलयति, शान्तिञ्च विश्राणयति ।

रमेश:– निर्वाणप्राप्ति: कथम् ?

समन्त:– दु:खनिरोधस्य मार्ग श्चतुर्थं मार्यसत्य मस्ति । अनेन मार्गेण निर्वाणस्यावस्था प्राप्ता भवति । येभ्यो हि कारणेभ्यो दु:खान्युत्पद्यन्ते तेषां नाशस्योपाय एव निर्वाणस्य मार्गो ऽस्ति । महात्मा बुद्धो निर्वाणावाप्ते र्यं मार्गं जनानां पुरस्तान् निदधौ तस्य सन्त्यष्टाङ्गानि । अतोऽय मष्टाङ्गमार्ग इति निगद्यते । बौद्धधर्मस्य सारोऽयम् । एष मार्ग: संन्यासिनां गृहस्थानाञ्च समानरूपेण गम्योऽस्ति । मार्गस्य चास्याष्टाङ्गानि इमानि सन्ति – १ सम्यग् दृष्टि:, २. सम्यक् संकल्प: ३. सम्यग्वाक्, ४. सम्यक् कर्मान्त: ५. सम्यगाजीव:, ६. सम्यग्व्यायाम:, ७. सम्यक्स्मृति:, ८. सम्यक्समाधि रिति ।

यया नैतिकं बलं समुन्नमति, निर्मली भवति, संस्कृतञ्च जायते सा सम्यग् दृष्टि रित्युच्यते । निर्वाणमीप्सुभि: सांसारिकेषुष्वाविषयेषु आसक्ति स्त्यक्तव्या न कस्मिन्नपि तै र्द्वेष: कर्तव्यो न च हिंसैवा नुसरणीया एतद्विधस्याचरणस्याङ्गीकरणमेव बौद्धदर्शने सम्यक् संकल्प इति परिभाष्यते । एवमग्रेऽपि ।

रमेश:– भवतोऽनुग्रहेण मया बौद्धधर्मसम्बन्धे दर्शनसम्बन्धे च सामान्यज्ञान मर्जितम् । अस्तु प्रणाम: । गच्छामीदानीम् ।

अभ्यास:

प्रश्ना:

१. रमेशो भ्रमन् कुत्र प्राप्तवान् ?
२. लुम्बिन्यां तेन किं किं दृष्टम् ?
३. बौद्धधर्मस्याधारग्रन्था: के ?
४. बौद्धधर्मे शाखाभेद: कीदृश: ?
५. केषु केषु देशेषु कस्या: कस्या: शाखाया: प्राधान्यम् ?
६. बौद्धमते कथं दु:खनाशो मुक्तिश्च ?
७. चत्वारि आर्यसत्यानि कानि ?
८. के अष्टाङ्गमार्गा: ?

विज्ञानं वैज्ञानिका आविष्काराश्च

सर्वविधप्राणिषु मानवः सर्वोत्तमः। विचारशक्तेः प्रभावो मानवे सुरक्षितः। इतरे प्राणिनस्तु यथा प्रकृत्या प्रेरितास्तथैव व्यवहरन्ति न न्यूनं नाधिकं वा। मानवस्तु विचारशक्तेः प्रभावान् नवीनं कार्यं, नूतनानि निर्माणानि, अभिनवांश्चाविष्कारान् कर्तुं प्रभवति। स्थानभेदेन अवस्था भेदेन च मानवानां प्रवृत्तिः सामान्यज्ञानानन्तरं विशेषज्ञानाय जायते। यदा ते प्राथमिकी मवस्थां परित्यज्य विशेषावस्थां प्राप्नुवन्ति तदा तेषां निर्माण मुत्पादनं चात्यधिकं महात्वसम्पादकं भवति।

यद्यपि प्राकृतिकवस्तूनामवलोकनं, परीक्षणञ्च मानवसमुदाये प्राचीनकालात्प्रसिद्धतरम्। तथापि वर्षशतद्वयात् सार्धवर्षशतद्वयाच्चेतोऽस्मिन् क्षेत्रे वर्धमानवेग स्तीव्ररूपेण प्रगतिपथ मारूढः। तस्यैव प्रतिफलं विद्यते यज्जीवनस्य सर्वविधक्षेत्रेष्वद्यतनसमये परिवर्तनं परिवर्धन ञ्चायातम्। येषां वस्तूनां कल्पनमपि पूर्वं मसम्भावित मिवासीत् तानीदानीं व्यवहारे प्रत्यक्षाणि, न केवलं प्रत्यक्षाणि अपितु आवश्यकान्यपि।

नैकविधानां वैज्ञानिकानां प्रवर्धमानया जिज्ञासयाऽभ्यस्यमानेनाध्यवसायेन च बहुविधा आविष्कारा आविष्कृताः। अत एव इदं युगं विज्ञानयुगमिति प्रसिद्धम्, नास्त्यत्र सन्देहः।

यद्यपि मानवस्य प्रबलया लिप्सया, सलोलुपया धारणया, स्वार्थपरायणपरया भावनया आधुनिकं विज्ञानम्, आविष्कारजातं च यथा रचनात्मकं सौविध्यसम्पादकं तथैव कलहात्मकं विध्वंसात्मकं च। तथापि नवीनाविष्कर्तृभिः प्राकृतशक्तीनां वशीकणे स्वानुकूल्य सम्पादने च यत् साफल्यं प्राप्तं तत् कथमपि विस्मर्तुं न शक्यते।

आधुनिकै र्नवीनैराविष्कारैः केषु केषु क्षेत्रेषु किं किं परिवर्तनमायातमित्यस्मिन् विषये कतिपयोदाहरणानि निम्नाङ्कितानि–

१. पत्रप्रेषणप्रणाली– पुरा पत्रप्रेषणं वृत्तान्तज्ञानं च दुर्लभं दुष्कर ञ्चासीत्। परमद्य द्विचक्रिकाणां, मृत्तराणां, वाष्पशकट्यादीनां साहाय्येन स्वल्प एव काले पत्रादि प्रेषणं कर्तुं शक्यते। दूरदेशे घटिता अपि समाचाराः समाचारपत्रै र्यथाशीघ्रं प्राप्तुं शक्यन्ते। अधुना देशस्य प्रतिकोणं वृत्तान्तपत्रवितरणकेन्द्राणि संस्थापितानि वर्त्तन्ते।

२. दूरभाषणयन्त्रम् (टेलिफोन)–अनेन यन्त्रेण दूरदेशस्था अपि जना सपदि परस्परं वार्तालापं कर्तुं शक्नुवन्ति । एतादृश दूरभाषणसौविध्ये नाद्यत्वे व्यापारप्रसारः सुरक्षाप्रबन्धश्च सुकरः सञ्जातः ।

३. विद्युच्छक्तिः– आधुनिकाविष्कारेषु विद्युच्छक्त्या प्रभावः सर्वोत्कृष्टः । अद्य प्रत्येक मपि कार्यं विद्युच्छक्त्याऽल्पव्ययेन स्वल्पकाले सम्पादयितुं शक्यते । शकटीगमनं, यन्त्रसञ्चालनं, प्रकाश–कार्यं, निवासानामुष्णीकरणं, शैत्योत्पादनं, भोजनपदार्थपाकः, गृहपरिमार्जनादिकं चाद्य विद्युच्छक्त्या सम्पाद्यन्ते ।

४. यातायातप्रणाली– अद्यत्वे तैलेन, वाष्पेण, विद्युत। च संचाल्यमानानां मृत्तराणां, शकटीनां, समुद्रपोतानां, विमानानां चाविष्कारेण प्रसारणेन च अल्पीयसि समये सौविध्यपूर्वकं सर्वत्रभ्रमणं सुकरं जातम् ।

५. चित्रकला– चित्रकलायाः प्रयोगः समाजे प्राचीनकालात् प्रचलितो दृश्यते, परं पुरा बहु-समयश्रमेण चित्रं निर्मीयते स्म । किन्तु अधुना यान्त्रिकसहयोगेन सपदि चित्रं ग्रहीतुं शक्यते ।

६. मुद्रणम्– पुरा अल्पकलेवरस्य पुस्तकस्य निर्माणेऽपि समयस्य श्रमस्य च प्रयोगो बहुल मपेक्ष-ते स्म । परमद्य मुद्रणयन्त्रप्रभावेण पृथुलं दुर्लभ मपि ग्रन्थं स्तोकसमयेनाल्पमूल्येन च लब्धुं शक्यते । मुद्रणकलाया विकासेन समाचारपत्राणि पण्यवीथिषु विक्रीयन्ते, प्रतिगृहं पठ्यन्ते च ।

७. वीक्षणम्– अणुवीक्षणयन्त्राणां, दूरवीक्षणयन्त्राणां, पारदर्शकयन्त्राणां चाऽऽविष्कारेण कीटाणुज्ञाने, खगोलविद्यायां, शल्यचिकित्सायां च चमत्कार इव जातः ।

८. चलचित्रम्– आधुनिकसमाजे चलचित्राणां यादृशप्रभावो दृश्यते न तादृशोऽन्यस्य कस्यापि वस्तुनः । अस्य सहयोगेन शतसहस्रयोजनदूरस्थितानां प्राकृतवस्तूनां, सामाजिकीनां स्थितीनां रोमाञ्चकारकाणां दृश्यानां च करामलकवद्दर्शनं सुलभम् । अनेनैव कतिपया युवानो बालकाश्चा धुना भोजनं परित्यक्तुमुद्यता भवन्ति न चित्रपटदर्शनात् ।

९. नभोमार्गं जलमार्गगमनम्– इदानीं वायुयानानां विस्तारेण विकटभूभागानां गभीराणां जलराशीनां लंघनं च सुकरं जातम् । तथैव समुद्रपोतानां जलान्तर्गामिनीनां नौकानां चाविष्कारेण च विदेशयात्रा सुकरा ।

१०. कर्षणयन्त्राणि– कर्षणयन्त्राणामाविष्कारेण विज्ञानप्रधानेऽस्मिन् युगे उत्पादनकर्मणि महती प्रगति रवलोक्यते । मार्गादि निर्माणेऽपि कर्षणयन्त्राणि बहूपयुक्तानि ।

११. अणुशक्तिपरिज्ञानम्– वैज्ञानिकै र्बहुविधाना मणुशक्तीनां स्वरूपज्ञानञ्च समुपलब्धमस्ति येषां सहयोगेनान्तरिक्षान्वेषणम्, अणुबम्बनिर्माण मन्यविध वैज्ञानिककार्यं च सुकरं सञ्जातम् ।

अभ्यासः

प्रश्नाः

(१) मानवमानवेतरप्राणिनोः कीदृशो भेदः ?

(२) कस्मात्समयतो विज्ञानवेगः प्रगतिपथं मारूढः ?

(३) वैज्ञानिकैराविष्कारैः केषु केषु क्षेत्रेषु किं किं परिवर्तनमायातम् ?

(४) किं वैज्ञानिकाः पूर्वं नासन् ?

(५) आधुनिकवैज्ञानिकोन्नतेः परिणामः कीदृशः सम्भाव्यते ?

जीमूतवाहनः

एकदा जीमूतवाहनो मित्रावसुना सह समुद्रवेलां द्रष्टुं गतः । तत्र विविधानि दृश्यानि पश्यन् प्रहृष्टमनाः पर्यक्रामत् । ततो यावज्जलप्रसरण मार्गादपक्रम्य गिरिसानु समीपमार्गेण पर्यक्रामत्तावज्जीमूतवाहनो नागानां शिखराकारा नस्थिसङ्घा नपश्यत् । तत्सम्बन्धे पृष्टो मित्रावसु रुवाच । इह किल वैनतेयः स्वपक्षपवनैः समस्तसागरजलपूरमपास्य रसातलादुद्धृत्य प्रतिदिन मेकैकं नागमाहारी करोति । ततः सकल नागलोक विनाश माशङ्क्य नागराजेन वासुकिना गरुत्मा नभिहितः । गरुत्मन् ? त्वदभिपात सन्त्रासात्सहस्रशः स्रवन्ति भुजङ्गमाङ्गनानां गर्भाः । शिशवश्च पञ्चत्व मुपयान्ति । एवं च सन्ततिविच्छेदोऽस्माकं भवतश्च स्वार्थहानिः । तस्मादेकैकं नाग मनुदिन महं तवाऽऽहारार्थं प्रेषयामि । एवं सति श्रमं विना तव बुभुक्षा शान्तिः, अस्माक मपि किञ्चिन्निर्भयता भविष्यति । नागराजकथनं स्वीकृतं पक्षिराजेन । यान्नागान् विहगराजो भक्षयति तेषामस्थ्नां सञ्चयोऽयं गिरिशिखराकार इति ।

मित्रावसोर्वचः श्रुत्वा जातानुकम्पो जीमूतवाहनो मनसि व्यचिन्तयत्–किमहं स्वशरीरसमर्पणेनैकस्यापि नागस्य प्राणान् रक्षितुं शक्नुयाम् ! तर्हि धन्यं मम जीवनम् । तस्मिन्नेव समये समागतः प्रतीहारो मित्रावसुं तातसन्देश मकथयत् । तच्छ्रुत्वा तातो मामाह्वययति, कुमारेणाऽपि बहुप्रत्यवायेऽस्मिन्प्रदेशे निर्भरं नस्थातव्य मित्युक्त्वा प्रतीहारेणसह निष्क्रान्तो मित्रावसुः । तदनन्तरं जीमूतवाहनो गिरिशिखरादवतीर्य यावत्समुद्रतट मवलोकयति स्म तावत्, हा ! पुत्रक शंखचूड ! कथं व्यापाद्यमानोऽद्य किल त्वं मया प्रेक्षितव्य इति कस्याश्चिद्वृद्धाया आर्तं प्रलापं श्रुतवान् । स्वरानुसारंगत्वा वस्त्रयुगलहस्तेन किंकरेण रुदत्या च वृद्धयाऽनुगम्यमानं शङ्खचूडं नाम नागमपश्यत् । किंकरेणोक्तम् । नागलोकस्वामी वासुकिः समाज्ञापयति । इदं रक्तांशुकयुगलं परिधाय वध्यशिला मारोह । येन रक्तांशुकचिह्नोपलक्षितं त्वां गृहीत्वा गरुड आहारं करिष्यति ।

लतान्तरितविग्रहो जीमूतवाहनः किङ्करेण कथितं नागराजसन्देशं श्रुत्वा दुःखितोऽभूत् । शङ्खचूडो दुःखपरवशां मातरं बभाषे । अम्ब ! धैर्यं धारय । बाष्पवेगं संहर, कस्याग्रतो रुद्यते । यद्भवितव्यं तद्भविष्यत्येव । समाश्वसिहि । दुःखवेगान्मूर्च्छां गता वृद्धा कथमपि संज्ञां लब्ध्वा पुनः रोदितुमारब्धा । हा पुत्रक ! नागलोकपरिरक्षकेण वासुकिना परित्यक्तस्य ते कोऽपरः परित्राणं करिष्यतीति । नन्वयमात्मानं दर्शयितुं समुचितः समय इति मत्वा जीमूतवाहनोऽहमहमिति ब्रुवन्नुपासर्पत् । तं गरुडं मन्यमाना वृद्धा स्वोत्तरीयेण पुत्रमाच्छाद्य मां व्यापादय, अहं तवाहारार्थं परि-

कल्पितेति स्नेहादब्रवीत् । ततः शङ्खचूडस्तस्यै सर्वं कार्यजात मकथयत् । वृद्धा च किञ्चिदाश्वस्ता बभूव ।

जीमूतवाहनो वृद्धामुवाच–अम्ब, एतद्वासो युगलं मह्य मर्पय । तव पुत्रस्य जीवितं रक्षितुमहं स्वदेहं गरुडाय ददामि । वृद्धा कर्णौ पिधायोवाच–शान्तंपापं ! प्रतिहतममङ्गलम् ! जात, त्वं शङ्खचूड सदृश एव पुत्रकः । अथवा शङ्खचूडा दप्यधिकः । य एवं बन्धुजन परित्यक्तं मे पुत्रकं स्वशरीरदानेन रक्षितु मिच्छसि । एवञ्च शङ्खचूडो जीमूतवाहनेन पुनः पुन रभ्यर्थ्यमानोऽपि तदध्यवसायं नानुमेने । ततो मातरं प्रणम्य भगवन्तं दक्षिणेश्वरं (गोकर्ण) प्रदक्षिणीकर्तुं जगाम शङ्खचूडः । वृद्धा च तमनुससार । तस्मिन्नेव समये मित्रावसुजनन्या जामातुः कृते प्रेषितं रक्तांशुकयुगलं कञ्चुकिनोपनीतम् । तद्दृष्ट्वा जीमूतवाहन आत्मगतं सहर्ष माह । दिष्ट्या सिद्धमभिलषित मनेना र्तिकोपनतेन रक्तांशुकयुगले नेति । कञ्चुकिनि गते जीमूतवाहनो रक्तं वासो युगं परिधाय यावदसौ शङ्खचूडो नागच्छति तावत्त्वरिततरमिमां वध्यशिला मारोहामी त्युक्त्वा ऽऽत्मानमाच्छाद्य महत्या प्रीत्या शिलामारुरोह । तस्मिन्नेवक्षणे पक्षानिलवेगैर्मलयाचलशिलाचयं चालयन् पक्षिराज स्तत्र प्राप्तः । रक्ताम्बरप्रावृतं जीमूतवाहनं नागं मत्वा तं गृहीत्वाऽऽहारी कर्तुं मलयशिखरं प्रस्थितः । तस्मिन्नेव क्षणेऽम्बरतला त्पुष्पवृष्टिः पपात, दुन्दुभयश्च नेदुः ।

जीमूतवाहनस्य पिता जीमूतकेतुः सहधर्मचारिण्या वध्वा मलयवत्या च पर्युपास्यमान उटजाङ्गणे (पर्णशालाया श्चत्वरे) ससुखं न्यवसत् । तस्मिन् समये जीमूतकेतु र्वामाक्षिस्पन्दनेन जीमूतवाहनस्यासन्निहिततया पर्याकुल हृदयोऽतिस्नेहात् किमपि पापमाशङ्कमानो यावदासीत्ता वन्नभस्तो लग्नसरसमांसचूडामणिस्तस्य चरणयोरेव पपात । तं चूडामणिं निपुणं निरीक्ष्य ममपुत्र कस्यैवेति आशङ्क्य जीमूतवाहनजननी विलपितुमारब्धा पत्नीमलयवती च ।

अत्रान्तरे शङ्खचूडोऽर्णवतटे गोकर्णं प्रणम्य यावद्भुजङ्गमवध्यभूमिं न्यवर्तत तावज्जीमूतवाहनमादाय गगनमुत्पतन्तं गरुत्मन्तं ददर्श । परोपकाराय तृणीकृत देहं जीमूतवाहनमनुशोचञ्शङ्खचूडो रुधिरधारा मनुगच्छन्यत्र जीमूतकेतुः स्थितस्तमेवोद्देश माजगाम । हा त्रिभुवनैक चूडामणे ! क्व मया द्रष्टव्योऽसि, हा मुषितोऽस्मीति तारं क्रन्दन्तं शङ्खचूडं दृष्ट्वा जीमूतकेतु स्तमुवाच–वत्स किं तव चूडामणि रपहृतः ? । शङ्खचूडेनोक्तम् । न ममैव किन्तु त्रिभुवनस्यापि चूडामणि रपहृतः । शङ्खचूडो नाम नागः खल्वहम् । वैनतेयस्याहारार्थं वासुकिना प्रेषितः । परं करुणाविष्ट चेतसा केनापि विद्याधारेणात्मानं गरुत्मते दत्वाऽनिच्छतोऽपि मम प्राणाः संरक्षिता इति । तच्छ्रुत्वा सर्वे मोहं गताः । तादृशीमवस्थां दृष्ट्वा मम प्राणप्रदस्य जीमूतवाहनस्य सुसदृशं प्रत्युपकृतं मयेत्यात्मानमुपालभ्य शङ्खचूडो जीमूतवाहनस्य पितरौ समाश्वासितवान् ।

गरुडोऽपि जीमूतवाहनमादाय मलयाद्रि शिखरेस्थित स्तं चञ्च्वा खादितुं प्रचक्रमे । रुधिरे पीयमाने मांसे चोत्कृत्यमानेऽपि जीमूतवाहनं प्रसन्नवदनं दृष्ट्वा खगेश्वरस्तस्य धैर्यवृत्योपजात

कुतूहलो भक्षणादुपरतो बभूव । ततो जीमूतवाहन स्तमुवाच – गरुत्मन्, शिरामुखैः स्यन्दत एव रक्तम्, अद्यापि मम देहे मांसमस्ति, तवापि तृप्ति न लक्षये तत्किमिति भक्षणात्त्वं विरतोऽसि ?.

तस्य धैर्येण परं विस्मयं प्राप्तो नागान्तकः कस्त्वं महासत्त्व श्रोतुमिच्छामीति बभाषे । जीमूतवाहनो गरुडमुवाच – क्षुधाकुलो भवान् । नेदानीमन्यच्छ्रवणयोग्यं, तत्कुरुष्व मम मांसशोणितेन तृप्तिमिति यावज्जगाद तावच्छङ्खचूडः सहसोपसृत्य गरुडं पर्यवारयत् । तार्क्ष्य ! नायं नागः । परित्यक्त्वैनं मां भक्षय । यतोऽहमेव तवाहारार्थं वासुकिना प्रेषित इति । गरुड उभावपि वध्यचिह्नधारिणौ दृष्ट्वा कः खलु नाग इति नावगच्छामि । ततः शङ्खचूडेन स्वस्तिकलक्ष्म, जिह्वे, फणाश्च दर्शयित्वा गरुडस्य भ्रान्तिर्दूरीकृता । गरुडः सव्ययं शङ्खचूडं पप्रच्छ कस्तहर्ह्यसौ मया व्यापादित इति । शङ्खचूडः प्रत्युवाच–विद्याधरवंशतिलके जीमूतवाहनेऽपि त्वयाऽज्ञानान्निष्ठुर माचरितम् ।

ततो गरुत्मान् पश्चात्तापस्य परांकाष्ठांगतो महत्यंहःपङ्क आत्मानं पतितं मन्यमानस्तस्य महतः पापस्याग्नि प्रवेशादृतेनान्यत् किञ्चित्प्रायश्चित्तमिति निश्चित्यानलान्वेषणे मतिं बबन्ध । तस्मिन्नेवक्षणे जीमूतकेतुः पुत्रमरणशंकयाऽग्निशरणादग्निमादाय पत्नीवधू समेतस्तत्रैवाजगाम । गरुत्मां स्तं नाशक्नोन्मुख मपि दर्शयितुं लज्जया । अतश्च गरुडा जलधावात्मानं क्षेप्तु मैच्छत् ।

भो पक्षिराज, अलमनेना ध्यवसायेन, यतो नायं प्रतीकारः पापस्येत्युक्त्वा जीमूतवाहनस्तं निवारितवान् । यावज्जीमूतवाहन उत्थातुमैच्छत् तावत्पतितोत्तरीयो मूर्च्छां गतः । गरुडेन पक्षाभ्यामुपवीज्य संज्ञां लम्भितः । जीमूतवाहनस्य गरुडावकर्तितानिगात्राणि दृष्ट्वा वृद्धा माता पक्षिराजं धिक्कुर्वती भृशं रुरोद । जीमूतवाहनो मातरमुवाच–अम्ब, मामैवम । पूर्वमपीदृशमेव शरीरं परमार्थतः । यतो मेदोऽस्थिमांसमज्जासृक्सङ्घाते त्वक्समावृते शरीरे का नाम शोभेति । इति ब्रुवन्नेव मर्मच्छेदिनीभिर्वेदनाभि र्बाध्यमानो जीमूतवाहनो मरणावस्थां प्राप्तः । जीमूतकेतुः शङ्खचूडं चितां सज्जीकुर्वित्याज्ञापयत् । चितासमारोहणाय सर्वेऽपि सज्जीबभूवुः ।

रुदती मलयवती बद्धाञ्जलिरूर्ध्वं विलोक्योवाच–भगवति गौरि ! त्वयाज्ञप्तं विद्याधर चक्रवर्ती भर्ता ते भविष्यतीति, तत्कथं मम मन्दभाग्यायाः कृते त्वमप्यलीकवचना संवृत्तेति । तस्मिन्नेव समय उत्तरस्यां दिशि भास्वांस्तेजपुञ्जोऽदृश्यत । सर्वेषां नेत्राणि तेनाकर्षितानि । पश्चात्सर्वैरनुज्ञातं गौरी प्रादुर्भूतेति । सहसा प्रादुर्भूता गौरी जीमूतवाहनं कमण्डलूदकेना भिषिषेच प्रत्युज्जीवितो जीमूतवाहनोऽञ्जलिं बद्ध्वा गौरीमस्तौत्

अभिलषिताधिक वरदे प्रणति जनार्तिहारिणि शरण्ये ।
चरणौ नमाम्यहं ते विद्याधर वन्दिते गौरि ।। इति ।

अभ्यासः

प्रश्नाः–

१. मित्रावसुनासह जीमूतवाहनः कां द्रष्टुं गतः ?

२. वासुकि गंरुडेनसह कीदृशं समयबन्धमकरोत् ?

३. नागास्थिसङ्घान् दृष्ट्वा जीमूतवाहनः किं व्यचिन्तयत् ?

४. विलपन्तीं वृद्धां दृष्ट्वा जीमूतवाहनः किमकथयत् ?

५. गरुडः कं गृहीत्वा मलयशिखरं प्रस्थितः ?

६. जीमूतवाहनस्य पितरौ क आश्वासितवान् ?

७. गरुडश्चञ्च्वा जीमूतवाहनं खादन् किं व्यचिन्तयत् ?

८. स्वं खादन्तं गरुडं जीमूतवाहनः किमुवाच ?

९. स्वापराधस्य प्रायश्चित्तं गरुडः कथं कर्तुमैच्छत् ?

१०. विलपन्ती मलयवती गौरी मभिलक्ष्य किमुवाच ?

पुराणसमीक्षा

(संवादः)

माघमासे सरला व्रतं चरति । पूर्णिमायां व्रतोद्यापन मासीत् । उद्यापने भगवत्याः स्वस्थानीदेव्याः पूजन मायोजितम् । पूजार्थं पुरोहितोऽपि समाहूतः । सरलायाः पुरोहितो न केवलं कर्मकाण्डे किन्तु पुराणेऽपि लब्धप्रतिष्ठो वर्तते । पूजा सम्पन्ना । कथा श्रुता । भोजनञ्च समाप्तम् । तस्मिन् समये सा पौराणिकं पुरोहित मनुरुणद्धि, पुराणासम्बन्धे मम किञ्चित् प्रष्टव्य मस्तीति । पुरोहितः स्वस्यानुमतिं ददाति । कथयति च पुराणसम्बन्धे मया किञ्चि दनुशीलितमस्ति । अतो यथेच्छं पृच्छतु भवतीति ।

सरला– किमर्थं पुराणानि रचितानि ?

पुरोहितः–

साधारणा जना गूढं वेदार्थं मवगन्तुं न प्रभवन्ति । अत स्तादृशानां जनानां कृते वेदार्थ बोधनाय सरसायां सुबोधायाञ्च संस्कृतभाषायां रामायण, महाभारतं पुराणानि च व्यरचयन् ऋषयः ।

स० – किं तर्हि पुराणकथनं वेदकथनसदृशम् ?

पु० – वेदाः प्रभुसंमिद् वाक्यरूपाः । अत स्तेषु आख्यानाना मुपाख्यानानां वा प्रयोगो नास्ति । परं पुराणेषु तु तेषां सर्वेषां प्रयोगो विहितः । तथा च कथित मस्ति –

आख्यानैश्चाप्युपाख्यानैर्गाथाभिः कल्पशुद्धिभिः ।
पुराणसंहितां चक्रे पुराणार्थविशारदः ॥इति ।

वेदविज्ञानस्य मनोरञ्जके आख्यानेपरिणतीकरणं पुराणाना मपूर्वं कौशलं विद्यते । तथा च पुराणकथन मपि वेदकथनमूलम् ।

स०– पुराणकथन मपि वेदकथनमूल मित्यत्र किं प्रमाणम् ?

पु०– पुराणकथनं वेदकथनमूल मित्यत्र सन्ति बहूनि प्रमाणानि । उदाहरणं यथा ऋग्वेदे 'इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम् (१।१२।१७) इत्यादि रूपेण वर्णिता वामनावतारकथा वामनभागवतादि पुराणेषु विस्तरेण वर्णिताऽस्ति ।

केनोपनिषदि ब्रह्मविद्याया हैमवत्या उमारूपेण प्राकट्यं वर्णित मस्ति । तदाश्रित्यैव श्रीमद्भागवतादिषु जगन्मातु गिरिराजकुमार्या भगवत्याः पार्वत्या उमारूपेण जन्मग्रहणकथा उल्लिखिता दृश्यते ।

एवमेव अथर्ववेदे (का०८ सू० प्र० ३।४।५) महाराजस्य पृथोः पृथ्वीदोहनं संक्षेपेण वर्णित मस्ति । परं श्रीमद्भागवते तदेव सविस्तरं वर्णितं विद्यते । एवमेवान्यान्यपि कथानकानि वेदमूलकानि ।

स० – पुराणानां लक्षणं कीदृशम् ? येन तेषां परिचयो भवेत् ?

पु० – पुराणं पञ्चलक्षणम्' इति कोशकारकथनानुसारं पुराणानां लक्षणं निम्नाङ्कित श्लोकेन प्रदर्शितमस्ति ।

सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च ।
वंशानुचरितं चैव पुराणं पञ्चलक्षण मिति ॥

स० – किं पुराणानां संख्यासु मतभेदोऽपि प्रसिद्धः ?

पु० – पुराणानां संख्यामधिकृत्य मतभेदो नास्ति । सर्वेषा मपि मते पुराणानां संख्या – अष्टादश एव ।

स० – पुराणानां नामान्यपि श्रोतु मिच्छामि ।

पु० – अष्टादशाना मपि पुराणानां सङ्केतसूचकः श्लोको वर्तते –

मद्वयं भद्वयं चैव ब्रत्रयं व चतुष्टयम् ।
अनापलिङ्गकूस्कानि पुराणानि प्रचक्षते ॥इति॥

अर्थात् – मत्स्य – मार्कण्डेय – भविष्य – भागवत – ब्रह्माण्ड – ब्रह्मवैवर्त – ब्राह्म – वामन – वराह – विष्णु – वाय्वमग्नि – नारद – पद्म – लिङ्ग – गरुड – कूर्म – स्कन्द पुराणानीमानि सन्ति तन्नामानि ।

स० – किं गुणदृष्ट्याऽपि पुराणानि समानानि ?

पु० – वर्णितेषु पुराणेषु विविधानां देवानां देवीनाञ्चोपासनं महत्वञ्च प्रतिपादितमस्ति । पद्मपुराणे पुराणानि सत्त्वरजस्तमो भेदेन त्रिधा विभक्तानि । तत्र विष्णुविषयकं पुराणं सात्त्विकम्, ब्रह्मविषयकं पुराणं राजसम्, शिवविषयकं पुराणञ्च तामसमिति ।

स० – विविधपुराणेषु विभिन्नानां देवानां देवीनाञ्च कारणरूपेण, अनुग्राहकरूपेण च महत्वं प्रदर्शितमिति श्रूयते । तर्हि पुराणानि साम्प्रदायिकविचारोत्पादकानि प्रतीयन्ते ।

पु०– शिवपुराणे शिवो विष्णुब्रह्मणोः स्रष्टा, विष्णुपुराणे विष्णुः शिवब्रह्मणो निर्माता, देवीभागवते भगवती ब्रह्मविष्णुमहेशानां प्रसवित्री, सूर्यपुराणे सूर्यस्यैव सर्वसवितृत्वं प्रकटितमस्ति। किञ्च बहुषु स्थलेषु कथायामपि परस्परं भेदो दृश्यते। एतेन पुराणानि साम्प्रदायिकभावानोद्भावकानीव प्रतीयन्ते। परं तत् तत् पुराणं तत् तत् कल्पे संकलितम्। यस्मिन् कल्पे यस्य देवस्य महत्वं प्रसिद्धं तस्यैवोल्लेखो हि प्रायेण पुराणे विहितः। तस्मादेव न साम्प्रदायिकभावनोद्भावकानि पुराणानि। तथा चोक्तम् –

क्वचित् क्वचित् पुराणेषु विरोधो यदि लभ्यते।
कल्पभेदादिभिस्तत्र व्यवस्था सद्भिरिष्यते॥ इति।

स०– अस्मिन् विषयेऽन्यदपि समाधानं विद्यते ?

पु०– कथं न विद्यते ! वस्तुतो "नमोऽस्त्वनन्ताय सहस्रमूर्तये" "सहस्राणि सहस्रशो ये रुद्रा अधिभूम्याम्" इत्यादिभि र्वचनै रेक एव परमात्मा भक्तानां भावनानुसारं विविधरूपेणाऽऽविर्भवति। यादृश रूपेणाऽऽविर्भावस्तादृश रूपेणैव तस्य वर्णनं कृतमिति न कोऽपि दोषः। तथैवोक्तम् **'एकं सद्विप्रा बहुधा वदन्ति'** अर्थात् देकएव परमात्मा विविधरूपेण स्तूयते, व्यवह्रियते च। एकस्यापि विविधरूपेण स्तवनं समुपासनञ्चास्माकं दर्शनसम्मतम्।

स०– पुराणाना मविर्भावः कदा जातः ?

पु०– पुराणं पञ्चमं वेदानां वेदम्, इत्यादि रूपेणोल्लिखितत्वाद् वेदानन्तरं सर्वमान्यानि सर्वप्राचीनानि च पुराणान्येव सन्ति। सृष्ट्यादौ **'यो ब्रह्माणं विदधाति पूर्वं वेदांश्चतस्मै प्रहिणोति नित्यम्'** इत्यनुसारं प्रथमं ब्रह्माण मुत्पाद्य परमेश्वरो वेदज्ञान मेव तस्मै उपदिशति। भगवतो वेदज्ञानमुपलभ्य ब्रह्मा अन्यानि शास्त्राणि स्मरति। तत्र सर्वप्रथमं पुराणान्येव स्मरति। तथा चोक्तं पद्मपुराणे सृष्टिखण्डे, मत्स्यपुराणे च –

पुराणं सर्वशास्त्राणां प्रथमं ब्रह्मणा स्मृतम्।
अनन्तरञ्च वक्त्रेभ्यो वेदास्तस्य विनिर्गताः॥ इति।

स०– पुराणानां कर्ता एक एव व्यास देव इति श्रूयते, किं सम्भवतीदम् ?

पु०– पुराणसम्बन्धे ईदृश्येव मान्यता प्रसिद्धा। भगवतोऽवताररूपो व्यासएव सर्वेषां पुराणानां कर्ता। तथा चोक्तं महाभारते

अष्टादश पुराणानि कृत्वा सत्यवतीसुतः।
पश्चाद्भारत माख्यानं चक्रे तदुपबृंहितम्॥

स०– उपपुराणानां नामान्यपि श्रावयतु भवान् ।

पु.०– यद्यपि महापुराणाना मुपपुराणानां नामसु मतभदोऽप्यस्ति, तथापि साधारणतः उपपुराणानां नामानि निम्नाङ्कितानि सन्ति – सनत्कुमार – नरसिंह – नान्दी– शिवधर्म – दुर्वासस्–नारदीय– कापिल–मानव – उशनस्–ब्रह्माण्ड–वरूण–कालिका–वसिष्ठ –लिङ्ग – महेश्वर –साम्ब– सौर– पराशर–इति ।

स०– भवतां सहयोगेन पुराणसम्बन्धे मया बहवो विषया ज्ञाताः, धन्यवादार्हो भवान् ।

पु०– स्वधर्मसम्बन्धे स्वशास्त्रसम्बन्धे चेदृशी जिज्ञासा प्रशस्या, चिरजीविनी भव ।

अभ्यासः

प्रश्नाः

(१) सरला माघमासे किं करोति ?

(२) पुराणानि किमर्थं रचितानि ?

(३) वेदपुराणयोः कथने किं पार्थक्यम् ?

(४) पुराणकथन मपि वेदकथनमूल मित्यत्र किं प्रमाणम् ?

(५) पुराणपरिचायकानि लक्षणानि कानि ?

(६) कति पुराणानि ? कानि च तानि ?

(७) गुणभेदेन पुराणानि कतिधा विभक्तानि ?

(८) किं पुराणानि भेदज्ञानोत्पादकानि ?

(९) पुराणाना माविर्भावः कदा जातः ?

(१०) पुराणानां कर्ता कः ?

॥ श्रीः ॥

कुमारसम्भवम्

प्रथमः सर्गः ।

अथ तत्रभवान् महाधीमान् कविकुलचूडामणिः प्राज्ञजनस्तुत्यजनिः चूडान्तप्रतिभाविकासः कालिदासः सत्काव्यस्य सर्वजनाऽभिलाषविषयचतुर्वर्गफलप्राप्तिहेतुतया पार्वतीपरमेश्वरयोरनवद्यभव्यचरित्रपवित्रमतिशयरुच्यं कुमारसम्भवाऽभिख्यं महाकाव्यं चिकीर्षुः 'आशीर्नमस्क्रिया वस्तुनिर्देशो वाऽपि तन्मुखम्' इति शास्त्रात् आदौ प्रस्तुतविषयाऽनुकूलं वस्तु निर्दिशति—

अस्त्युत्तरस्यां दिशि देवतात्मा, हिमालयो नाम नगाऽधिराजः ।
पूर्वाऽपरौ तोयनिधी वगाह्य, स्थितः पृथिव्या इव मानदण्डः ॥ १ ॥

गिरीश्वरस्य दौहित्रं गिरीशस्य प्रियं सुतम् । षाण्मातुरानुजं देवं द्वैमातुरमुपास्महे ॥१॥

यां देवीं श्रुतिरूपिणीं भगवतीं मायेति वेदान्तिनो
भोगोत्पत्तिकरं प्रधानमिति यां जानन्ति सत्साङ्ख्यकाः ।
ब्रह्माभिन्नतमाऽपवर्गफलदा चैतन्यसम्पादिनी
सैवाम्बा विबुधैकवेद्यसुगुणा कुर्यात् कृतौ मङ्गलम् ॥ २ ॥

ज्ञानाज्ञानविचारतो मधुरिपो ! कार्यं कृतं यन्मया
कुर्वे कर्म यदप्यहं निजधिया शौरे ! करिष्यामि यत् ।
तत्सर्वं च समर्पयामि भगवन् । त्वत्पादपद्मद्वये
स्वामिन् ! कृष्ण ! न चास्ति मेऽत्र कृतिता कापि त्वदीयैव सा ॥३॥

यस्योपकारपरिशोधनमत्र किं स्याद् दुःशक्यमेव खलु मे जननान्तरेऽपि ।
यो मद्विधेऽल्पगुणकेऽपि दयालुरासीत् तं तातपादमनिशं प्रणमामि भक्त्या ॥ ४ ॥

संसारसागरसमुत्तरणैकसेतुं श्लाघ्यं कवीन्द्रगुरुदेवमहं नमामि ।
यत्पादपङ्कजयुगार्चनकर्मणैव मत्सन्निभा अपि भवन्ति बुधप्रकल्पाः ॥ ५ ॥

श्रीमत्सद्गुरुरामशास्त्रिकरुणासम्प्राप्तविद्यालवो
भारद्वाजकुलाब्धिकौस्तुभमणेर्दामोदरस्यात्मजः ।
प्राज्ञः कोऽपि कुमारसम्भवमहाकाव्येऽत्र गङ्गाधरः
टीकां 'पुंसवनीं' मिमां वितनुते बोधाय विद्यार्थिनाम् ॥ ६ ॥

अन्वयः—उत्तरस्यां दिशि हिमालयो नाम नगाऽधिराजः पूर्वापरौ तोयनिधी वगाह्य पृथिव्या मानदण्ड इव स्थितोऽस्ति ।

व्याख्या—उत्तरस्याम् = उदीच्याम्, दिशि = आशायाम्, देवतात्मा = देवतास्वरूपः, हिमालयो नाम = हिमालय इति प्रसिद्धः, नगाऽधिराजः=पर्वताऽधिराजः, पूर्वाऽपरौ = पूर्वपश्चिमौ, तोयनिधी = समुद्रौ, वगाह्य = प्रविश्य, पृथिव्याः = भूमेः, मानदण्ड इव = परिच्छेददण्ड इव, स्थितः = अवस्थितः, अस्ति=वर्तते । अत्रास्तीति वर्तमाननिर्देशेन परमेश्वरश्वशुरस्यास्य नित्यत्वमुक्तम् ।

व्युत्पत्तिः—'उत्तरस्यां दिशी' त्यनेन हिमालयस्य देवभूमित्वं 'देवतात्मे'त्यनेन स्थावरात्मत्वाऽभावश्च ज्ञायते, वक्ष्यति च 'पितुः प्रदेशास्तव देवभूमयः' (५-४५) इति । देवतात्मा = दीव्यतीति देवः, देव एव देवता, स्वार्थे तल् 'तलन्तं स्त्रियाम्' इत्यनुशासनादस्य पदस्य स्त्रीलिङ्गत्वम्, देवता आत्मा यस्य सः देवतात्मा । इदं तु वक्ष्यमाणचेतनकृत्यविवाहादिघटनार्थमुक्तम् । 'उत्तरस्यां दिशि देवभूमयः दक्षिणस्यां दिश्यसुरभूमयः, मध्ये मनुष्यभूमय' इति पुराणप्रसिद्धिः । हिमालयः = हिमानामालयः । नगाऽधिराजः=न गच्छन्तीति नगाः, अधिको राजा अधिराजः 'कुगतिप्रादयः' इति समासः, 'राजाहःसखिभ्यष्टच्' इति समासान्तष्टच्, नगानामधिराजो नगाऽधिराजः । पूर्वाऽपरौ=पूर्वश्चाऽपरश्च पूर्वाऽपरौ तौ । तोयनिधी = तोयानां निधिः तोयनिधिः, तौ । वगाह्य = 'अवगाह्य' इत्यत्र भागुरिमतेन अह्लोपः । मानदण्डः=मानस्य दण्डः मानदण्डः, 'मानम्' इत्यत्र भावे ल्युट् । अथवा मीयतेऽनेनेति मानं, करणे ल्युट्, मानश्चाऽसौ दण्डो मानदण्डः=आयामपरिच्छेदकदण्डः । पूर्वपश्चिमसमुद्रावगाहित्वं च हिमालयस्य ब्रह्माण्डपुराणे उक्तम्-'कैलासो हिमवांश्चैव दक्षिणे वर्षपर्वतौ । पूर्वपश्चिमगावेतावर्णवान्तरुपस्थितौ' ॥ इति ।

अत्र पताकावृत्तनायकभूतस्य हिमवतो निर्देशात् वस्तुनिर्देशः । वस्तुनिर्देशमात्रोपक्रमेष्वपि काव्येषु कवेर्मानसिको नमस्क्रियात्मको मङ्गलाचारः कल्पनीयः । तस्य शिष्टाचारसिद्धत्वात् । अत्र प्रकृतस्य = प्रकरणेन प्रस्तुतस्य उपमेयस्येत्यर्थः तादृशस्य हिमालयस्य उभयसमुद्रव्याप्तिसाम्यात्, परात्मना = पृथिवीमानदण्डत्वेन सम्भावनात् उत्प्रेक्षाऽलङ्कारः । तल्लक्षणं च साहित्यदर्पणे यथा—

'भवेत्सम्भावनोत्प्रेक्षा प्रकृतस्य परात्मना' । इति ।

अस्मिन् सर्गे प्रायेण वृत्तमुपजातिः । कुत्रचिदिन्द्रवज्रोपेन्द्रवज्रे च । इन्द्रवज्रालक्षणं—'स्यादिन्द्रवज्रा यदि तौ जगौ गः' । उपेन्द्रवज्रालक्षणम्—'उपेन्द्रवज्रा जतजास्ततो गौ' इति । इन्द्रवज्रोपेन्द्रवज्रयोः साङ्कर्याच्च उपजातिर्भवति । उक्तं च—

'अनन्तरोदीरितलक्ष्मभाजौ पादौ यदीयावुपजातयस्ताः' । इति ।

अत्र च श्लोके प्रथमतृतीयौ चरणाविन्द्रवज्रायाः, द्वितीयचतुर्थौ चरणावुपेन्द्रवज्रायाः ज्ञेयौ ।

अस्य महाकाव्यस्य नाम कुमारसम्भवम्, तदर्थस्तु—कुमारस्य (स्कन्दस्य) सम्भवः (उत्पत्तिर्महिमातिशयश्च) यत्र तत् । इत्थंव्यधिकरणबहुव्रीहिसम्भवं कुमारसम्भवपदं ज्ञेयम् । षष्ठीतत्पुरुषाश्रयणे तु लक्षणापत्तेर्दुर्वारता इति बोध्यम् । महाकाव्यलक्षणं च—

'सर्गबन्धो महाकाव्यमुच्यते तस्य लक्षणम् ।
आशीर्नमस्क्रिया वस्तुनिर्देशो वाऽपि तन्मुखम्' ॥ इति ।

भावार्थः—उत्तरककुभि देवतास्वरूपो हिमालयनामकः पर्वतश्रेष्ठः पूर्वसमुद्रादारभ्य पश्चिमसमुद्रपर्यन्तं विस्तीर्णः, भूमेः परिच्छेदको दण्डः (गज) इव वर्तत इत्यर्थः । मानदण्डो हि मेयेन तुल्यपरिमाणो भवतीति यावत् ।

अतः परं षोडशभिः श्लोकैर्हिमालयं वर्णयति । तत्र पर्वताऽधिराजत्वं निर्वोढुमाह—

यं सर्वशैलाः परिकल्प्य वत्सं, मेरौ स्थिते दोग्धरि दोहदक्षे ।
भास्वन्ति रत्नानि महौषधीश्च, पृथूपदिष्टां दुदुहुर्धरित्रीम् ॥ २ ॥

अन्वयः—सर्वशैलाः यं वत्सं परिकल्प्य दोहदक्षे मेरौ दोग्धरि स्थिते (सति) भास्वन्ति रत्नानि महौषधीश्च पृथूपदिष्टां धरित्रीं दुदुहुः ।

व्याख्या—सर्वशैलाः=सकलपर्वताः मन्दरादय इत्यर्थः, यं=हिमालयं, वत्सं परिकल्प्य=वत्सत्वेन कल्पयित्वा, दोहदक्षे=दोहननिपुणे, मेरौ=सुमेरौ, दोग्धरि=दोहके, स्थिते=वर्तमाने (सति), भास्वन्ति=कान्तिमन्ति ('महौषधीः' इत्यस्याऽपि विशेषणमेतत्, तत्र च 'कान्तिमतीः' इति पर्यायः प्रदेयः) रत्नानि=मरकतपद्मरागादिमणीन् स्वजातिश्रेष्ठवस्तूनि च, महौषधीश्च=सञ्जीविन्यादीश्च, पृथूपदिष्टां=वैन्योपदिष्टां, धरित्रीं=पृथिवीं, दुदुहुः=दुग्धवन्तः ।

व्युत्पत्तिः—न चाऽत्र 'यम्'इत्यस्य साकाङ्क्षपदस्य तच्छब्दोपादानाऽभावेन प्रयुक्तत्वेन 'यत्तदोर्नित्यसम्बन्ध' इति न्यायस्य उल्लङ्घितत्वेन च दोषत्वं शङ्कथम्, पूर्वमेवाऽध्याहृततच्छब्देन हिमालयशब्देनैवाकाङ्क्षानिवृत्तेः । तदुक्तम्—

'यत्तदादेरुपादानं क्रियाभ्याससमुच्चयौ ।
क्रियासमभिहारश्च वाक्यार्थान् युज्यते मिथः' ॥ इति ।

सर्वशैलाः = सर्वे च ते शैलाः सर्वशैलाः 'पूर्वकालैकसर्वजरत्पुराणनवकेवलाः समानाऽधिकरणेन' इति समासः । दोहदक्षे = दोहनं दोहः, दुह् धातोः 'अकर्त्तरि च कारके सञ्ज्ञायाम् ॥ ३।३।१९॥' इति घञ् , दोहे दक्षो दोहदक्षस्तस्मिन् । दोग्धरि= दोग्धीति दोग्धा तस्मिन् , 'ण्वुल्तृचौ' इति दुहधातोस्तृच् । 'स्थिते सति' इत्यत्र 'यस्य च भावेन भावलक्षणम्' इति सप्तमी । पृथूपदिष्टां = पृथुनोपदिष्टा पृथूपदिष्टा, ताम् । पृथुर्नाम नारायणांशभूतो राजा, तेनोपदिष्टाम् ।

'वेनो नामाभवद्राजा दुश्शीलो दुष्पराक्रमः । तं शप्त्वा मुनयो जग्मुःपीडितास्तदुपद्रवैः॥
राजाभावात्ततो जाता धरित्री दुर्जनाकुला । ततस्ते मुनयः सर्वे सञ्चिन्त्य मनसा हरिम् ॥
मन्मथुस्तस्य वेनस्य गतप्राणं कलेवरम् । तस्मादभून्महातेजा अरणेरिव पावकः ॥
नारायणांशसम्भूतः पृथुः पृथुपराक्रमः' ॥ श्री० भा० ॥ ४ ॥

इति भागवतप्रसिद्धायाः पृथूत्पत्तेः संक्षेपः । गोरूपधरामिति शेषः । धरित्रीमित्यत्र अपादानाऽविवक्षायाम् 'अकथितं च' इति गौणकर्मत्वम् । भास्वन्ति = प्रशस्ता भा अस्ति येषां तानि भास्वन्ति 'तदस्यास्त्यस्मिन्निति मतुप्' इति भाशब्दान्मतुप् । भास्वन्ति च भास्वत्यश्चेति भास्वन्ति, 'नपुंसकमनपुंसकेनैकवच्चाऽस्यान्यतरस्याम्' इति नपुंसकैकशेषः । रत्नम्='रत्नं स्वजातिश्रेष्ठेऽपि' इत्यमरः । महौषधीः = मह्यन्ते पूज्यन्ते इति महत्यः । 'वर्तमाने पृषन्महद्बृहज्जगच्छतृवच्च' इति शतृवन्निपातः, ततः स्त्रीत्वविवक्षायां 'उगितश्च' इति ङीप् । महत्यश्च ता ओषध्यः, महौषध्यः, ता महौषधीः । 'ओषध्यः फलपाकान्ता' इत्यमरः । महौषधीश्च = सञ्जीवनीप्रभृतीश्च, दुग्धत्वेन परिणता इति शेषः । 'ताः क्षीरपरिणामिनीः' इति विष्णुपुराणम् । दुह् धातोः 'दुहियाचि०' इत्यादिना द्विकर्मकत्वम् । दुहेः स्वरितञ्ञेऽपि अकर्त्रभिप्रायविवक्षायां परस्मैपदम् । प्रधानकर्मणि 'रत्नानि' इत्यत्र 'महौषधीश्च' इत्यत्र च 'कर्तुरीप्सिततमं कर्म' १ । ४ । ४९ इति कर्मसञ्ज्ञा, ततः 'कर्मणि द्वितीया' इति द्वितीया । दुदुहुरित्यत्र णिजर्थाऽन्तर्भूतो ज्ञेयः, अन्यथा सुमेरौ दोग्धृत्वनिर्देशोऽनुपपन्नः स्यात् । हिमालयस्य वत्सत्वनिर्देशात् । पृथिव्याः पशुरूपधारणं पुरावृत्तप्रख्यातम् । पूर्वस्मिन्काले पृथुर्नाम नरपतिः बुभुक्षापीडितानां प्रजानां भोजनसिद्ध्यर्थं धेनुरूपिणीं पृथिवीं प्रजाभिः स्वेप्सितमर्थं दोहयामास इति भागवतप्रसिद्धा कथाऽनेन वाक्येनोच्यते । अत्र हिमालयस्य वत्सत्वनिर्देशात् पृथ्वीसारभूतरत्नादिप्राहित्वमस्य गम्यते । 'तर्णकनिपीतशेषं दोहका उपयुञ्जत' इति न्यायात् । अतो हिमालयस्य स्वजातिश्रेष्ठत्वमनेन श्लोकेन प्रतिपाद्यते । तथा चोक्तम्—

सर्वे स्वमुखवत्सेन स्वे स्वे पात्रे पृथक् पयः । सर्वकामदुघां पृथ्वीं दुदुहुः पृथुभाविताः'॥
(श्री० भा० ४-१८-२१)

अत्र हिमालयवर्णनस्य प्रकरणोपस्थितत्वात् हिमालयगतौषधिरत्नानां द्वयानामपि प्रकरणोपस्थितत्वात् तेषां दोहनक्रियारूपतुल्यधर्मसम्बन्धात् (औपम्यस्य व्यङ्ग्यत्वात्) केवलप्राकरणिकविषयस्तुल्ययोगितानामाऽलङ्कारः। तल्लक्षणंयथासाहित्यदर्पणे—

'पदार्थानां प्रस्तुतानामन्येषां वा यदा भवेत्।
एकधर्माऽभिसम्बन्धः स्यात्तदा तुल्ययोगिता' ॥ इति ॥

अन्येषाम् = अप्रस्तुतानाम्, धर्मः = गुणक्रियास्वरूपः।

भावार्थः—पुरा किल राजा पृथुः क्षुत्क्षामदेहानां प्रजानां हिताय गोरूपां पृथिवीं तानि तानि रत्नानि समदूदुहत्। तत्र च तेषु वर्गेषु यथोचितं महान्तो दोग्धारः श्रेष्ठाः वत्साश्च परिकल्पिता आसन्। तदनुसारेण सर्वे पर्वताः सुमेरुपर्वतं दोग्धारं कृत्वा हिमालयं च वत्सं परिकल्प्य पृथुराजस्याज्ञया पृथिवीं मरकतपद्मरागमौक्तिकप्रभृतीन् मणीन् मृतसञ्जीविनीप्रभृतीः ओषधीश्च दोहयामासुरिति भावः।

ननु हिमदूषितस्य हिमालयस्याऽत्यन्तमनभिगम्यत्वात्सकलमपि सौभाग्यं विफलतोपेतमित्याशङ्क्य स्वयमेव समाधत्ते—

अनन्तरत्नप्रभवस्य यस्य, हिमं न सौभाग्यविलोपि जातम्।
एको हि दोषो गुणसन्निपाते, निमज्जतीन्दोः किरणेष्विवाङ्कः ॥ ३ ॥

अन्वयः- अनन्तरत्नप्रभवस्य यस्य हिमं सौभाग्यविलोपि न जातम्। हि एको दोषो गुणसन्निपाते इन्दोः किरणेषु अङ्क इव निमज्जति।

व्याख्या—अनन्तरत्नप्रभवस्य=अपरिमितोत्तमवस्तूत्पत्तिस्थानस्य, यस्य=हिमालयस्य, हिमं=तुषारं (कर्तृपदमेतत्), सौभाग्यविलोपि=सौन्दर्यविनाशकं, न जातम्=न अभूत् हि=यस्मात् कारणात्, एकः=एकाकी, दोषः दूषणम्, गुणसन्निपाते=गुणसमूहे, इन्दोः=चन्द्रमसः, किरणेषु=रश्मिषु, अङ्क इव=कलङ्क इव, निमज्जति=न्यग्भवति, तिरस्कृतो भवतीत्यर्थः। अन्तर्लीयत इति यावत्।

व्युत्पत्तिः— अनन्तरत्नप्रभवस्य=अविद्यमानः अन्तः येषां तानि अनन्तानि अपरिमितानि 'नञोऽस्त्यर्थानां वाच्यो वा चोत्तरपदलोपः' इति बहुव्रीहिः, अनन्तानि च तानि रत्नानि, अनन्तरत्नानि 'विशेषणं विशेष्येण बहुलम्' इति कर्मधारयः, प्रभ-

वति अस्मादिति व्युत्पत्त्या प्रोपसर्गपूर्वकाद् भूधातोः 'ऋदोरप्' इति अप्प्रत्ययेन प्रभवः सिद्ध्यति। अनन्तरत्नानां प्रभवः, अनन्तरत्नप्रभवः 'षष्ठी' इति षष्ठीतत्पुरुषः। तस्य अनन्तरत्नप्रभवस्य। अत्र रत्नशब्दः स्वजातिश्रेष्ठवाची। 'रत्नं स्वजातिश्रेष्ठेऽपि' इत्यमरः। उमाख्यस्य कन्यारत्नस्य, वैदूर्यादीनां मणिरत्नानां, देवदारुप्रभृतीनां वृक्षरत्नानां, मृतसञ्जीवनीप्रभृतीनाम् ओषधिरत्नानां, गङ्गादीनां सरिद्रत्नानां, सोमलताप्रभृतीनां यज्ञद्रव्यरत्नानां च प्रभवस्य जन्मकारणभूतस्येत्यर्थः। सौभाग्यविलोपि=सुभगस्य भावः सौभाग्यं 'गुणवचनब्राह्मणादिभ्यः कर्मणि च' इति ष्यञ्। 'हृन्नगसिन्ध्वन्ते पूर्वपदस्य च' इत्युभयपदवृद्धिः। सौभाग्यं विलुम्पति तच्छील इति सौभाग्यविलोपि 'सुप्यजातौ णिनिस्ताच्छील्ये' इति णिनिः। जातम्=जनीधातोः कर्त्तरि क्तः। गुणसन्निपाते=गुणानां सन्निपातो गुणसन्निपातस्तस्मिन्। इन्दोः= 'हिमांशुश्चन्द्रमाश्चन्द्र इन्दुः कुमुदबान्धवः' इत्यमरः। अङ्क:='कलाङ्काङ्कौ लाञ्छनं च' इत्यमरः। अल्पो दोषो गुणसमूहं न पराजयते, किन्तु तैरेव दोषस्य पराभवः। अत्रोपमा-इन्दोः किरणेषु अङ्क इवेति। अथोपमाऽनुप्राणितोऽर्थान्तरन्यासालङ्कारः। उत्तरार्धगतसमान्यवाक्येन पूर्वार्द्धगतविशेषवाक्यस्य समर्थनात्। तल्लक्षणं चोक्तं साहित्यदर्पणे—

'सामान्यं वा विशेषेण विशेषस्तेन वा यदि। कार्यं च कारणेनेदं कार्येण च समर्थ्यते॥
साधर्म्येणेतरेणार्थान्तरन्यासोऽष्टधा ततः'। इति।

वस्तुतस्तु विकस्वरालङ्कार एव। यत्र कस्यचिद्विशेषस्य समर्थनार्थं सामान्यं विन्यस्य तत्प्रसिद्धावप्यपरितुष्यता कविना तत्समर्थनाय पुनर्विशेषणान्तरमुपमारीत्याऽर्थान्तरन्यासविधया वा विन्यस्यते, तत्र विकस्वरालङ्कारः तल्लक्षणं च—

'यस्मिन् विशेषसामान्यविशेषाः स विकस्वरः'। इति।

भावार्थः—जगत्सुन्दरस्य चन्द्रमसः किरणेषु कलङ्क इव नानारत्नोत्पादकस्य हिमालयस्य हिमजाड्यं सौन्दर्यध्वंसकं न भवति, बहूनां गुणानां समुदाये पतितोऽप्येको दोषस्तिरस्कृतः सन् न विभाव्यत इति भावः।

अथ शृङ्गाराङ्गभूताङ्गरागास्पदत्वेनाप्यस्य सर्वपर्वतोत्कर्षत्वमाह—

यश्चाऽप्सरोविभ्रममण्डनानां, सम्पादयित्रीं शिखरैर्बिभर्त्ति।
बलाहकच्छेदविभक्तरागामकालसन्ध्यामिव धातुमत्ताम् ॥ ४ ॥

अन्वयः—यः अप्सरोविभ्रममण्डनानां सम्पादयित्रीं बलाहकच्छेदविभक्तरागां धातुमत्ताम् अकालसन्ध्यामिव शिखरैर्बिभर्ति।

व्याख्या-यः=हिमालयः, अप्सरोविभ्रममण्डनानाम्=स्वर्वेश्याविलासालङ्करणानां, यद्वा स्वर्वेश्याविपरीतन्यासालङ्करणानाम् । सम्पादयित्रीं=कर्त्रीम्, बलाहकच्छेदविभक्तरागां=मेघखण्डसंक्रमितरागाम्, धातुमत्तां=सिन्दूरगैरिकादिधातुयुक्तनाम्, अकालसन्ध्यामिव=अनियतसमयप्राप्तसन्ध्यामिव, शिखरैः=कूटैः, बिभर्त्ति=धारयति ।

व्युत्पत्तिः—अप्सरोविभ्रममण्डनानाम्=अप्सु सरन्तीति अप्सरसः । 'स्त्रियां बहुष्वप्सरसः स्वर्वेश्या उर्वशीमुखाः' इत्यमराऽनुशासनाद्बहुवचनान्तः अप्सरः शब्दः । क्वचित्त्वस्य एकवचनान्तोऽपि प्रयोगो दृश्यते, यथा कालीदासकृतविक्रमोर्वश्यां—'ततः प्रविशत्यपटाक्षेपेण अप्सराः' इति । अप्सरसां विभ्रमः, विलासो विपरीतन्यासो वा, यथोक्तं साहित्यदर्पणे—

'त्वरया हर्षरागादेर्दयितागमनादिषु ।
अस्थाने भूषणादीनां विन्यासो विभ्रमो मतः' ॥ इति ।

अप्सरोविभ्रमेण मण्डनानि अप्सरोविभ्रममण्डनानि, तेषां । हिमालयः सिन्दूरादिभिर्धातुभिः अप्सरोविलासभूषणं साधयतीतिभावः । यद्वा हिमालयगतसिन्दूरगैरिकादिरक्तिमादर्शिन्यः अप्सरसः सायङ्कालागमनभ्रान्त्या अलङ्करणार्थं त्वरां कुर्वन्तीति भावः । तथात्वे सति भ्रान्तिमदलङ्कारो व्यज्यते (न तु अभिधीयते=अभिधावृत्त्या प्रतिपाद्यते) । अप्सरोविभ्रममण्डनानाम् इत्यत्र 'कर्तृकर्मणोः कृति' इति कर्मणि षष्ठी । सम्पादयित्रीं=सम्पादयतीति सम्पादयित्री, ताम्, समुपसर्गपूर्वात् णिजन्तात्पद्धातोः 'ण्वुल्तृचौ' इति तृचि 'ऋन्नेभ्यो ङीप्' इति ङीप् । बलाहकच्छेदविभक्तरागाम्=वारीणां वाहका बलाहकाः 'पृषोदरादानि यथोपदिष्टम्' इति साधुत्वम् । बलाहकानां छेदाः=बलाहकच्छेदाः, तेषु विभक्तः, बलाहकच्छेदविभक्तः रागः यया सा बलाहकच्छेदविभक्तरागा, ताम्, 'अनेकमन्यपदार्थे' इति बहुव्रीहिः । इदं विशेषणद्वयं सन्ध्यायामपि निवेशनीयम् । धातुमत्ताम्=धातवः सन्ति यस्य स धातुमान्, 'तदस्यास्यस्मिन्निति मतुप्' इति नित्ययोगे मतुप् । धातुमतो भावः धातुमत्ता ताम् । 'तस्य भावस्त्वतलौ' इति तल् । धातुमत्तामित्यत्र मत्तारूपे पदांशे निहतार्थाऽभिधानो दोषः तद्दोषलक्षणञ्च उभयार्थस्य शब्दस्य (शब्दैकदेशस्य वा) अप्रसिद्धेऽर्थे प्रयोगः । यथाऽत्र मत्ताशब्दस्य मतुबन्तात्तल् प्रत्यये सत्यपि कामुकार्थे निहतार्थत्वम् । अकालसन्ध्यामिव=न कालः अकालः 'नञ्' इति समासे 'नलोपो नञः' इति नञो लोपः । अकाले सन्ध्या इति अकालसन्ध्या, ताम् । 'सप्तमी शौण्डैः' इति सूत्रस्य योगविभागस्वीकाराऽभावपक्षे 'सह सुपा' इति वा समासः । शिखरैः='कूटोऽस्त्री शिखरं शृङ्गम्' इत्यमरः । अत्र सन्ध्याशब्दस्य जातिवाचित्वाज्जात्युत्प्रेक्षा । तल्लक्षणं यथा—

'भवेत्सम्भावनोत्प्रेक्षा प्रकृतस्य परात्मना ।
वाच्या प्रतीयमाना सा प्रथमं द्विविधा मता ॥

वाच्येवादिप्रयोगे स्यादप्रयोगे परा पुनः ।
जातिर्गुणः क्रिया द्रव्यं यदुत्प्रेक्ष्यं द्वयोरपि' ॥ इत्यादि ।

भावार्थः—हिमालयो देवाङ्गनानां विलासेन क्रियमाणानामलङ्काराणां सम्पादयित्रीं मेघशकलेषु संक्रमितरागां धातुसम्पदां सूर्यास्तमयकालव्यतिरिक्तकालसम्भवां सन्ध्यामिव शिखरैर्दधातीति भावः ।

हिमालयस्य सर्वकालरमणीयत्वमाह—

आमेखलं सञ्चरतां घनानां, छायामधःसानुगतां निषेव्य ।
उद्वेजिता वृष्टिभिराश्रयन्ते, शृङ्गाणि यस्यातपवन्ति सिद्धाः ॥ ५ ॥

अन्वयः—सिद्धाः आमेखलं सञ्चरतां घनानामधःसानुगतां छायां निषेव्य वृष्टिभिः उद्वेजिताः (सन्तः) यस्य आतपवन्ति शृङ्गाणि आश्रयन्ते ।

व्याख्या—सिद्धाः=विश्वस्वादिदेवयोनिविशेषाः । आमेखलम्=नितम्बपर्यन्तम्, सञ्चरतां=सञ्चरणं कुर्वताम्, घनानां=मेघानाम्, अधःसानुगताम्=अधःप्रस्थप्राप्तां, छायाम्=अनातपम्, निषेव्य=नितराम् (उष्णबाधानिवर्तनपर्यन्तम्) सेवित्वा । वृष्टिभिः=वर्षणैः, उद्वेजिताः=पीडिताः (सन्तः), यस्य=हिमालयस्य, आतपवन्ति=आतपयुक्तानि, शृङ्गाणि=शिखराणि, आश्रयन्ते=सेवन्ते ।

व्युत्पत्तिः—सिद्धाः='पिशाचो गुह्यकः सिद्धो भूतोऽमी देवयोनयः' इत्यमरः । आमेखलम्=मेखलाभ्यः आ, आमेखलम्, 'आङ् मर्यादाऽभिविध्योः' इत्यव्ययीभावः । 'प्रथमानिर्दिष्टं समास उपसर्जनम्' इत्याङः उपसर्जनसंज्ञा, अतस्तस्य 'उपसर्जनं पूर्वम्' इति पूर्वप्रयोगः । 'मेखलाखण्डबन्धे स्यात्काञ्ची शैलनितम्बयोः' इति विश्वः । सञ्चरतां=सञ्चरन्तीति सञ्चरन्तस्तेषाम्, समुपसर्गपूर्वकाच्चर्धातोः 'लटः शतृशानचावप्रथमासमानाधिकरणे' इति शतृप्रत्ययः । अधःसानुगताम्=अधः स्थितानि सानूनि अधःसानूनि 'शाकपार्थिवादीनां सिद्धय उत्तरपदलोपस्योपसंख्यानम्' इति मध्यलोपी समासः, अधःसानूनि गता अधःसानुगता ताम् । 'द्वितीया श्रितातीतपतितगताऽत्यस्तप्राप्तापन्नैः' इति द्वितीयातत्पुरुषः । छायाम्='छाया सूर्यप्रिया कान्तिः प्रतिबिम्बमनातप' इत्यमरः । वृष्टिभिः=वर्षणं वृष्टिः 'स्त्रियां क्तिन्' इति भावे क्तिन् । 'वृष्टिर्वर्षम्' इत्यमरः । आतपवन्ति=आतपोऽस्ति येषां तानि आतपवन्ति, तानि (द्वितीयान्तम्) । 'तदस्यास्त्यस्मिन्निति मतुप्'

इति मतुप् । श्लोकेनाऽनेन मेघमण्डलादप्यधिकमस्य औन्नत्यं ज्ञायते । अत्र काव्यलिङ्गमलङ्कारः । 'वृष्टिभिरुद्वेजिता' इति पदद्वयस्य 'आतपवन्ति' इति पदस्य च श्रद्धाश्रयणे कारणत्वेनोपादानात् । काव्यलिङ्गलक्षणं च साहित्यदर्पणे उक्तम्—

'हेतोर्वाक्यपदार्थत्वे काव्यलिङ्गमुदाहृतम्' । इति ।

भावार्थः—हिमवच्छिखरेषु वर्तमाना विश्वावसुप्रभृतयो देवयोनिविशेषाः सिद्धाः, पूर्वमातपोद्वेजिताः सन्तः, किञ्चित्कालमधोवर्तिनो भूत्वा, मध्यसानुप्रदेशे सञ्चरतां मेघानां छायामातपबाधानिवर्तनपर्यन्तं सेवित्वा, ततो वृष्टिभिः शीतबाधायां जायमानायां, पुनश्चातपवन्त हिमवच्छिखरप्रदेशमेवाश्रयन्त इति भावः ।

सत्स्वपि सर्वेषु रत्नेषु हिमालये गजमुक्तानां प्राचुर्यमाह—

पदं तुषारस्रुतिधौतरक्तं, यस्मिन्नदृष्ट्वाऽपि हतद्विपानाम् ।
विदन्ति मार्गं नखरन्ध्रमुक्तैर्मुक्ताफलैः केसरिणां किराताः ॥ ६ ॥

अन्वयः—यस्मिन्किराताः तुषारस्रुतिधौतरक्तं हतद्विपानां केसरिणां पदमदृष्ट्वाऽपि नखरन्ध्रमुक्तैर्मुक्ताफलैः मार्गं विदन्ति ।

व्याख्या—यस्मिन् = हिमालये, किराताः=शबराः, तुषारस्रुतिधौतरक्तं=हिमस्रवणप्रक्षालितरुधिरं, हतद्विपानां = मारितगजानां, केसरिणां=सिंहानाम्, पदं=पादप्रक्षेपस्थानम्, अदृष्ट्वाऽपि = अनवलोक्यापि, नखरन्ध्रमुक्तैः = नखरच्छिद्रस्खलितैः, मुक्ताफलैः = गजमौक्तिकैः, मार्गं = पन्थानं, विदन्ति = जानन्ति ।

गजेन्द्रेभ्योऽपि मुक्तानामुत्पत्तिरुक्ताऽगस्त्येन—

'द्विपेन्द्रजीमूतवराहशङ्खमत्स्याहिशुक्त्युद्भववेणुजानि ।
मुक्ताफलानि प्रथितानि लोके तेषां तु शुक्त्युद्भवमेव भूरि' ॥ इति ।

व्युत्पत्तिः - किराताः = किरम् अरण्यस्य पर्यन्तदेशम्, अतन्ति (अत सातत्यगमने) नैरन्तर्येण गच्छन्ति इति किराताः । 'भेदाः किरातशबरपुलिन्दा म्लेच्छजातयः' इत्यमरः । तुषारस्रुतिधौतरक्तं = स्रवणं स्रुतिः, स्रुधातोः 'स्त्रियां क्तिन्' इति भावे क्तिन्प्रत्ययः । 'तुषारः शीतलः शीतो हिमः सप्ताऽन्यलिङ्गकाः' इत्यमरः । तुषाराणां स्रुतयः तुषारस्रुतयः, तुषारस्रुतिभिर्धौतं तुषारस्रुतिधौतं, 'तृतीया तत्कृताऽर्थेन गुणवचनेन' अत्र 'तृतीयेति योगविभागात्तृतीयातत्पुरुषः । तुषारस्रुतिधौतं रक्तं यस्त तत् तुषारस्रुतिधौतरक्तं तत् । अतो दुर्विज्ञेयमिति भावः । हतद्विपानां =

द्वाभ्यां पिबन्तीति द्विपाः 'सुपि स्थः' इत्यत्र सुपीति योगविभागात् द्वयुपपदपानार्थकपाधातोः कप्रत्यये 'आतो लोप इटि च' इति सूत्रेण आलोपे च कृते सति द्विपपदसिद्धिः । हता द्विपा यैस्ते हतद्विपास्तेषाम् । केसराः=सिंहस्कन्धप्रदेशस्थानि रोमाणि, सन्ति येषां ते केसरिणः, तेषाम् , 'अत इनिठनौ' इति केसरशब्दान्नित्ययोगे इनि प्रत्ययः । पदम् = 'पदमङ्घ्रौ' इत्यारभ्य 'चिह्नेऽङ्घ्रिविन्यासे' इति केशवः । अदृष्ट्वा = न दृष्ट्वा अदृष्ट्वा, न चाऽत्र ल्यपा भाव्यमिति शङ्कयम् , 'समासेऽनञ्पूर्वे क्त्वो ल्यप्' इत्यत्र 'अनञ्पूर्वे' इत्युक्तेः । नखरन्ध्रमुक्तः = नखानां रन्ध्राणि नखरन्ध्राणि 'नखोऽस्त्री नखरोऽस्त्रियाम्' 'छिद्रं निर्व्यथनं रोकं रन्ध्रं श्वभ्रं वपा शुषिः' इत्युभयत्राऽप्यमरः । नखरन्ध्रेभ्यो मुक्तानि नखरन्ध्रमुक्तानि, तैः । 'नखरन्ध्रेभ्य' इत्यत्र 'ध्रुवमपायेऽपादानम्' इत्यपादानसंज्ञा, 'अपादाने पञ्चमी' इति पञ्चमी, ततः 'पञ्चमी भयेन' इत्यत्र 'पञ्चमी'ति योगविभागाद्योगविभागस्वीकाराऽभावपक्षे 'सह सुपा' इति समासः । न चाऽत्र 'अपेताऽपोढमुक्तपतितापन्नस्तैरल्पशः' इति सूत्रेण समास इति शङ्कनीयं, तत्र 'अल्पश' इत्युपादानसामर्थ्यात् तत्रोदाहृतेभ्योऽन्यत्र अस्य निरवकाशत्वात् । मुक्ताफलैः = मुक्ता एव फलानि मुक्ताफलानि तैः 'मयूरव्यंसकादयश्च' इत्यत्र मयूरव्यंसकादेराकृतिगणत्वात् रूपकसमासः । अत्रोदात्तमलङ्कारः । दर्शनसमय एवादाय रक्षितव्यानां मौक्तिकानां सिंहमार्गप्रदर्शनोपक्षीणत्वप्रतिपादनेन मुक्तासम्पदामुपादानात् । तल्लक्षणं यथा—

'लोकातिशयसम्पत्तिवर्णनोदात्तमुच्यते' । इति ।

भावार्थः—सर्वेषु हि पर्वतेषु हतगजानां सिंहानां शोणितास्कान् पादप्रतिबिम्बानवलोक्य किराताः सिंहाननुगच्छन्ति, हिमालये पुनः शोणितानां निरन्तरस्रुतहिमजलसंक्षालितत्वात् तादृशान् पदविन्यासानवलोक्य तदनुगन्तुमसमर्था अपि कुटिलेषु सरन्ध्रेषु नखेषु गजमस्तकेभ्यो लग्नानां मुक्ताफलानां पदविन्यासवशात् क्रमेण गलितत्वात् तान्येवावलोक्य किराताः सिंहानां मार्गमनुगच्छन्तीति भावः ।

अथ शृङ्गाराङ्गभूतपदार्थसमृद्धिरस्मिन् पर्वते चतुर्भिः श्लोकैरुपवर्ण्यते । तत्रादौ प्रियतमानयनादौ यदुपकरणं, तस्य समृद्धिमाह—

न्यस्ताक्षरा धातुरसेन यत्र, भूर्जत्वचः कुञ्जरबिन्दुशोणाः ।
व्रजन्ति विद्याधरसुन्दरीणामनङ्गलेखक्रिययोपयोगम् ॥ ७ ॥

गज बिन्दु-सम जो धातु रस से रक्त भूर्ज लिखे गये ।
गिरि-सुन्दरी-गण के लिये वे प्रेम पत्र बने नये ॥ ७ ॥

अन्वयः – यत्र धातुरसेन न्यस्ताक्षराः कुञ्जरबिन्दुशोणाः भूर्जत्वचः विद्याधरसुन्दरीणाम् अनङ्गलेखक्रियया उपयोगं व्रजन्ति ।

व्याख्या—यत्र = यस्मिन् हिमाद्रौ, धातुरसेन = सिन्दूरादिद्रवेण, न्यस्ताक्षराः= लिखितवर्णाः, कुञ्जरबिन्दुशोणाः=हस्तिबिन्दुलोहिताः, भूर्जत्वचः=भूर्जपत्रवल्कलानि विद्याधरसुन्दरीणाम् = विद्याधराङ्गनानाम् , अनङ्गलेखक्रियया=कामलेखकृत्या, उपयोगम् = अङ्गभावं, व्रजन्ति = गच्छन्ति ।

व्युत्पत्तिः— यत्र = यस्मिन् इति विभक्त्यर्थे यच्छब्दात् 'सप्तम्यास्त्रल्' इति त्रल् । धातुरसेन = धातूनां रसो धातुरसस्तेन । 'शृङ्गारादौ विषे वीर्ये गुणे रागे द्रवे रसः' इत्यमरः । न्यस्ताक्षराः = न्यस्तानि अक्षराणि यासु ता न्यस्ताक्षराः । कुञ्जरबिन्दुशोणाः = कुञ्जराणां (शरीरे) बिन्दवः इति कुञ्जरबिन्दवः । 'मत्तङ्गजो गजो नागः कुञ्जरो वारणः करी' 'पङ्क बिन्दुजालकम्' इत्युभयत्राऽप्यमरः । कुञ्जशब्दात् 'खमुखकुञ्जादिभ्य उपसंख्यानम्' इति रप्रत्ययः । कुञ्जरबिन्दव इव शोणाः इति कुञ्जरबिन्दुशोणाः 'उपमानानि सामान्यवचनैः' इति समासः । 'रोहितो लोहितो रक्तः शोणः कोकनदच्छविः' इत्यमरः । कुञ्जरबिन्दुशोणाश्च लिखिताऽवयवेष्विति शेषः । भूर्जत्वचः = भूर्जानां त्वचः, भूर्जत्वचः, 'भूर्जपत्रो भुजो भूर्जो मृदुत्वक् चार्मिका अपि' इति यादवः । विद्याधरसुन्दरीणाम् = विदन्ति आभिः इति विद्याः, ज्ञानार्थकविद्धातोः 'संज्ञायां समजनिषदनिपतमनविदषुञ्शीङ्भृञिणः' इति क्यप् । धरन्ति ते धराः धारणार्थकधृधातोः 'नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः' इति अचि, विद्यानां धरा इति विद्याधराः इत्थं षष्ठीतत्पुरुषः । विद्याधराणां सुन्दर्यो विद्याधरसुन्दर्यस्तासाम् । अनङ्गलेखक्रियया = अविद्यमानम् अङ्गं यस्य सः अनङ्गः कामः, लिख्यन्ते येषु ते लेखाः = पत्रिकाः अनङ्गस्य लेखाः अनङ्गलेखाः, क्रियते या सा क्रिया 'डुकृञ् करणे' इत्यस्माद्धातोः 'कृञः श च' इति शप्रत्ययः । अनङ्गलेखानां क्रिया अनङ्गलेखक्रिया, तया । दिव्याङ्गना अप्यत्र विहारं कुर्वन्तीत्यनेन श्लोकेनाऽभिधीयते, तेनास्य महिमा गम्यते ।

भावार्थः—हिमालये विद्याधरसुन्दर्यः प्रियतमाह्वानादौ गजबिन्दुरक्तासु भूर्जत्वक्षु धातुद्रवेण स्वकीयसन्देशमयान्यक्षराणि विलिख्य कामुकेभ्यः प्रयच्छन्तीति भावः ।

उद्दीपनसद्भावमप्याह—

यः पूरयन्कीचकरन्ध्रभागान्दरीमुखोत्थेन समीरणेन ।
उद्गास्यतामिच्छति किन्नराणां तानप्रदायित्वमिवोपगन्तुम् ॥ ८ ॥

अन्वयः—यः दरीमुखोत्थेन समीरणेन कीचकरन्ध्रभागान् पूरयन् उद्गास्यतां किन्नराणां तानप्रदायित्वम् उपगन्तुम् इच्छति इव।

व्याख्या—यः = हिमालयः, दरीमुखोत्थेन = गुहाऽऽननोत्पन्नेन, समीरणेन=वायुना, कीचकरन्ध्रभागान् = कीचकाख्यवेणुविशेषच्छिद्रप्रदेशान्, पूरयन् = वादयन् इत्यर्थः, उद्गास्यताम्=उच्चैः (गान्धारग्रामेण) गानं करिष्यताम्, किन्नराणां=किंपुरुषाणाम्, तानप्रदायित्वं = अंशस्वरप्रदातृत्वम्, उपगन्तुम् प्राप्तुम्, इच्छति इव= कामयते इव।

व्युत्पत्तिः— दरीमुखोत्थेन = दरी एव मुखं दरीमुखं 'दरी तु कन्दरो वाऽस्त्री देवखातबिले गुहा' इत्यमरः, 'मयूरव्यंसकादयश्च' इति समासः। दरीमुखादुत्तिष्ठतीति दरीमुखोत्थः तेन 'आतश्चोपसर्गे ३।१।१३६' इति कर्तरि क[illegible]। 'उदः स्थास्तम्भोः पूर्वस्य' इति पूर्वसवर्णः। 'समीरमारुतमरुज्जगत्प्राणसमीरणाः' इत्यमरः। कीचकरन्ध्राणि = 'कीचका वेणवस्ते स्युर्ये स्वनन्त्यनिलोद्धताः' इत्यमरः। कीचकरन्ध्राणां भागाः=कीचकरन्ध्रभागास्तान्, 'भागः प्रदेशे शकले भागधेये च कथ्यते' इति भोजः। उद्गास्यताम् = उत् (उच्चैः) गास्यन्तीति उद्गास्यन्तस्तेषाम् 'लृटः सद्वा ३।३।१४' इति लृटः शत्रादेशः। उद्गास्यताम् = देवयोनित्वाद्गान्धाराख्यग्रामेण गीतं करिष्यताम्। यथोक्तं नारदेन—

'षड्जमध्यमनामानौ ग्रामौ गायन्ति मानवाः।
न तु गान्धारनामानं स लभ्यो देवयोनिभिः॥ इति।

किन्नराणाम्=कुत्सिताः (केषांचिदश्वमुखत्वात् केषांचिच्च अश्वशरीरत्वात्) नराः किन्नराः 'कुगतिप्रादयः' इति समासः। 'किमः क्षेपे' इति समासान्तप्रतिषेधः। तानप्रदायित्वम् = तानो नाम अंशस्वराऽपरपर्याय उद्गातव्यस्य स्वरादेरियतापरिच्छेदः। यथाऽऽचार्याभिनवगुप्ताः—

'द्विकत्रिकचतुष्काः स्युर्ज्ञेया वंशगता स्वराः।
अधोऽधस्तारतां प्राप्तस्तानस्त्वंशस्वरो मतः'॥ इति।

अंशस्वरलक्षणे भरतमुनिः—

'रागो यस्मिन्निवसति यस्माच्चाऽपि प्रवर्तते।
नेता च तारमन्द्राणां योऽस्यर्थं चोपलभ्यते॥
ग्राहोपन्यासविन्याससन्यासन्यासगोचरः।
अनुवृत्तश्च यश्चेह सोंऽशः स्याद्दशलक्षणः'॥ इति।

तानं प्रदातुं शीलं यस्य स तानप्रदायी 'सुप्यजातौ णिनिस्ताच्छील्ये' इति तानप्रोपपदात् दाधातोर्णिनिप्रत्ययः। तानप्रदायिनां भावस्तानप्रदायित्वं तत् 'तस्य भावस्त्वतलौ' इति भावार्थे त्वप्रत्ययः। 'स्वान्तं क्लीबम्' इत्यनुशासनादस्य क्लीबत्वम्। अत्रोत्प्रेक्षाऽलङ्कारः। सा च दरीमुखोत्थेनेत्येकदेशविवर्तिरूपकोज्जीविता। मुखसाध्यत्वात्तानप्रदायित्वस्य। एकदेशविवर्तिरूपकलक्षणं यथा साहित्यदर्पणे—

'रूपकं रूपितारोपाद्विषये निरपह्नवे ।'''अङ्गिनो यदि साङ्गस्य रूपणं साङ्गमेव तत् ॥ समस्तवस्तुविषयमेकदेशविवर्ति च । यत्र कस्य चिदार्थत्वमेकदेशविवर्ति तत्' ॥ इति ।

भावार्थः—यथा केषुचित् गातुमारब्धेषु गानारम्भात्पूर्वं कश्चिन्मुखमारुतेन वेणुसुषिरं पूरयन् गेयानां स्वराणां तानप्रदानं करोति, तथाऽयमपि हिमालयः गुहामुखमारुतेन कीचकरन्ध्राणि पूरयन् गानं करिष्यतां देवगायकानां तानप्रदानं कर्तुमिच्छतीवेत्यर्थः ।

हिमवति सौरभ्यस्याप्यप्रयाससाध्यत्वमाह—

कपोलकण्डूः करिभिर्विनेतुं, विघट्टितानां सरलद्रुमाणाम् ।
यत्र स्रुतक्षीरतया प्रसूतः, सानूनि गन्धः सुरभीकरोति ॥ ६ ॥

अन्वयः—यत्र करिभिः कपोलकण्डूः विनेतुं विघट्टितानां सरलद्रुमाणां स्रुतक्षीरतया प्रसूतो गन्धः सानूनि सुरभीकरोति ।

व्याख्या—यत्र=यस्मिन् हिमालये, करिभिः=हस्तिभिः, कपोलकण्डूः=गण्डस्थलखर्जूः, विनेतुम्=अपनेतुम्, विघट्टितानां=घर्षितानां, सरलद्रुमाणां=देवदारुवृक्षाणां, स्रुतक्षीरतया=क्षरितदुग्धतया, प्रसूतः=उत्पन्नः, गन्धः=सौरभ्यम्, सानूनि=प्रस्थान्, सुरभीकरोति=सुगन्धीकरोति ।

व्युत्पत्तिः—करिभिः=करः (शुण्डादण्डः) अस्ति येषां ते इति करिणस्तैः, करशब्दात् 'अत इनिठनौ' इति नित्ययोगे इनिः । 'मतङ्गजो गजो नागः कुञ्जरो वारणः करी' इत्यमरः । कपोलकण्डूः=कपोलयोः कण्डूः इति कपोलकण्डूः, ताः । 'कण्डूः खर्जूश्च कण्डूया' इत्यमरः । विनेतुं=व्युपसर्गपूर्वकात् प्रापणार्थकणीधातोः 'तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम्' इति तुमुन् । विघट्टितानां=विशेषेण घटितानां विघट्टितानां 'सह सुपा' इति समासः । सानूनि='स्नुः प्रस्थः सानुरस्त्रियाम्' इत्यमरः । श्लोकेनाऽनेन हिमालयस्य हस्त्याकरत्वं व्यज्यते । तथा च गजायुर्वेदे—'हिमवद्विन्ध्यमलया गजानां प्रभवा नगाः' । इति ।

भावार्थः—अत्र हिमालये गजैः गण्डकण्डूतीः शमयितुं परिमृदितानां सरलद्रुमाणां गलितक्षीरतयोद्भूतः सुगन्धः सानुषु सौरभ्यरहितानपि पदार्थान् सुरभिलान् करोतीत्यर्थः ।

रतिप्रदीपानामप्यप्रयाससाध्यत्वमाह—

वनेचराणां वनितासखानां, दरीगृहोत्सङ्गनिषक्तभासः ।
भवन्ति यत्रौषधयो रजन्यामतैलपूराः सुरतप्रदीपाः ॥ १० ॥

अन्वयः—यत्र रजन्यां दरीगृहोत्सङ्गनिषक्तभासः ओषधयः वनितासखानां वनेचराणाम् अतैलपूराः सुरतप्रदीपाः भवन्ति ।

व्याख्या—यत्र = हिमालये, रजन्यां=रात्रौ, दरीगृहोत्सङ्गनिषक्तभासः=गुहाऽऽलयाऽभ्यन्तरसङ्क्रान्तकान्तयः, ओषधयः=तृणज्योतींषि, वनितासखानां=स्त्रीसहितानां, वनेचराणां = किरातानाम् , अतैलपूराः = तैलनिषेकाऽपेक्षारहिताः, सुरतप्रदीपाः = निधुवनदीपाः, भवन्ति = सन्ति ।

व्युत्पत्तिः—रजन्यां = 'विभावरीतमस्विन्यौ रजनी यामिनी तमी' इत्यमरः । 'भास्छविद्युतिदीप्तयः' इत्यप्यमरः । दरीगृहोत्सङ्गनिषक्तभासः=दर्य एव गृहाः दरीगृहाः । 'गृहाः पुंसि च भूम्न्येव निकाय्यनिलयालयाः' इत्यमरः । दरीगृहोत्सङ्गेषु निषक्ता दरीगृहोत्सङ्गनिषक्ताः, दरीगृहोत्सङ्गनिषक्ता भासो यासां ता दरीगृहोत्सङ्गनिषक्तभासः । 'अग्नौ ओषधीषु च तेजो निधाय रविरस्तं याति' इत्यागमः । वनितासखानां=वनितानां सखायः वनितासखाः 'राजाऽहःसखिभ्यष्टच्' इति समासान्तष्टच् । 'प्रतीपदर्शिनी वामा वनिता महिला तथा' इत्यमरः । वनेचराणाम्=वने चरन्तीति वनेचराः 'चरेष्टः' इति टप्रत्ययः । 'तत्पुरुषे कृति बहुलम्' इत्यलुक् । 'भेदाः किरातशबरपुलिन्दाम्लेच्छजातयः' इत्यमरः । अतैलपूराः=तैलेन पूर्यन्त इति तैलपूराः,न तैलपूरा अतैलपूराः । सुरतप्रदीपाः=सुष्ठु रतं रमणं (भावे क्तः) यस्मिन् कर्मणि तत् सुरतं मैथुनम् , 'व्यवायो ग्राम्यधर्मो मैथुनं निधुवनं रतम्' इत्यमरः । ननु रतमित्येतावतैव मैथुनकर्मणः बोधोदयात् सुपदोपादानमनर्थकमिति चेन्न, रतमित्यस्य रमणसाधारणोऽर्थो यौगिकः, तत्र सुपदसंयोजनेन मैथुनकर्मरूपविशेषार्थबोधोदयात् । प्रकृष्टा दीपाः प्रदीपाः 'कुगतिप्रादयः' इति समासः, प्रकृष्टत्वं चाऽत्र अन्यदीपेभ्यः, तच्च तैलनिरपेक्षत्वात् । सुरते प्रदीपाः सुरतप्रदीपाः 'सप्तमी शौण्डैः' इत्यनेन शौण्डादेराकृतिगणत्वात् सप्तमीति योगविभागाद्वा, योगविभागास्वीकारे 'सह सुपा' इति समासः ।

अत्र ओषधीषु आरोप्यमाणस्य प्रदीपत्वस्य प्रकरणोपात्तसुरतोपयोगित्वात्परिणामालङ्कारः, अतैलपूरत्वेनाधिकारूढवैशिष्ट्यञ्च । तदुक्तं साहित्यदर्पणे—

'विषयात्मतयारोप्ये प्रकृतार्थोपयोगिनी ।
परिणामो भवेत्तुल्यातुल्याधिकरणो द्विधा' ॥ इति ।

विश्वनाथेनाधिकारूढवैशिष्ट्यस्य परिणामालङ्कारस्येदमेवोदाहरणं प्रदत्तम् । वामनेन विशेषोक्तावुदाहृतमेतत् । काव्यप्रकाशकारमम्मटाचार्यमते तु रूपकालङ्कारोऽयं, तन्मते परिणामस्य रूपके एवान्तर्भावात् । महामहोपाध्यायकोलाचलमल्लिनाथस्तु—प्रदीपकारणतैलपूरणनिषेधात् कारणं विनापि कार्योत्पत्तिकथनात् विभावनालङ्कारः, सा च प्रदीपस्थानीयानामोषधीनामुक्तत्वादुक्तनिमित्ता च । तल्लक्षणं यथा साहित्यदर्पणे—

'विभावना विना हेतुं कार्योत्पत्तिर्यदुच्यते ।
उक्तानुक्तनिमित्तत्वाद् द्विधा सा परिकीर्तिता' ॥ इति ।

तथा च विभावनापरिणामालङ्कारयोः संसृष्टिरित्याह ।

भावार्थः—यत्र हिमालये रात्रौ जाज्वल्यमाना वृक्षविशेषा गुहागृहेषु प्रकाशमानाः सन्तः वनेचरदम्पतीनां तैलनिषेकनिरपेक्षाः सुरतोपयोगिनः प्रदीपाः भवन्तीत्यर्थः ।

इत्थमुपवर्णितानामुद्दीपनानां तदनुरूपवनिताजनसद्भावप्रतिपादनेन सोपयोगत्वमाह—

उद्वेजयत्यङ्गुलिपार्ष्णिभागान्, मार्गे शिलीभूतहिमेऽपि यत्र ।
न दुर्वहश्रोणिपयोधरार्त्ता भिन्दन्ति मन्दां गतिमश्वमुख्यः ॥ ११ ॥

अन्वयः—यत्र शिलीभूतहिमे अङ्गुलिपार्ष्णिभागान् उद्वेजयति अपि मार्गे श्रोणिपयोधरार्त्ता अश्वमुख्यः मन्दां गतिं न भिन्दन्ति ।

व्याख्या—यत्र हिमालये, शिलीभूतहिमे = घनीभूततुषारे, अत एव अङ्गुलिपार्ष्णिभागान् = चरणपाश्वात्यप्रदेशान्, उद्वेजयत्यपि = अतिक्लेशयत्यपि, मार्गे=पथि, दुर्वहश्रोणिपयोधरार्ताः = दुर्धरजघनस्थलस्तनपीडिताः, अश्वमुख्यः = किन्नरस्त्रियः, मन्दां = मन्थरां, गतिं = गमनं, न भिन्दन्ति=नाऽन्यथाकुर्वन्ति, न त्यजन्तीत्यर्थः ।

व्युत्पत्तिः—शिलीभूतहिमे = अशिलाः शिला यथा सम्पद्यन्ते तथा भूताः शिलीभूताः 'कृभ्वस्तियोगे सम्पद्यकर्त्तरि च्विः' इति च्विः । 'च्वौ च' इति दीर्घः । शिलासदृशं संघातेन काठिन्यमापन्ना इत्यर्थः । 'पाषाणप्रस्तरग्रावोपलाश्मानः शिला दृषत्' इत्यमरः । शिलीभूताः हिमा यस्मिन्स शिलीभूतहिमस्तस्मिन्, अङ्गुलिपार्ष्णिभागान्= अङ्गुलयश्च पार्ष्णी च अङ्गुलिपार्ष्णि 'चार्थे द्वन्द्वः' इति द्वन्द्वसमासः । 'द्वन्द्वश्च प्राणितूर्यसेनाङ्गानाम्' इति समाहारैकत्वम् । 'तद्ग्रन्थी घुटिके गुल्फौ पुमान्पार्ष्णिस्तयोरधः' इत्यमरः । अङ्गुलिपार्ष्णिनो भागाः प्रदेशाः अङ्गुलिपार्ष्णिभागास्तान् । उद्वेजयती उदुप-

सर्गपूर्वकस्य णिजन्तस्य विजीधातोः शत्रन्तं रूपमिदम् । मार्गः='अयनं वर्त्ममार्गाऽध्वपन्थानः पदवी सृतिः' इत्यमरः । दुर्वहश्रोणिपयोधरार्त्ताः=दुःखेन वोढुं शक्यं दुर्वहं, दुरुपसर्गपूर्वकात् वह् धातोः 'ईषदुःसुषु कृच्छ्राकृच्छ्रार्थेषु खल्' इति खल् । धरन्ति ते धराः 'पचाद्यच्' पयसां धराः पयोधराः । श्रोणयश्च पयोधराश्च श्रोणिपयोधरम् 'चार्थे द्वन्द्वः' इति द्वन्द्वः, 'द्वन्द्वश्च प्राणितूर्यसेनाङ्गानाम्' इति प्राण्यङ्गत्वादेकत्वम् । दुर्वहं च तत् श्रोणिपयोधरं दुर्वहश्रोणिपयोधरम् तेन आर्ताः, दुर्वहश्रोणिपयोधरार्ताः ।

भावार्थः—हिमवति किन्नराङ्गनाहिमशैत्यदुःखेनाङ्गुलिपार्ष्णिभागेषु पीडिताः सत्योऽपि नितम्बस्तनदुर्वहत्वखेदेन स्वाभाविकीं मन्दां गतिं न त्यजन्तीति भावः ।

आश्रितवात्सल्यमप्याह—

दिवाकराद्रक्षति यो गुहासु लीनं दिवाभीतमिवाऽन्धकारम् ।
क्षुद्रेऽपि नूनं शरणं प्रपन्ने ममत्वमुच्चैःशिरसां सतीव ॥ १२ ॥

अन्वयः—यः दिवाभीतमिव गुहासु लीनम् अन्धकारं दिवाकरात् रक्षति, उच्चैःशिरसां शरणं प्रपन्ने क्षुद्रेऽपि सति इव नूनं ममत्वम् ।

व्याख्या—यः = हिमालयः, दिवा (अव्ययपदमेतत्)=दिवसे, भीतं=भययुक्तम् इव, दिवाभीतम् = उलूकमिव इति व्यङ्ग्यः 'दिवान्धः कौशिको घूको दिवाभीतो निशाटनः' इति कोषः । गुहासु = कन्दरासु, लीनम् = संश्लिष्टम् , अन्धकारम् = ध्वान्तम् , दिवाकरात् = सूर्यात् , रक्षति = पाति, उच्चैःशिरसाम् = उन्नतानाम् , शरणं = रक्षितारं, प्रपन्ने = प्राप्ते, क्षुद्रेऽपि = नीचेऽपि, सति = सज्जने, इव, नूनं = निश्चयेन, ममत्वम् = आत्मीयत्वं, भवतीत्यर्थः ।

व्युत्पत्तिः—दिवाकरात् = दिवा दिवसं करोतीति दिवाकरः तस्मात् दिवोपपदात् कृञ् धातोः 'दिवाविभानिशाप्रभाभास्कारान्तानन्तादिबहुनान्दीकिंलिपिलिबिबलिभक्तिकर्तृचित्रचेत्रसङ्घाजङ्घाबाह्वहर्यत्तद्धनुररुष्षु' इति टप्रत्ययः । 'भीत्रार्थानां भयहेतुः' इत्यपादानत्वात्पञ्चमी । उच्चैःशिरसाम्=उच्चैः शिरो येषां ते उच्चैःशिरसस्तेषाम् । शरणं='शरणं गृहरक्षित्रोः' इत्यमरः । सति=अस् धातोः शतृप्रत्यये सत्पदसिद्धिः । 'सत्ये साधौ विद्यमाने प्रशस्तेऽभ्यर्हिते च सत्' इत्यमरः । ममत्वं=ममभावो ममत्वम् । ममेति पदमस्मच्छब्दप्रतिरूपकमव्ययं, ततस्त्वप्रत्ययः । अत्र उत्तरार्द्धगतसामान्यवाक्येन पूर्वार्द्धगतविशेषवाक्यस्य समर्थनादर्थान्तरन्यासोऽलङ्कारः । तथा च तल्लक्षणं साहित्यदर्पणे—

'सामान्यं वा विशेषेण विशेषस्तेन वा यदि । कार्यं च कारणेनेदं कार्येण च समर्थ्यते ॥
साधर्म्येणेतरेणार्थान्तरन्यासोऽष्टधा ततः' । इति ।

आलङ्कारिकास्तु 'एवमादिस्थलेषु उत्प्रेक्षितार्थस्य अचेतनाऽन्धकारत्रासस्य असम्भूततया एव प्रतिभासनं स्वरूपमित्युचितमेव तत्समर्थनम्' इत्याहुः ॥

भावार्थः- दिवसे सूर्यात् भीत्वा परित्राणाय सर्वतः प्रदेशात् परावृत्य निजकुहराभ्यन्तरमेवाश्रितमन्धकारमपि यः शरणागतवत्सलत्वाद्रक्षति, यतो महात्मनां स्वमेव रक्षितेति शरणत्वेनात्मानमुपपन्नेऽनार्येऽपि विषये श्रेष्ठे जन इव मदीयत्वाभिमानित्वं भवतीति भावः ।

गिरिराजशब्दवाच्यत्वमप्यस्यैव युक्तमित्याह—

लाङ्गूलविक्षेपविसर्पिशोभैरितस्ततश्चन्द्रमरीचिगौरैः ।
यस्याऽर्थयुक्तं गिरिराजशब्दं कुर्वन्ति बालव्यजनैश्चमर्यः ॥ १३ ॥

अन्वयः—चमर्यः इतस्ततः लाङ्गूलविक्षेपविसर्पिशोभैः चन्द्रमरीचिगौरैः बालव्यजनैः यस्य गिरिराजशब्दमर्थवन्तं कुर्वन्ति ।

व्याख्या—चमर्यः = चमरमृग्यः, इतस्ततः=सर्वतः, लाङ्गूलविक्षेपविसर्पिशोभैः= पुच्छविधूननविसारिद्युतिभिः, चन्द्रमरीचिगौरैः = हिमांशुकरशुभ्रैः, बालव्यजनैः = चामरैः, यस्य=हिमालयस्य, गिरिराजशब्दं = गिरिराज इत्यभिधानम् , अर्थयुक्तम्= अभिधेययुक्तम् , कुर्वन्ति = विदधति । राजानो हि आतपत्रचामरादिचिह्निता भवन्तीति यावत् ।

व्युत्पत्तिः—चमर्यः = चमराणां मृगविशेषाणां स्त्रियः चमर्यः 'पुंयोगादाख्यायाम् ४।१।४८' इति ङीष् । लाङ्गूलविक्षेपविसर्पिशोभैः = लाङ्गूलानां विक्षेपा लाङ्गूलविक्षेपाः । 'पुच्छोऽस्त्री लोमलाङ्गूले बालहस्तश्च वालधिः' इत्यमरः । लाङ्गूलविक्षेपैः विसर्पिण्यः, लाङ्गूलविक्षेपविसर्पिण्यः शोभा येषां तानि (बालव्यजनैरित्यस्य विशेषणत्वान्नपुंसकलिङ्गत्वम्) लाङ्गूलविक्षेपविसर्पिशोभानि, तैः । 'गोस्त्रियोरुपसर्जनस्य' इति ह्रस्वत्वम् । 'शोभा कान्तिर्द्युतिश्छविः' इत्यमरः । चन्द्रमरीचिगौरैः = चन्दतीति चन्द्रः, 'चदि आह्लादने' इति धातोरौणादिको रक् प्रत्ययः । 'हिमांऽशुश्चन्द्रमाश्चन्द्र इन्दुः कुमुदबान्धवः' इत्यमरः । चन्द्रस्य मरीचय इति चन्द्रमरीचयः 'भानुः करो मरीचिः स्त्रीपुंसयोः' इत्यमरः । चन्द्रमरीचय इव गौराणि चन्द्रमरीचिगौराणि तैः । 'उपमानानि सामान्यवचनैः' इति समासः । 'अवदातः सितो गौरो वलक्षो

धवलोऽर्जुनः' इत्यमरः । बालव्यजनैः = बाला एव व्यजनानि बालव्यजनानि, तैः । 'व्यजनं तालवृन्तकम्' इत्यमरः । गिरिराजशब्दं = गिरीणां राजा गिरिराजः 'राजाऽहः सखिभ्यष्टच्' इति समासान्तष्टच् । 'अद्रिगोत्रगिरिप्रावाऽचलशैलशिलोच्चयाः' इत्यमरः । गिरिराजश्चाऽसौ शब्दः गिरिराजशब्दः, तम् । 'विशेषणं विशेष्येण बहुलम्' इति कर्मधारयसमासः ।

भावार्थः—यस्य हिमवतः पर्वतराजोऽयमिति शब्दं चमरमृग्यः सर्वतः चन्द्रकिरणधवलैः बालदण्डचालनप्रसृतशीकैर्निजलाङ्गूलमयैश्चामरैर्यथार्थं कुर्वन्तीति भावः।

नवोढाऽनुसरणमप्यत्रैव सुखकरमित्याह—

यत्रांऽशुकाक्षेपविलज्जितानां यदृच्छया किंपुरुषाऽङ्गनानाम् ।
दरीगृहद्वारविलम्बिबिम्बास्तिरस्करिण्यो जलदा भवन्ति ॥ १४ ॥

अन्वयः—यत्र अंशुकाक्षेपविलज्जितानां किंपुरुषाऽङ्गनानां यदृच्छया दरीगृहद्वारविलम्बिबिम्बाः जलदाः तिरस्करिण्यो भवन्ति ।

व्याख्या—यत्र = हिमालये, अंशुकाक्षेपविलज्जितानाम्=वस्त्रापहरणलज्जितानां, किंपुरुषाऽङ्गनानां=किन्नरसुन्दरीणां, यदृच्छया=दैवगत्या, दरीगृहद्वारविलम्बिबिम्बाः= गुहालयप्रतीहारलम्बमानमण्डलाः, जलदाः=मेघाः, तिरस्करिण्यः=प्रतिसीराः (जवनिकाः) भवन्ति ।

व्युत्पत्तिः—यत्र = यच्छब्दात् 'सप्तम्यास्त्रल्' इति त्रलप्रत्ययः । अंशुकाक्षेपविलज्जितानाम् , अंशुकानामाक्षेपस्तेन विशेषेण लज्जितास्तासाम् । किंपुरुषाङ्गनानाम्, किंपुरुषाणामङ्गनास्तासाम् । दरीगृहद्वारविलम्बिबिम्बाः, दरी एव गृहं तस्य द्वारं तस्मिन् विलम्बिनो बिम्बाः येषां ते । 'दरी तु कन्दरे वाऽपि देवखातबिले गुहा' इत्यमरः । 'गृहं गेहोदवसितम्', 'स्त्री द्वार्द्वारं प्रतीहार' इति चामरः । जलं ददतीति जलदा मेघास्तिरस्करिण्यो जवनिकाः 'प्रतिसीरा जवनिका स्यात् तिरस्करिणी च से'त्यमरः । 'तिरसोऽन्यतरस्याम्' इति सत्वम् । अत्र जलदेषु तिरस्करिणीत्वमारोपितम् । तस्य च प्रकृतोपयोगित्वात् परिणामालङ्कारः । वस्तुतस्तु लज्जया गुह्यगूहनाय करतलेषु व्यापार्यमाणेषु दंवोपनतेन जलदरोधतमसा नवोढागुह्यगोपनकार्यसिद्धेः समाधिरलङ्कारः प्राधान्येन ध्वन्यते । तल्लक्षणं यथा—

'समाधिः सुकरं कार्यं कारणान्तरयोगतः' इति ।

भावार्थः—यत्र हिमवति रतिकाले प्रियतमकृतवसनहरणेन विशेषलज्जितानां किन्नरस्त्रीणां यादृच्छिकसङ्गस्या गुहारूपसुरतभवनद्वारि विलम्बिदेहा मेघा एव जवनिका

भवन्तीत्यर्थः । गुहाद्वारे घनोपरुद्धे सति तत्रौषधिप्रकाशादिप्रवेशाऽभावात् तमोवृद्धिः, ततश्च गुह्यगोपनार्थं करतलादिव्यापारनैरपेक्ष्यमिति भावः ।

हिमालये वायोरपि गुणोत्कर्षमाह—

भागीरथीनिर्झरसीकराणां वोढा मुहुः कम्पितदेवदारुः ।
यद्वायुरन्विष्टमृगैः किरातैरासेव्यते भिन्नशिखण्डिबर्हः ॥ १५ ॥

अन्वयः—भागीरथीनिर्झरसीकराणां वोढा मुहुः कम्पितदेवदारुः भिन्नशिखण्डिबर्हः यद्वायुः अन्विष्टमृगैः किरातैः आसेव्यते ।

व्याख्या—भागीरथीनिर्झरसीकराणां = गङ्गाझराम्बुकणानाम् , वोढा = प्रापकः, एतेन शैत्यमुक्तम् , मुहुः = पुनः पुनः सद्यो वा, कम्पितदेवदारुः=चालितदेवदारुः, चालितदेवदारुवृक्षः, एतेन सौरभ्योक्तिः, भिन्नशिखण्डिबर्हः=विश्लेषितमयूरपिच्छः, एतेन मन्दोक्तिः, इत्थं वायोर्विशेषणत्रयेण वैशिष्ट्यमुक्तम् , यद्वायुः = यदीयवातः, अन्विष्टमृगैः = मार्गितहरिणैः मार्गितपशुभिर्वा, श्रान्तैरिति भावः, किरातैः = शबरैः, आसेव्यते = समन्तात् आश्रीयते ।

व्युत्पत्तिः—भागीरथीनिर्झरसीकराणां = भगीरथस्य इयं भागीरथी 'तस्येदम्' ४।३।१२०। इत्यण्, 'यस्येति च' इतीकारलोपः 'टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयष्ठक्ठञ्कञ्क्वरपः' इति ङीप् । 'गङ्गा विष्णुपदी जह्नुतनया सुरनिम्नगा । भागीरथी त्रिपथगा' इत्यमरः । भागीरथ्या निर्झरः भागीरथीनिर्झरः, 'वारिप्रवाहो निर्झरो झर' इत्यमरः । भागीरथीनिर्झरस्य सीकराः भागीरथीनिर्झरसीकराः तेषां भागीरथीनिर्झरसीकराणां, 'सीकरोऽम्बुकणाः स्मृताः' इत्यमरः । वहतीति वोढा, 'वह प्रापणे' इति धातोः, 'ण्वुल्तृचौ' इति तृच् । मुहुः = 'पौनःपुन्ये भृशार्थे च सद्यो वा स्यान्मुहुःपदम्' इति वैजयन्ती । कम्पितदेवदारुः = कम्पिता देवदारवो येनः सः कम्पितदेवदारुः । भिन्नशिखण्डिबर्हः=शिखण्डः अस्ति येषां ते शिखण्डिनः, शिखण्डस्तु पिच्छबर्हे नपुंसके' इत्यमरः । शिखण्डशब्दात् नित्ययोगे, अत इनिठनौ' इति इनि प्रत्ययः । 'शिखावलः शिखी केकी' इत्यमरः । शिखण्डिनां बर्हाणि शिखण्डिबर्हाणि, भिन्नानि शिखण्डिबर्हाणि येन सः भिन्नशिखण्डिबर्हः । यद्वायुः = यस्य वायुः । अन्विष्टमृगैः= अन्विष्टा मृगा यैस्ते अन्विष्टमृगास्तैः अन्विष्टमृगैः, 'अन्विष्ट मार्गितं मृगितम्' इति 'पशवोऽपि मृगाः' इति चामरः । किरातैः='भेदाः किरातशबरपुलिन्दा म्लेच्छजातयः' इत्यमरः । आसेव्यते = 'षेवृ सेवने' इति धातोः कर्मणि 'सार्वधातुके यक्'

इति यक्प्रत्ययः, 'धात्वादेः षः सः' इति षस्य सः। अत्र वायुसेवनस्वभावोक्त्या स्वभावोक्तिरलङ्कारः। तल्लक्षणं यथा—

'स्वभावोक्तिस्तु डिम्भादेः स्वक्रियारूपवर्णनम्' इति ।

अत्र तमःप्रकृतीनां मृगवधलालसानां किरातानामप्यनवरतगङ्गाजलसेवनप्रतिपादनेन प्रारब्धभोगक्षये तत्रस्थानां मुक्तिरेवेति च ध्वन्यते ।

भावार्थः—मृगान्वेषणार्थमितस्ततः कृतावधानैः श्रान्तैः शबरैः गङ्गाप्रवाहजलकणवाहकत्वेन शीतः, देवदारुद्रुकम्पनेन सुरभितः, वनप्रदेशेषु वर्त्तमानानां मयूराणां बर्हसमुल्लासनेन मन्द इति शीतसुगन्धमन्दो यदीयः पवनः पुनः पुनः सेव्यत इति भावः।

हिमालयस्य सर्वोन्नतत्वमाह—

सप्तर्षिहस्तावचितावशेषाण्यधो विवस्वान्परिवर्तमानः ।
पद्मानि यस्याऽग्रसरोरुहाणि प्रबोधयत्यूर्ध्वमुखैर्मयूखैः ॥ १६ ॥

अन्वयः—सप्तर्षिहस्ताऽवचिताऽवशेषाणि पद्मानि अधः परिवर्तमानः विवस्वान् ऊर्ध्वमुखैः मयूखैः प्रबोधयति ।

व्याख्या—सप्तर्षिहस्ताऽवचितावशेषाणि=मरीच्याद्यृषिकरलूनाऽवशिष्टानि कश्यपाद्यृषिकरलूनाऽवशिष्टानि वा, यस्य=हिमालयस्य, अग्रसरोरुहाणि=उपरिसरस्युत्पन्नानि, पद्मानि=कमलानि, अधः=नीचैः नितम्बप्रदेशे इत्यर्थः, परिवर्तमानः=भ्रमन्, विवस्वान्=सूर्यः, ऊर्ध्वमुखैः=उपरिगामिभिः, मयूखैः=किरणैः, प्रबोधयति=विकासयति, न जातुचिदधोमुखैः, अग्रभूमेः सूर्यमण्डलोन्नतत्वादित्यर्थः। 'सप्तर्षिमण्डलं ध्रुवादप्यूर्ध्व'मिति ज्यौतिषिकाः। वक्ष्यति च 'नित्यमर्काच्च सोमाच्च परमध्यास्महे पदम्' (६-१९) ॥ अतस्तेषामग्रसरोरुहभागित्वं युक्तम् ।

व्युत्पत्तिः—सप्तर्षिहस्ताऽवचिताऽवशेषाणि=सप्त च ते ऋषयः सप्तर्षयः 'दिक्सङ्ख्ये संज्ञायाम्' इति समासः ॥

सप्तर्षयश्च—'मरीचिरङ्गिरा अत्रिः पुलस्त्यः पुलहः क्रतुः ।
वसिष्ठश्चेति सप्तैते ज्ञेयाश्चित्रशिखण्डिनः ॥' इत्थं ज्ञेयाः ॥

मतान्तरे तु—'कश्यपोत्रिर्भरद्वाजो विश्वामित्रोऽथ गौतमः ।
जमदग्निर्वसिष्ठश्च—' एवं ज्ञेयाः ।

सप्तर्षीणां हस्ताः सप्तर्षिहस्ताः, तैः अवचितानि सप्तर्षिहस्ताऽवचितानि, तेभ्यः

अवशेषाणि अवशिष्यत इति अवशेषः 'कर्मणि घञ्' विशेष्यनिघ्नत्वान्नपुंसकत्वम्। तानि सप्तर्षिहस्ताऽवचितावशेषाणि। अनेन विशेषणेन पद्मानां साफल्यं सूचितम्। अग्रसरोरुहाणि=रोहन्तीति रुहाणि, 'रुह् बीजप्रादुर्भावे' इति धातोः 'हृगुपधज्ञाप्रीकिरः कः' इति कः प्रत्ययः। अग्रे सरांसि अग्रसरांसि, 'कासारः सरसी सर' इत्यमरः। अग्रसरःसु रुहाणि तानि अग्रसरोरुहाणि, पद्मानि='वा पुंसि पद्मं नलिनमरविन्दं महोत्पलम्' इत्यमरः। परिवर्तमानः=परिवर्तते इति परिवर्तमानः, पर्युपसर्गपूर्वकात् 'वृतु वर्तने' इति धातोः लटः 'लटः शतृशानचावप्रथमासमानाधिकरणे' इति सूत्रेण शानच् आदेशः, ततः 'आने मुक्' इति मुगागमः। विवस्वान्='भास्वद्विवस्वत्सप्ताऽश्वहरिदश्वोष्णरश्मय' इत्यमरः। ऊर्ध्वमुखैः=ऊर्ध्वं मुखं येषां तैः ऊर्ध्वमुखैः, मयूखैः='किरणोऽस्रमयूखांऽशुगभस्तिघृणिरश्मय' इत्यमरः। प्रबोधयति=प्रोपसर्गपूर्वकात् 'बुध् अवगमने' इति धातोः 'हेतुमति च ३।१।२६' इति णिचि, 'बुधयुधनशजनेङ्प्रुद्रुस्रुभ्यो णेः १।३।८६' इति परस्मैपदम्।

अत्र हिमवतः सूर्यमार्गाल्लङ्घित्वकथनादौन्नत्यं भङ्ग्यन्तरेणोक्तमिति पर्यायोक्तमलङ्कारः। तल्लक्षणं च साहित्यदर्पणे 'पर्यायोक्तं यदा भङ्ग्या गम्यमेवाभिधीयते' इति।

भावार्थः— अधित्यकापेक्षयात्यन्तमधोभागे एव वर्तमानः सविता सप्तर्षिभिर्देवतार्चनार्थं यानि कानिचिदवचितानि पुनश्च पद्मानां बहुत्वाद्धिमवतः शिरःपुष्करिणीष्वेवावशिष्टानि पद्मानि ऊर्ध्वमुखरश्मिभिरुन्मीलयतीति भावः।

हिमालयस्य देवत्वमैश्वर्यं चाह—

यज्ञाङ्गयोनित्वमवेक्ष्य यस्य सारं धरित्रीधरणक्षमं च।
प्रजापतिः कल्पितयज्ञभागं शैलाधिपत्यं स्वयमन्वतिष्ठत् ॥ १७ ॥

अन्वयः— यस्य यज्ञाऽङ्गयोनित्वं धरित्रीधरणक्षमं सारं च अवेक्ष्य प्रजापतिः स्वयं कल्पितयज्ञभागं शैलाधिपत्यम् अन्वतिष्ठत्।

व्याख्या— यस्य = हिमालयस्य, यज्ञाङ्गयोनित्वं = यज्ञसाधनप्रभवत्वं, धरित्रीधरणक्षमं = पृथ्वीधारणसमर्थं, सारं च = बलं च, अवेक्ष्य = ज्ञात्वा, प्रजापतिः=ब्रह्मा, स्वयम् = आत्मना (एव), कल्पितयज्ञभागं=दत्तयज्ञांऽशं, शैलाधिपत्यं=पर्वताऽधिपत्वम्, अन्वतिष्ठत् = कृतवानित्यर्थः।

व्युत्पत्तिः—यज्ञाऽङ्गयोनित्वं = यज्ञस्य अङ्गानि उपकरणानि सोमलतादीनि, 'यज्ञः

सवोऽध्वरो यागः सप्ततन्तुर्मखः क्रतुः' इत्यमरः । यज्ञाङ्गानां योनिः यज्ञाङ्गयोनिः, तस्य भावः यज्ञाङ्गयोनित्वं, तत् ।

'यज्ञाऽङ्गार्थं मया सृष्टो हिमवानचलेश्वरः' इति विष्णुपुराणात् ।

यज्ञाङ्गयोनिशब्दात् 'तस्य भावस्त्वतलौ' इति त्वप्रत्ययः, तदन्तस्य 'त्वान्तं क्लीबम्' इति लिङ्गानुशासनसूत्रात् नपुंसकत्वम् । धरित्रीधरणक्षमं = धरित्र्याः धरणं धरित्रीधरणं, 'धरा धरित्री धरणिः क्षोणिर्उर्व्या काश्यपी क्षितिः' इत्यमरः । धरित्रीधरणे क्षमः धरित्रीधरणक्षमः, तं धरित्रीधरणक्षमम् । सारं = 'सारो बले स्थिरांऽशे च' इत्यमरः । अवेक्ष्य=अवोपसर्गपूर्वकात् 'ईक्ष् दर्शने' इति धातोः 'समानकर्तृकयोः पूर्वकाले ३।४।२१' इति क्त्वाप्रत्ययः, ततस्तस्य 'समासेऽनञ्पूर्वे क्त्वो ल्यप् ७।१।३१' इति ल्यबादेशः । प्रजापतिः=प्रजायन्ते इति प्रजाः 'प्रजा स्यात् सन्ततौ जने' इत्यमरः । प्रोपसर्गपूर्वकात् 'जनी प्रादुर्भावे' इति धातोः 'उपसर्गे च संज्ञायाम् ३।२।९९' इति डप्रत्ययः । पातीति पतिः 'ईश्वरः पतिरीशिता' इत्यमरः । 'पा रक्षणे' इति धातोः 'पातेर्डतिः' इत्युणादिसूत्रेण डतिप्रत्ययः । प्रजानां पतिः प्रजापतिः, 'स्रष्टा प्रजापतिर्वेधा विधाता विश्वसृड् विधिः' इत्यमरः । स्वयम् = 'स्वयमात्मना' इत्यमरः । कल्पितयज्ञभागं = यज्ञस्य भागः यज्ञभागः, कल्पितः यज्ञभागः यस्मिन् तत् कल्पितयज्ञभागं, तथा चोक्तम्–सोमस्य राज्ञः कुरङ्ग इन्दोः शृङ्गी समुद्रस्य शिशुमारो हिमवतो हस्ती' इति श्रुतेरिति । शैलाधिपत्यं=अधिः पतिः अधिपतिः, 'कुगतिप्रादय' इति गतिसमासः, अधिपतेर्भाव आधिपत्यम् , 'पत्यन्तपुरोहितादिभ्यो यक्' इति यक्प्रत्ययः, 'किति च' इति आदिवृद्धिः । शैलानाम् आधिपत्यं शैलाधिपत्यं, तत् 'अद्रिगोत्रगिरिग्रावाऽचलशैलशिलोच्चयाः' इत्यमरः । अन्वतिष्ठत्=अनूपसर्गपूर्वकात् 'ष्ठा गतिनिवृत्तौ' इति धातोः 'अनद्यतने लङ्', ष्ठा इत्यत्र 'धात्वादेः षः सः' इति सूत्रेण षकारस्य सकारादेशः, ततः 'निमित्ताऽपाये नैमित्तिकस्याऽप्यपाय' इति न्यायेन ठकारनिवृत्तौ स्था इत्याकारकं रूपं जातं ततः तस्य 'पाघ्राध्मास्थाम्नादाण्दृश्यर्तिसर्तिशदसदां पिबजिघ्रधमतिष्ठमनयच्छपश्यर्च्छधौशीयसीदाः ७।३।७८' इति सूत्रेण तिष्ठादेशः । अन्तर्भावितण्यर्थः । अनुष्ठापितवानित्यर्थः ।

हिमवतः शैलाधिपत्यम् उक्तं च ब्रह्माण्डपुराणे—

'शैलानां हिमवन्तं च नदीनां चैव सागरम् ।
गन्धर्वाणामधिपतिं चक्रे चित्ररथं विधिः' ॥ इति ।

अत्र यज्ञाङ्गयोनित्वमित्यादिना क्रमेणोद्दिष्टयोरर्थयोः कल्पितयज्ञभाग इत्यादिना पश्चाद्विर्देशात् यथासंख्यमलङ्कारः । तल्लक्षणन्तु—

'यथासङ्ख्यमनूद्देश उद्दिष्टानां क्रमेण यत्' ॥ इति ।

भावार्थः—ब्रह्मदेवो हिमवतः सोमलताप्रभृतीनां यज्ञाङ्गानामुद्भवस्थानत्वं भूमि-

धारणक्षमं बलं च सम्यगवलोक्य महेन्द्रार्थैस्तुल्यमेवाऽस्य यज्ञेषु हविर्भागं कल्पयित्वा पर्वताधिपतित्वं स्वयमेवानुष्ठापितवानिति भावः ।

कुमारसम्भवम्

अथ पञ्चमः सर्गः

इत्थं कामदहनप्रसङ्गागतं रतिप्रलापवृत्तमुपसंहृत्याधिकारिकं वृत्तं स्वावसरेऽवतारयति—

तथा समक्षं दहता मनोभवं पिनाकिना भग्नमनोरथा सती।
निनिन्द रूपं हृदयेन पार्वती प्रियेषु सौभाग्यफला हि चारुता ॥१॥

अन्वयः—पार्वती तथा समक्षं मनोभवं दहता पिनाकिना भग्नमनोरथा सती हृदयेन रूपं निनिन्द, चारुता प्रियेषु सौभाग्यफला भवति।

व्याख्या—पार्वती=उमा, तथा=तेन प्रकारेण, समक्षम्=पुरतः, मनोभवं=कामदेवं, दहता=भस्मीकुर्वता, पिनाकिना=महेश्वरेण, भग्नमनोरथा=खण्डिताऽभिलाषा, सती=भवन्ती, हृदयेन=मनसा, रूपं=सौन्दर्यम्, निनिन्द=निन्दितवती, धिक् मे रूपं यद्हरमनोहरणाय न समर्थमिति गर्हितवतीत्यर्थः। युक्तं चैतत् इत्याह-चारुता=सौन्दर्यं, प्रियेषु=वल्लभेषु, सौभाग्यफला=प्रियवाल्लभ्यफला, भवतीति शेषः।

व्युत्पत्ति—पार्वती=पर्वतस्याऽपत्यं स्त्री पार्वती, 'टिड्ढाणञ्०' इत्यादिना ङीप्। समक्षम्=अक्ष्णोः समीपम् समक्षम्, 'अव्ययं विभक्तिसमीपसमृद्धि०' इत्यादिना अव्ययीभावः, 'प्रतिपरसमनुभ्योऽक्ष्णः' इति गणसूत्रे सम्पूर्वस्य अक्षिशब्दस्य पाठात् 'अव्ययीभावे शरत्प्रभृतिभ्यः' इति सूत्रेण समासान्तष्टच्। मनोभवं=मनसि भवतीति मनोभवः, तं मनोभवम्। दहता=दहतीति दहन्, तेन दहता, 'दह् भस्मीकरणे' इति धातोः शतृप्रत्ययः। पिनाकिना=पिनाकः अस्याऽस्तीति पिनाकी, तेन पिनाकिना। भग्नमनोरथा=भग्नः=नष्टः, मनोरथः=हरप्राप्तिरूपोऽभिलाषः, यस्याः सा भग्नमनोरथा, 'इच्छाकाङ्क्षा स्पृहेहा तृड् वाञ्छा लिप्सा मनोरथः' इत्यमरः। सती=अस्तीति सती, 'अस् भुवि' इति धातोः शतृप्रत्ययः, 'असोरल्लोपः' इत्यल्लोपः ततः स्त्रीत्वविवक्षायाम् 'उगितश्च' इति ङीप्प्रत्ययः। हृदयेन='चित्तं तु चेतो हृदयं स्वान्तं हृन्मानसं मनः' इत्यमरः। चारुता=चारोर्भावश्चारुता, तलप्रत्ययः। प्रियेषु=प्रीणन्तीति प्रियाः, तेषु प्रियेषु, वैषयिकी सप्तमीयम्। सौभाग्यं फलं यस्याः सा सौभाग्यफला। अथाऽस्मिन् सर्गे वंशस्थं वृत्तं, 'जतौ तु वंशस्थमुदीरितं जरौ' इति लक्षणात्।

भावार्थः—पूर्वोक्तप्रकारेणात्मनः प्रत्यक्षं कामदेवं भस्मावशेषतामेव प्रापयता हरेण भाविहरजायात्वलक्षणमनोरथस्य भङ्गं प्रापितत्वात्, पार्वती स्वकीयं स्वाभाविकं सौन्दर्यं मनसा निन्दितवती । प्रियविषयकं सौभाग्यमित्येकमेव हि सुन्दरतायाः फलं, तदभावे किं रूपसम्पदेति भावः ।

अथाऽलौकिकयोर्नायकयोस्तथाविधमेव प्रयोज्योपावर्तनविधिमवतारयति—

इयेष सा कर्तुमवन्ध्यरूपतां समाधिमास्थाय तपोभिरात्मनः ।
अवाप्यते वा कथमन्यथा द्वयं तथाविधं प्रेम पतिश्च तादृशः ॥ २ ॥

अन्वयः—सा समाधिम् आस्थाय तपोभिः आत्मनः अवन्ध्यरूपतां कर्तुम् इयेष । अन्यथा तथाविधं प्रेम तादृशः पतिश्च तद् द्वयं कथं वा अवाप्यते ।

व्याख्या—सा=पार्वती, समाधिम्=एकाग्रताम्, आस्थाय=अवलम्ब्य, तपोभिः=व्रतविशेषैः, वक्ष्यमाणैरिति शेषः । आत्मनः=स्वस्य, अवन्ध्यरूपतां=सफलसौन्दर्यं, कर्तुं=विधातुम्, इयेष=इष्टवती, इच्छति स्मेत्यर्थः । अन्यथा=अन्यप्रकारेण 'लौकिकोपावर्तनमात्रेणेत्यर्थः । तथाविधं=तादृशं, प्रेम=स्नेहः, येन अर्धाऽङ्गहरा शिवस्य भवेदिति यावत् । तादृशः=तथाविधः, पतिश्च=स्वामी च, यो मृत्युञ्जय इति यावत् । तत् द्वयं=तत् उभयं, कथं वा=केन प्रकारेण वा, अवाप्यते=प्राप्यते ।

व्युत्पत्तिः—आस्थाय=आङुपसर्गपूर्वकात् 'ष्ठा गतिनिवृत्तौ' इति धातोः क्त्वा, तस्य ल्यबादेशः । अवन्ध्यरूपताम्=न वन्ध्यमवन्ध्यम् । अवन्ध्यं च यद्रूपम्, अवन्ध्यरूपम्, तस्य भावः अवन्ध्यरूपता, ताम् अवन्ध्यरूपतां । यद्वा अवन्ध्यं रूपं यस्याः सा अवन्ध्यरूपा, तस्याः भावः अवन्ध्यरूपता, ताम् अवन्ध्यरूपताम् । 'त्वतलोर्गुणवचनस्य' इति पुवद्भावः । तथाविधं=तथा विधा यस्य तत् तथाविधम् । प्रेम='प्रेमा ना प्रियता हार्दं प्रेम स्नेहः' इत्यमरः । द्वयम्=द्वौ अवयवौ यस्य तद् द्वयं, 'संख्याया अवयवे तयप्' इति तयप्, तस्य 'द्वित्रिभ्यां तयस्याऽयज्वा' इति अयजादेशो विकल्पात्, पक्षे द्वितीयमित्यपि ।

अत्राह मनुः—'यद् दुस्तरं यद् दुरापं यद् दुर्गं यच्च दुष्करम् ।
तत् सर्वं तपसा साध्यं तपो हि दुरतिक्रमम् ॥' इति (११।२३८)

भावार्थः—सा पार्वती चित्तैकाग्र्यमवलम्ब्य तपश्चर्याभिः हरप्राप्तिरूपस्वमनोर-

यस्य साफल्यं प्रापयितुमिच्छतवती । तदभावे स्वशरीरार्द्धप्रदः पत्युः स्नेहः, अनन्यनारीभाक् पतिश्चेत्येतद् द्वयं कथं लभ्यते, न कथञ्चिदपीति भावः ।

अथ पार्वत्याः कार्यसाधनक्षमं स्थिरव्यवसायत्वं वर्णयितुमुपक्रमते—

निशम्य चैनां तपसे कृतोद्यमां सुतां गिरीशप्रतिसक्तमानसाम् ।
उवाच मेना परिरभ्य वक्षसा निवारयन्ती महतो मुनिव्रतात् ॥ ३ ॥

अन्वयः—मेना गिरीशप्रतिसक्तमानसां तपसे कृतोद्यमां सुतां निशम्य एनां वक्षसा परिरभ्य महतः मुनिव्रतात् निवारयन्ती सती उवाच ।

व्याख्या—मेना = मेनका, हिमालयपत्नीत्यर्थः । गिरीशप्रतिसक्तमानसां=हरासक्तचित्तां, तपसे = तपश्चरणाय, कृतोद्यमां=विहितोद्योगां, सुतां=पुत्रीं, गौरीमित्यर्थः । निशम्य=श्रुत्वा, एनां = पार्वतीं, वक्षसा = उरसा, परिरभ्य = आलिङ्ग्य, महतः = बृहतः, मुनिव्रतात् = तपसः, निवारयन्ती, सती, उवाच = अब्रवीत् ।

व्युत्पत्तिः—गिरीशप्रतिसक्तमानसां = गिरेः ईशः गिरीशः, 'भूतेशः खण्डपरशुर्गिरीशो गिरिशो मृडः' इत्यमरः । गिरीशे प्रतिसक्तं गिरीशप्रतिसक्तं, मन एव मानसं, मनश्शब्दात् स्वार्थे अण् । गिरीशप्रतिसक्त मानसं यस्याः सा गिरीशप्रतिसक्तमानसा, तां गिरीशप्रतिसक्तमानसां । कृतोद्यमां = कृतः उद्यमः यया सा कृतोद्यमा, तां कृतोद्यमां । मुनिव्रतात्=मुनेः व्रतम् मुनिव्रतं, तस्मात् मुनिव्रतात् । निवारयतीति निवारयन्ती, शतृप्रत्ययः ।

मुनिव्रतादित्यत्र यद्यपि मुनिव्रतस्य मेनकाया अनीप्सितत्वात् 'वारणार्थानामीप्सितः' इति नाऽपादानत्वं, तथाऽपि कृतोद्यमामिति मानसप्रवेशोक्तत्वात् 'ध्रुवमपायेऽपादानम्' इत्यपादानत्वमेव स्यात् । यथाऽऽह भाष्यकारः-'यच्च मिथ्यासंप्राप्य निवर्तते तच्च ध्रुवमपायेऽपादानमिति प्रसिद्धम् ।' इति मल्लिनाथः ।

वस्तुतस्तु भाष्यादौ वारणार्थानामिति सूत्रे कर्तुरित्यनुवृत्तेरप्रदर्शितत्वात् प्रकृते मेनायास्तदनीप्सितत्वेऽपि पार्वत्या मुनिव्रतस्याभीप्सितत्वात् वारणार्थानामित्यनेनैवापादानत्वे न काप्यनुपपत्तिरिति बोध्यम् ।

भावार्थः—अथ माता मेना सुतां पार्वतीं तपश्चरणकृतनिश्चयां हरासक्तचित्तां च तत्सखीमुखादवगम्योरसा गाढमालिङ्ग्यात्यन्तदुश्चरात्तपसः प्रतिषेधं कुर्वती सती वक्ष्यमाणं जगादेति भावः ।

क्लेशेन विनापि मनीषितसिद्धिप्रदं कर्मान्तरमुपदर्शयति—

मनीषिताः सन्ति गृहेषु देवतास्तपः क्व वत्से क्व च तावकं वपुः ।
पदं सहेत भ्रमरस्य पेलवं शिरीषपुष्पं न पुनः पतत्रिणः ॥ ४ ॥

अन्वयः—हे वत्से ! मनीषितः देवताः गृहेषु सन्ति । तपः क्व ? तावकं वपुश्च क्व ? पेलवं शिरीषपुष्पं भ्रमरस्य पदं सहेत, पतत्रिणः पुनः पदं न सहेत ।

व्याख्या—हे वत्से = हे पुत्रि ! मनीषिताः = अभीष्टाः, देवताः = देवाः, गृहेषु = भवनेषु, सन्ति = विद्यन्ते । त्वं ता आराधय इति शेषः । तपः=नियमव्रतं, क्व = कुत्र ? तावकं = त्वदीयं, वपुश्च = शरीरं च, क्व=कुत्र ? पेलवं = कोमलं, शिरीषपुष्पं= शिरीषकुसुमं, भ्रमरस्य = भृङ्गस्य, पदं = चरणस्थितिं, सहेत = मर्षयेत्, पतत्रिणः पुनः = पक्षिणस्तु, पदं = चरणस्थितिं, न सहेत = न मर्षयेत् ।

व्युत्पत्तिः—मनीषिताः = मनस ईषा मनीषा, 'अचोऽन्त्यादि टि' इति अस्भागस्य टिसंज्ञा, ततः 'शकन्ध्वादिषु पररूपं वाच्यम्' इति पररूपत्वम् । देवताः = देवा एव देवताः, स्वार्थे तल् । 'वृन्दारका दैवतानि पुंसि वा देवताः स्त्रियाम्' इत्यमरः । गृहेषु='गृहाः पुंसि च भूम्न्येव निकाय्यनिलयालयाः' इत्यमरः । तावकं = तव इदं तावकं, 'युष्मदस्मदोरन्यतरस्यां खञ्च' इत्यणप्रत्ययः, 'तवकममकावेकवचने' इति तवकादेशः, 'तद्धितेष्वचामादेः' इत्यादिवृद्धिश्च । पेलवं = 'पेलवं कोमलम्' इति त्रिकाण्डशेषः । शिरीषपुष्पं = शिरीषस्य पुष्पं शिरीषपुष्पं । भ्रमरस्य = 'भ्रम् अनवस्थाने' इति धातोः 'अतिकमिभ्रमिचमि' इत्युणादिसूत्रेणाऽरच् प्रत्ययः । सहेत = 'षह मर्षणे' इति धातोर्विधिलिङ् । पतत्रिणः = पतत्रम् अस्ति अस्य इति पतत्री, तस्य पतत्रिणः, इनिप्रत्ययः । 'पत्त्रत्रिपत्रिपतगपतत्पत्त्ररथाऽण्डजाः' इत्यमरः । अत्र पूर्वार्द्धे विषमालङ्कारः । तल्लक्षणं यथा—

'क्वचिद् यदतिवैषम्यान्न श्लेषो घटनामियाद्' इति ।
उत्तरार्धे तु सादृश्यनिमित्तोऽर्थान्तरन्यासोऽलङ्कारः । तयोश्च संसृष्टिः ॥

भावार्थः—हे पुत्रि ! इष्टार्थप्रदाः प्रतिमारूपेण वर्तमाना इन्द्राण्याद्याः देवताः स्वगृहेष्वेव विद्यमानाः सन्ति, ता एव यथेष्टं पूजय । कठिनशरीरैर्मुनिभिरेव कर्तुं शक्यमिदं तपः क्व? अत्यन्तकोमलं तव शरीरञ्च क्व? यथा भ्रमरावस्थानक्षमं शिरीषकुसुमं

पिकाद्यवस्थानं न सहते, तथा कोमलतरं तव शरीरं कठिनशरीरसाध्यं तपश्चरितुमक्षममेवेति भावः ।

इत्थं प्रवृत्तस्य जननीवचनस्य स्थिरव्यवसायायां पार्वत्यां वैफल्यमाह—

इति ध्रुवेच्छामनुशासती सुतां शशाक मेना न नियन्तुमुद्यमात् ।
क ईप्सितार्थस्थिरनिश्चयं मनः पयश्च निम्नाभिमुखं प्रतीपयेत् ॥ ५ ॥

अन्वयः— इति अनुशासती मेना ध्रुवेच्छां सुताम् उद्यमात् नियन्तुं न शशाक । ईप्सितार्थस्थिरनिश्चयं मनः निम्नाभिमुखं पयश्च कः प्रतीपयेत् ।

व्याख्या— इति = एवम्, अनुशासती=उपदिशन्ती, मेना=हिमवत्पत्नी, ध्रुवेच्छां= स्थिरव्यवसायां, सुतां = पुत्रीं, पार्वतीमित्यर्थः । उद्यमात् = उद्योगात् मुनिव्रतोद्योगादित्यर्थः । नियन्तुं = निवारयितुं, न शशाक = न समर्था अभूत । ईप्सितार्थस्थिरनिश्चयम् = इष्टार्थदृढनिश्चयं, मनः = चित्तं, निम्नाभिमुखं = निम्नप्रवणं, पयश्च = जलं च, कः, प्रतीपयेत् = प्रतिकूलयेत्, न कोऽपीत्यर्थः ।

व्युत्पत्तिः—अनुशासती = अनुशास्तीति अनुशासती, अनूपसर्गपूर्वकात् 'शासु अनुशिष्टौ' इति धातोः शतृप्रत्ययः, 'जक्षित्यादयः षट्' इत्यभ्यस्तसंज्ञा, ततः 'नाभ्यस्ताच्छतुः' इति नुम्निषेधः । अनन्तरं स्त्रीत्वविवक्षायाम् 'उगितश्च' इति ङीप् । ध्रुवेच्छां = ध्रुवा इच्छा यस्याः सा ध्रुवेच्छा, तां ध्रुवेच्छाम् 'इच्छाकाङ्क्षा स्पृहेहा तृड् वाञ्छा लिप्सा मनोरथः' इत्यमरः । ईप्सितार्थस्थिरनिश्चयम् = ईप्सितश्चासौ अर्थः ईप्सितार्थः, स्थिरः निश्चयः यस्य तत् स्थिरनिश्चयम्, ईप्सितार्थे स्थिरनिश्चयम् ईप्सितार्थस्थिरनिश्चयं, तत् । निम्नाऽभिमुखं=निम्ने अभिमुखं, निम्नाभिमुखं, तत् । निम्नप्रदेशं प्रत्यभिमुखं कृतप्रवाहमित्यर्थः । पयः = 'पयः कीलालममृतं जीवनं भुवनं वनम्' इत्यमरः । अत्र दीपकाऽनुप्राणितोऽर्थान्तरन्यासाऽलङ्कारः ।

भावार्थः—पूर्वोक्तप्रकारेणोपदिशन्ती मेना स्वपुत्रीं पार्वतीं मुनिव्रतोद्योगात् निवर्तयितुं न शक्ताऽभूत् । अभीष्टवस्तुनि दृढनिश्चयं मानसमधःप्रदेशाभिमुखं कृतप्रवाहं जलञ्च कः प्रतिनिवर्तयेत् । न कोऽपीति भावः ।

एवमङ्कुरितस्य पार्वत्या उत्साहस्य वृद्धिं वर्णयति—

कदाचिदासन्नसखीमुखेन सा मनोरथज्ञं पितरं मनस्विनी ।
अयाचताऽरण्यनिवासमात्मनः फलोदयान्ताय तपःसमाधये ॥ ६ ॥

अन्वयः—कदाचित् मनस्विनी सा मनोरथज्ञं पितरम् आसन्नसखीमुखेन फलोदयान्ताय तपःसमाधये आत्मनः अरण्यनिवासम् अयाचत ।

व्याख्या—कदाचित् = कस्मिंश्चित्समये, मनस्विनी = स्थिरचित्ता, सा = पार्वती, मनोरथज्ञम्=अभिलाषाऽभिज्ञं, पितरं=तातं, हिमालयमित्यर्थः । आसन्नसखीमुखेन= आप्तसख्युपायेन, फलोदयान्ताय=फलोत्पत्त्यवधये, तपःसमाधये = तपोनियमाऽर्थम्, आत्मनः = स्वस्य, अरण्यनिवासं = वनवासम्, अयाचत = याचितवती ।

व्युत्पत्तिः—मनस्विनी = प्रशस्तं मनः अस्या अस्तीति मनस्विनी, मनःशब्दात् 'अस्मायामेधास्रजो विनिः' इति विनिप्रत्ययः, तदन्तात् 'ऋन्नेभ्यो ङीप्' इति ङीप् । मनोरथज्ञं = मनोरथं जानातीति मनोरथज्ञः, तं मनोरथज्ञम् । 'आतोऽनुपसर्गे कः' इति कप्रत्ययः । आसन्नसखीमुखेन = आसन्ना चासौ सखी आसन्नसखी, 'समीपे निकटाऽऽसन्नसंनिकृष्टसनीडवत्' इति 'आलिः सखी वयस्या च' इति चाऽमरः । आसन्नसख्या मुखम् आसन्नसखीमुखं, तेन आसन्नसखीमुखेन 'मुखं निःसरणे वक्त्रे प्रारम्भोपाययोरपि' इति विश्वः । फलोदयाऽन्ताय = फलस्य उदयः फलोदयः, स अन्तः = अवधिः, यस्य स फलोदयाऽन्तः, तस्मै फलोदयान्ताय । तपःसमाधये = तपसः समाधिः तपःसमाधिः, तस्मै तपःसमाधये । अरण्यनिवासम् = अरण्ये निवासः अरण्यनिवासः, तम् अरण्यनिवासम् । 'अटव्यरण्यं विपिनं गहनं काननं वनम्' इत्यमरः । अयाचत = याच्धातोर्लङि रूपम् । 'दुह्याच्०' इत्यादिना द्विकर्मकत्वम् । मनस्विनो लक्षणं यथा—

'महाकार्ये कृतोद्योगो विघ्नैराहतमानसः ।
प्रारब्धं न त्यजति यः स मनस्वीति कथ्यते ॥' इति ।

भावार्थः—अथ दृढनिश्चया पार्वती प्रश्नावसरे लब्धे सति स्वाभिलाषाभिज्ञं पितरं हिमालयं निरन्तरसमीपवर्तिन्याः सख्या मुखेनाफलोदयं तपः कर्तुं स्वस्य वनवासं याचितवतीति भावः ।

अथ पार्वत्याः पितृनियोगपुरस्सरं तपोऽनुरूपदेशप्राप्तिमाह—

अथाऽनुरूपाऽभिनिवेशतोषिणा कृताभ्यनुज्ञा गुरुणा गरीयसा ।

प्रजासु पश्चात्प्रथितं तदाख्यया जगाम गौरी शिखरं शिखण्डिमत् ॥ ७ ॥

अन्वयः—अथ गौरी अनुरूपाऽभिनिवेशतोषिणा गरीयसा गुरुणा कृताऽभ्यनुज्ञा सती, पश्चात् प्रजासु तदाख्यया प्रथितं शिखण्डिमत् शिखरं जगाम ।

व्याख्या—अथ = अनन्तरं, गौरी = पार्वती, अनुरूपाऽभिनिवेशतोषिणा = योग्याग्रहसन्तुष्टेन, गरीयसा = पूज्यतमेन, गुरुणा = पित्रा, हिमालयेनेत्यर्थः । कृताऽभ्यनुज्ञा=कृताऽनुमतिः सती, तपः कुरु इत्युक्त्या इत्यर्थः । पश्चात् = अनन्तरं, तपःसिद्धयुत्तरकालमित्यर्थः । प्रजासु = जनेषु, तदाख्यया = तन्नाम्ना, गौरीनाम्नेत्यर्थः । प्रथितं = प्रख्यातं, गौरीशिखरमिति प्रसिद्धमित्यर्थः । शिखण्डिमत् = मयूरयुक्तं, शिखरं = शृङ्गं, जगाम = ययौ ।

व्युत्पत्तिः—गौरी = 'उमा कात्यायनी गौरी काली हैमवतीश्वरी' इत्यमरः । अनुरूपाऽभिनिवेशतोषिणा=अनुरूपश्चाऽसौ अभिनिवेशः अनुरूपाऽभिनिवेशः, तेन तुष्यतीति अनुरूपाऽभिनिवेशतोषी, तेन अनुरूपाभिनिवेशतोषिणा, विनिप्रत्ययः । गरीयसा = अतिशयेन गुरुः गरीयान्, तेन गरीयसा, ईयसुन्प्रत्ययः । कृताऽभ्यनुज्ञा = कृता अभ्यनुज्ञा यस्यै सा कृताभ्यनुज्ञा । तदाख्यया = तस्या आख्या तदाख्या, तया तदाख्यया । प्रथितं = 'प्रतीते प्रथितख्यातवित्तविज्ञातविश्रुताः' इत्यमरः । शिखण्डिमत् = प्रशस्ताः शिखण्डिनः सन्ति यस्मिंस्तत् शिखण्डिमत्, तपःसौकर्यार्थं दुष्टसत्त्वानामभावोऽप्यनेन ध्वन्यते । न हि शार्दूलाद्यधिष्ठिते देशे शिखण्डिनस्तद्भयान्निवसन्ति ।

भावार्थः—गौरीप्रार्थनां श्रुत्वा योग्यवराभिलाषोत्कर्षेण सन्तुष्यता पूज्येन पित्रा हिमालयेन तथास्विति प्राप्तानुमतिः सा गौरी तपःसिद्ध्युत्तरकालं गौरीचिरनिवासेनैव हेतुना जनेषु गौरीशिखरमिति नाम्ना प्रसिद्धतरं बहुबर्हियुक्तं हिमालयशिखरं प्रययाविति भावः ।

अथ षड्भिः श्लोकैः तपस उपक्रमो वर्ण्यते । तत्रादौ तपश्चरणाङ्गभूतं वल्कलबन्धनमाह—

विमुच्य सा हारमहार्यनिश्चया चिलोलयष्टिप्रविलुप्तचन्दनम् ।
बबन्ध बालारुणबभ्रु वल्कलं पयोधरोत्सेधविशीर्णसंहति ॥ ८ ॥

अन्वयः—अहार्यनिश्चया सा विलोलयष्टिप्रविलुप्तचन्दनं हारं विमुच्य बालाऽरुण-बभ्रु पयोधरोत्सेधविशीर्णसंहति वल्कलं बबन्ध ।

व्याख्या—अहार्यनिश्चया = अनिवार्यनिर्णया, सा = गौरी, विलोलयष्टिप्रविलुप्त-चन्दनं=चञ्चलप्रतिसरप्रमृष्टचन्दनं, हारं = मुक्ताऽऽवलीं, विमुच्य = विहाय, बालाऽ-रुणबभ्रु = बालार्कपिङ्गलं, पयोधरोत्सेधविशीर्णसंहति=स्तनोच्छ्रायविघटिताऽवयव-संश्लेषं, वल्कलं = वल्कं, स्तनावरणार्थमिति यावत् । बबन्ध = धारयामास ।

व्युत्पत्तिः—अहार्यनिश्चया = हर्तुं शक्यः हार्यः, 'हृञ् हरणे' इति धातोः 'ऋह-लोर्ण्यत्' इति ण्यत्प्रत्ययः, 'अचोञ्णिति' इति वृद्धिश्च । न हार्यः अहार्यः, स निश्चयः यस्याः सा अहार्यनिश्चया, 'समौ निर्णयनिश्चयौ' इत्यमरः । विलोलयष्टिप्रविलुप्त-चन्दनं = विलोलाश्च ता यष्टयः विलोलयष्टयः प्रकर्षेण विलुप्तं प्रविलुप्तं, 'सुप्सुपा' इति समासः । प्रविलुप्तं चन्दन स्तनाऽन्तर्गतमित्यर्थः, येन स प्रविलुप्तचन्दनः । विलोलयष्टिभिः प्रविलुप्तचन्दनः विलोलयष्टिप्रविलुप्तचन्दनः, तं विलोलयष्टिप्रविलुप्त-चन्दनं । बालाऽरुणबभ्रु=बालश्चासौ अरुणः बालाऽरुणः, 'सूरसूतोऽरुणोऽनूरुः काश्य-पिर्गरुडाऽग्रजः' इत्यमरः । बालाऽरुण इव बभ्रु बालाऽरुणबभ्रु तत् । पयोधरोत्सेध-विशीर्णसंहति = धरतस्तौ धरौ, 'धृञ् धारणे' पचाद्यच् । पयसां धरौ पयोधरौ, 'स्त्रीस्तनाऽब्दौ पयोधरौ' इत्यमरः । पयोधरयोः उत्सेधः पयोधरोत्सेधः, तेन विशीर्णा पयोधरोत्सेधविशीर्णा, सा संहतिः = अवयवसंश्लेषः, यस्य तत् पयोधरोत्सेधविशी-र्णसंहति, तत् । वल्कलं=कण्ठलम्बिस्तनोत्तरीयभूतमित्यर्थः । अत्र परिवृत्तिरलङ्कारः । तल्लक्षणं यथा—'परिवृत्तिर्विनिमयो योऽर्थानां स्यात् समासमैः' इति ।

भावार्थः—अनिवार्याऽध्यवसाया सा पार्वती कुचतटहरिचन्दनाङ्कितां मुक्तावलीं विहाय बालार्कवत् पिङ्गलवर्णं स्तनोच्छ्रायविघटितावयवं वल्कलं स्तनाभोगे गाढं धारयामासेति भावः ।

तपोऽनुरूपं जटाधारणमपि भङ्ग्यन्तरेणाह—

यथा प्रसिद्धैर्मधुरं शिरोरुहैर्जटाभिरप्येवमभूत्तदाननम् ।
न षट्पदश्रेणिभिरेव पङ्कजं सशैवलासङ्गमपि प्रकाशते ॥ ६ ॥

अन्वयः—तदाननं प्रसिद्धैः शिरोरुहैः यथा मधुरम् अभूत । जटाभिरपि एवं मधुरम् अभूत् । पङ्कज षट्पदश्रेणिभिः एव न, किन्तु सशैवलासङ्गं सदपि प्रकाशते ।

व्याख्या—तदाननं = पार्वतीमुखं, प्रसिद्धैः = भूषितैः, शिरोरुहैः = केशैः, यथा = येन प्रकारेण, मधुरं = प्रियम्, अभूत् = अभवत् । जटाभिरपि = सटाभिरपि, एवं = तथा, मधुरं = प्रियम्, अभूत् = अभवत् । पङ्कजं = कमलं, षट्पदश्रेणिभिः = भ्रमरपङ्क्तिभिः, एव, न = नो, किन्तु, सशैवलासङ्गम्=शैवालसम्पर्कसहितम्, सदपि, प्रकाशते = प्रकाशितं भवति ।

व्युत्पत्तिः—तदाननं=तस्या आननं तदाननं । प्रसिद्धैः=भूषितैः, 'प्रसिद्धौ ख्यातभूषितौ' इत्यमरः । शिरोरुहैः = रोहन्तीति रुहाः, 'रुह् बीजप्रादुर्भावे' इति धातोः 'हगुपधज्ञाप्रीकिरः कः' इति कप्रत्ययः । शिरसि रुहाः शिरोरुहाः, तैः शिरोरुहैः, 'चिकुरः कुन्तलो बालः कचः केशः शिरोरुहः' इत्यमरः । मधुरं = 'स्वादुप्रियौ तु मधुरौ' इत्यमरः । षट्पदश्रेणिभिः = षट् पदानि येषां ते षट्पदाः, तेषां श्रेणयः षट्पदश्रेणयः, ताभिः षट्पदश्रेणिभिः । सशैवलासङ्गम्=शैवलानाम् आसङ्गः शैवलासङ्गः, तेन सह वर्तते, तत् सशैवलासङ्गम् । 'तेन सहेति तुल्ययोगे' इति बहुव्रीहिः । अत्र प्रतिवस्तूपमालङ्कारः ।

भावार्थः—यथा तपःकालात् पूर्वं पार्वतीमुखं चूर्णकुसुमाद्यलंकृतैः केशैर्मनोहरमासीत्, तथैव तपःकालेऽपि जटाभिर्मनोहरमासीत् । कमलं केवलं भ्रमरपङ्क्तिभिरेव न शोभते, अपि तु शैवालसम्पर्कसहितमपि तथैव शोभत इति भावः ।

प्रतिक्षणं सा कृतरोमविक्रियां व्रताय मौञ्जीं त्रिगुणां बभार याम् ।
अकारि तत्पूर्वनिबद्धया तया सरागमस्या रसनागुणास्पदम् ॥ १० ॥

अन्वयः—सा प्रतिक्षणं कृतरोमविक्रियां त्रिगुणां यां मौञ्जीं व्रताय बभार, तत्पूर्वनिबद्धया तया अस्याः रसनागुणास्पदं सरागम् अकारि ।

व्याख्या—सा = पार्वती, प्रतिक्षणं = क्षणे क्षणे, कृतरोमविक्रियां = कृतरोमाञ्चां, पारुष्यादिति हेतोः । त्रिगुणां = त्रिरावृत्तां, यां, मौञ्जीं = मुञ्जमयीं मेखलां, व्रताय= तपसे, बभार = दधौ, तत्पूर्वनिबद्धया = तत्प्रथमबद्धया, तया = मौञ्ज्या, अस्याः = पार्वत्याः, रसनागुणास्पदं = मेखलासूत्रस्थानं, जघनमित्यर्थः । सरागं = सलोहितम्, अकारि = कृतम्, सौकुमार्याऽतिशयादित्यर्थः ।

व्युत्पत्तिः—प्रतिक्षणं=क्षणे क्षणे इति प्रतिक्षणं, वीप्सायामव्ययीभावः । कृतरोम-

विक्रियां = रोम्णां विक्रिया रोमविक्रिया, कृता रोमविक्रिया यया सा कृतरोमविक्रिया, तां कृतरोमविक्रियां। त्रिगुणां = त्रयः गुणाः यस्याः सा त्रिगुणा, तां त्रिगुणां। मौञ्जीं = मुञ्जस्य विकारः मौञ्जी, तां मौञ्जीं, 'तस्य विकारः' इत्यण्, 'टिड्ढाणञ्०' इत्यादिना ङीप्। तत्पूर्वनिबद्धया = तदेव पूर्वं यस्य तत् तत्पूर्वं, तत्पूर्वं यथा स्यात्तथा निबद्धा, तत्पूर्वनिबद्धा, तया तत्पूर्वनिबद्धया। रसनागुणास्पदं = रसनायाः गुणः रसनागुणः, तस्य आस्पदं रसनागुणास्पदं। सरागं = रागेण सहितं सरागम्, तत्पुरुषः। अत्र रसनागुणास्पदशब्देन रसनां परित्यज्य तत्स्थाने मौञ्जीबन्धनं द्योत्यत इति परिवृत्तिरलङ्कारो ध्वन्यते।

भावार्थः—सा चिरपरिचितां रसनां परित्यज्य सम्प्रति तपः कर्तुं तत्स्थाने त्रिरावृत्तां दुस्सहत्वेन क्षणे क्षणे विहितरोमाञ्चां मौञ्जीमबध्नात्। इदम्पूर्वनिबद्धया तया मौञ्ज्या पार्वत्या जघनमारुण्यगुणयुक्तमकृत।

अत्र सरागशब्दशक्त्यार्थान्तरमपि व्यज्यते—यथा कश्चित् कामी कयाचिन्नायिकया प्रथमं चिरसङ्गतः सन्, अनन्तरं त्रिगुणितसौन्दर्यया अन्यया नायिकया सङ्गतस्तस्यां सुतरां रक्तो भवति, तत्संयोगे प्रतिक्षणमुद्भूतरोमाञ्चोऽपि भवति, तथास्याः कटिप्रदेशो रसनया चिरसङ्गतः सन् त्रिगुणया तत्पूर्वनिबद्धया विहितरोमाञ्चया मौञ्ज्या नितरां सरागो विहित इति भावः।

व्रताङ्गभूतं कुशादानमक्षमालाधारणं चाह—

विसृष्टरागादधरान्निवर्तितः स्तनाङ्गरागारुणिताच्च कन्दुकात्।
कुशाङ्कुरादानपरिक्षताङ्गुलिः कृतोऽक्षसूत्रप्रणयी तया करः ॥ ११ ॥

अन्वयः—तया विसृष्टरागात् अधरात् निवर्तितः, स्तनाऽङ्गरागाऽरुणितात् कन्दुकाच्च निवर्तितः, कुशाऽङ्कुरादानपरिक्षताऽङ्गुलिः करः अक्षसूत्रप्रणयी कृतः।

व्याख्या—तया = पार्वत्या, विसृष्टरागात् = त्यक्तलाक्षारसरञ्जनात्, अधरात् = ओष्ठात्, अधरोष्ठादित्यर्थः। निवर्तितः = निवारितः, स्तनाऽङ्गरागाऽरुणितात् = कुचाऽङ्गरागरक्तात्, पतनसमये तस्य स्तनयोरुपरोधादित्यर्थः। कन्दुकाच्च = गेन्दुकाच्च, निवर्तितः = निवारितः, कुशाऽङ्कुरादानपरिक्षताङ्गुलिः = दर्भाऽङ्कुरग्रहणव्रणिताङ्गुलिः, करः = हस्तः, अक्षसूत्रप्रणयी = अक्षमालासहचरः, कृतः = विहितः।

व्युत्पत्तिः—विसृष्टरागात्=विसृष्टः रागः यस्मात् स विसृष्टरागः, तस्मात् विसृष्टरागात्। अधरात्='ओष्ठाऽधरौ तु रदनच्छदौ दशनवाससी' इत्यमरः। स्तनाऽङ्गरागा-

ऽरुणितात् = स्तनस्य अङ्गरागः स्तनाङ्गरागः। अरुणः सञ्जातः अस्य सः अरुणितः 'तदस्य संजातं तारकादिभ्य इतच्' इतीतच्। 'अभ्यक्तरागस्त्वरुणः' इत्यमरः। स्तनाऽङ्गरागेण अरुणितः स्तनाऽङ्गरागाऽरुणितः, तस्मात् स्तनाऽङ्गरागाऽरुणितात्। कन्दुकात् = भाषायां 'गेंद' इति नाम्ना ख्यातात्, 'गेन्दुकः कन्दुकः' इत्यमरः। कुशाऽङ्कुराऽऽदानपरिचिताऽङ्गुलिः = कुशानाम् अङ्कुराः कुशाऽङ्कुराः, 'अस्त्री कुशं कुथो दर्भः पवित्रम्' इत्यमरः। कुशाङ्कुराणाम् आदानं कुशाङ्कुरादानं, तेन परिचिताः कुशाऽङ्कुराऽऽदानपरिचिताः, ताः अङ्गुलयः यस्य स कुशाऽङ्कुराऽऽदानपरिचिताऽङ्गुलिः। अक्षसूत्रप्रणयी = अक्षाणां सूत्रम् अक्षसूत्रं, प्रणयः अस्याऽस्तीति प्रणयी, इनिप्रत्ययः। अक्षसूत्रे प्रणयी अक्षसूत्रप्रणयी।

अत्रैकस्यैव करस्याधरादौ दर्भाङ्कुरादौ च क्रमेण वर्तनात् पर्यायोऽलङ्कारः। तल्लक्षणं यथा—

'एकमनेकस्मिन्नेकमेकस्मिन् वा क्रमेण पर्यायः' इति।

भावार्थः—पार्वती तपस्समये निजकरमधररञ्जनकन्दुकाघातरूपात् कार्यद्वयात् निवार्य कुशाङ्कुरादानाक्षमालापरिवर्तनरूपकार्यद्वयपरमकरोदिति भावः।

महार्हशय्यापरिवर्तनच्युतैः स्वकेशपुष्पैरपि या स्म दूयते।
अशेत सा बाहुलतोपधायिनी निषेदुषी स्थण्डिल एव केवले॥ १२॥

अन्वयः—महाऽर्हशय्यापरिवर्तनच्युतैः स्वकेशपुष्पैः अपि या दूयते स्म। सा बाहुलतोपधायिनी सती केवले स्थण्डिले एव निषेदुषी सती अशेत।

व्याख्या—महाऽर्हशय्यापरिवर्तनच्युतैः = बहुमूल्यशयनीयलुण्ठनपतितैः, स्वकेशपुष्पैः अपि = आत्मकुन्तलकुसुमैः अपि, या = पार्वती, दूयते स्म = क्लिश्यते स्म, पुष्पाऽधिकसुकुमारत्वादित्यर्थः। सा = पार्वती, बाहुलतोपधायिनी = भुजलतोपबर्हकारिणी सती, केवले = संस्तरणरहिते, स्थण्डिले एव = भूमौ एव, दिवा निषेदुषी सती = उपविष्टा सती, रात्रौ अशेत = शयितवती।

व्युत्पत्तिः—महाऽर्हशय्यापरिवर्तनच्युतैः=महान् अर्हः=मूल्यं, यस्याः सा महाऽर्हा, शय्यते अत्र शय्या, 'शीङ् स्वप्ने' इति धातोः 'संज्ञायां समजनी'त्यादिना क्यप्, 'अयङ् यि क्ङिति' इत्ययङ्। 'शय्यायां शयनीयवत्। शयनम्' इत्यमरः। महार्हा चाऽसौ शय्या महार्हशय्या, तस्यां परिवर्तनं महार्हशय्यापरिवर्तनं, तेन

च्युतानि महार्हशय्यापरिवर्तनच्युतानि, तैः महार्हशय्यापरिवर्तनच्युतैः । स्वकेशपुष्पैः = स्वे च ते केशाः स्वकेशाः, 'चिकुरः कुन्तलो बालः कचः केशः शिरोरुहः' इत्यमरः । स्वकेशानां पुष्पाणि स्वकेशपुष्पाणि, तैः स्वकेशपुष्पैः । दूयते स्म = 'दूङ् परितापे' इति धातोर्लट् । दिवादौ पठितत्वात् 'दिवादिभ्यः श्यन्' इति श्यन् । स्मयोगे 'लट् स्मे' इति लटो लिङ्विषयता । बाहुलतोपधायिनी = बाहुरेव लता इति बाहुलता, ताम् उपधत्ते = उपधानीकरोति, तच्छीला इति बाहुलतोपधायिनी, 'व्रते' इति सूत्रेण णिनिप्रत्ययः । 'आतो युक् चिण्कृतोः' इति युक च । 'उपधानं तूपबर्हः' इत्यमरः । निषेदुषी = 'षदॢ विशरणगत्यवसादनेषु' इति धातोः निपूर्वात् 'क्वसुश्च' इति लिटः क्वसुः । स्त्रीत्वविवक्षायाम् 'उगितश्च' इति ङीप् । अशेत = 'शीङ् स्वप्ने' इति धातोर्लङि रूपम् । दिवसेषु स्थण्डिल एवाऽवस्थिता सती निशायां तत्रैवाशेतेत्यर्थः । तथा चोक्तं महर्षिणा याज्ञवल्क्येन—

'स्वप्याद्भूमौ शुची रात्रौ दिवसं नियमैर्नयेत् ।
स्थानासनविहारैर्वा योगाभ्यासेन वा तथा ॥' इति ।

भावार्थः—या पार्वती पूर्वं हंसतूलगभशयने शयाना सती, तत्र विवलनपतितैः स्वकेशकुसुमैरपि सुकुमारशरीरत्वात् परितापं प्रापत ; सा सम्प्रति प्रच्छदपटमात्रेणाऽपि रहिते केवले भूतले बाहुलतामुपधानीकृत्योपविष्टैवाशेतेति भावः ।

पार्वत्याः साहजिकविलासादीनां तपश्चरणकाले विराममाह—

पुनर्ग्रहीतुं नियमस्थया तया द्वयेऽपि निक्षेप इवार्पितं द्वयम् ।
लतासु तन्वीषु विलासचेष्टितं विलोलदृष्टं हरिणाङ्गनासु च ॥ १३ ॥

अन्वयः— नियमस्थया तया तन्वीषु लतासु विलासचेष्टितं, हरिणाङ्गनासु विलोलदृष्टं च, द्वये अपि द्वयं पुनः ग्रहीतुं निक्षेपः अर्पितम् इव ॥

व्याख्या—नियमस्थया = व्रतस्थया, तया = पार्वत्या, तन्वीषु = कृशाऽवयवासु, लतासु = वल्लीषु, विलासचेष्टितं = विभ्रमचेष्टितं, हरिणाङ्गनासु = मृगीषु, विलोलदृष्टं च = चञ्चलावलोकितं च, द्वये अपि = उभयत्र अपि, द्वयं = द्वितयं, पुनः = भूयः, ग्रहीतुम् = स्वीकर्तुं, निक्षेपः = न्यासः, अर्पितम् इव = न्यस्तम् इव । न्यासत्वेन समर्पितं किमु इत्यर्थः ।

व्युत्पत्तिः—नियमस्थया = नियमे तिष्ठतीति नियमस्था, तया नियमस्थया ।

लतासु = 'वल्ली तु व्रततिर्लता' इत्यमरः । विलासचेष्टितं = विलास एव चेष्टितम् इति विलासचेष्टितं, 'मयूरव्यंसकादयश्च' इति रूपकसमासः । हरिणाऽङ्गनासु = हरिणानाम् अङ्गनाः हरिणाऽङ्गनाः, तासु हरिणाङ्गनासु । विलोलदृष्टं = विलोलं च तद् दृष्टं विलोलदृष्टम् । द्वये = द्वौ अवयवौ यस्य तत् द्वयं, तस्मिन्द्वये । तयप्, तस्य स्थाने अयजादेशः । निक्षेपः = 'अभीष्टकाले समादातुं सत्यवादिनि भ्रमादिरहिते विश्वसनीये जने धनस्य न्यासो निक्षेप' इत्युच्यते । निक्षिप्यतेऽसाविति व्युत्पत्त्या तद्धनं च निक्षेपशब्दार्थः । अत्र तु निक्षेपशब्दो द्रव्यपरः, निक्षेपक्रियायाः अर्पणक्रियान्वयानुपपत्तेः ।

अत्रोत्प्रेक्षालङ्कारः । तपस्समये निश्चलशरीरायां नासाग्रदत्तलोचनायां च पार्वत्यां विलासविलोलविलोचनयोरदर्शनं लतासु मृगीषु च तद्दर्शनं चात्रोत्प्रेक्षाहेतुः ।

भावार्थः—गृहीतव्रतया पार्वत्या प्रियसङ्गमसमये पुनः स्वीकर्तुं निक्षेपधनमिव सुकुमारासु मालत्यादिलतासु विलासचेष्टा, मृगीषु चञ्चलदृष्टिश्चेत्येतद्द्वयं न्यासीकृतं किमु । तपस्समये निश्चलशरीरायां नासाग्रदत्तलोचनायां च पार्वत्यां विलासविलोलविलोचनयोरदर्शनात्, तदानीं लतासु मृगीषु च तद्दर्शनाच्चेति भावः ।

इत्थमुपक्रान्ततपसः पार्वत्याः समाधेरुपरमे तत्कालोचितां मुनिवृत्तिमुपवर्णयति—

अतन्द्रिता सा स्वयमेव वृक्षकान्घटस्तनप्रस्रवणैर्व्यवर्धयत् ।
गुहोऽपि येषां प्रथमाऽऽप्तजन्मनां न पुत्रवात्सल्यमपाकरिष्यति ॥ १४ ॥

अन्वयः—सा स्वयम् एव अतन्द्रिता सती वृक्षकान् घटस्तनप्रस्रवणैः व्यवर्धयत् । गुहः अपि प्रथमाप्तजन्मनां येषां पुत्रवात्सल्यं न अपाकरिष्यति ।

व्याख्याः—सा = पार्वती, स्वयम् एव=आत्मना एव, अतन्द्रिता=अनलसा सती, वृक्षकान्=स्वल्पवृक्षान्, घटस्तनप्रस्रवणैः=कलशकुचप्रसृतपयोभिः, व्यवर्धयत्=वर्धयामास । गुहः अपि=कुमारः अपि, प्रथमाप्तजन्मनां = पूर्वलब्धजनुषाम्, अग्रजातानामित्यर्थः । येषां=वृक्षकाणां, पुत्रवात्सल्यं = सुतस्नेहं, न अपाकरिष्यति=न दूरीकरिष्यति ।

व्युत्पत्तिः—अतन्द्रिता = तन्द्रा सञ्जाता अस्याः सा तन्द्रिता, तारकादित्वात् इतच्प्रत्ययः । न तन्द्रिता अतन्द्रिता । वृक्षकान् = अल्पा वृक्षा वृक्षकाः, तान् वृक्षकान् । 'अल्पे' इति कप्रत्ययः । घटस्तनप्रस्रवणैः = घटौ एव स्तनौ घटस्तनौ, रूपकसमासः । घटस्तनयोः प्रस्रवणाः घटस्तनप्रस्रवणाः, तैः घटस्तनप्रस्रवणैः । प्रथमा-

ऽऽसजन्मनां=प्रथमे आद्यं प्रथमाऽऽसं, तत् जन्म येषान्ते इति प्रथमाऽऽसजन्मानः, तेषां प्रथमाऽऽसजन्मनां । पुत्रवात्सल्यं=वत्सलस्य भावः कर्म वा वात्सल्यं, ष्यञ्प्रत्ययः । पुत्रस्य वात्सल्यं पुत्रवात्सल्यं, तत् ।

अत्र वात्सल्याऽपाकरणाभावो गुहं प्रति विरुद्ध इति विरोधो नामालङ्कारः ।

भावार्थः—पार्वती परिश्रमखेद परित्यज्य स्वयमेव बीजावापपुरस्सरमुत्तमवृक्षानुत्पाद्य घटोदकेन सिञ्चन्ती तान् पुत्रकल्पानतितरामवर्धयत् । प्रथमलब्धजन्मानां येषां वृक्षकाणां सम्बन्धि सुतप्रेम पश्चाज्जायमानः स्कन्दोऽपि स्वोद्भवानन्तरं न निराकरिष्यतीति भावः ।

सर्वभूतदयापरायां वनमात्रवासिन्यां पार्वत्यां मृगाणामपि विश्वासातिशयमाह—

अरण्यबीजाऽञ्जलिदानलालितास्तथा च तस्यां हरिणा विशश्वसुः ।
यथा तदीयैर्नयनैः कुतूहलात् पुरः सखीनाममिमीत लोचने ॥१५॥

अन्वयः—अरण्यबीजाऽञ्जलिदानलालिताः हरिणाश्च तस्यां तथा विशश्वसुः, यथा कुतूहलात् तदीयैः नयनैः लोचने सखीनां पुरः अमिमीत ।

व्याख्या—अरण्यबीजाऽञ्जलिदानलालिताः=वनबीजाऽञ्जलिवितरणपोषिताः, नीवाराद्यञ्जलिदानपालिता इत्यर्थः । हरिणाश्च=मृगाश्च, तस्यां=पार्वत्यां, तथा=तेन प्रकारेण, विशश्वसुः=विश्वासं जग्मुः, यथा=येन प्रकारेण, कुतूहलात्=औत्सुक्यात्, तदीयैः=हरिणसम्बन्धिभिः, नयनैः=नेत्रैः, करणैः, लोचने=नयने, स्वकीये इति शेषः, सखीनां=वयस्यानां, पुरः=पुरतः, अमिमीत=मानं चकार, नेत्रपरिमाणतारतम्यज्ञानायेत्यर्थः ।

व्युत्पत्तिः—अरण्यबीजाऽञ्जलिदानलालिताः=अरण्यस्य बीजानि अरण्यबीजानि, 'अटव्यरण्यं विपिनं गहनं काननं वनम्' इत्यमरः । अरण्यबीजानाम् अञ्जलयः अरण्यबीजाऽञ्जलयः, तेषां दानम् अरण्यबीजाऽञ्जलिदानं, तेन लालिताः अरण्यबीजाऽञ्जलिदानलालिताः । विशश्वसुः=व्युपसर्गपूर्वकात् श्वस्धातोर्लिट् । तदीयैः=तेषामिमानि तदीयानि, तैः तदीयैः । छप्रत्ययः । सखीनाम्='आलिः सखी वयस्या च' इत्यमरः । अमिमीत='मान् माने' इति धातोर्लङ् ।

केचित्तु सा=पार्वती, तदीयैर्नेत्रैः कुतूहलात्पुरोऽग्रे वर्तमानानां सखीनां लोचने अमिमीत, व्रतस्थत्वान्नात्मन इत्याहुः । इयमेव खलु विश्वासस्य पराकाष्ठा, यदभिपीडनेऽपि मृगाः न क्षुभ्यन्तीति तात्पर्यम् ।

भावार्थः—अञ्जलिपरिमितानामारण्यकनीवारादीनां प्रदानेन परिचिता मृगास्तस्यां पार्वत्यां तथा विश्वासं जग्मुः, यथा मद्विलोचनमृगलोचनयोः कियदन्तरमिति ज्ञातुं बालस्वभावमात्रसुलभादौत्सुक्यात् स्वसखीनामग्रे मृगाणां नयनैः स्वकीये नयनेऽमिमीत, तथापि मृगा न विचेलुरिति भावः ।

इत्थमनुष्ठिताया मुनिवृत्तेः प्रभावातिशयमाह—

कृताऽभिषेकां हुतजातवेदसं त्वगुत्तरासङ्गवतीमधीतिनीम् ।
दिदृक्षवस्तामृषयोऽभ्युपागमन्न धर्मवृद्धेषु वयः समीक्ष्यते ॥ १६ ॥

अन्वयः—कृताऽभिषेकां हुतजातवेदसं त्वगुत्तरासङ्गवतीम् अधीतिनीं तां दिदृक्षवः ऋषयः अभ्युपागमन् । धर्मवृद्धेषु वयः न समीक्ष्यते ।

व्याख्या—कृताऽभिषेकां = कृतस्नानां, हुतजातवेदसं=हुताऽग्निकां, कृतहोमामित्यर्थः । त्वगुत्तरासङ्गवतीं=वल्कलोत्तरीयवतीम्, अधीतिनीं=स्तुतिपाठादिकुर्वतीम्, तां=पार्वतीं, दिदृक्षवः = द्रष्टुमिच्छवः, ऋषयः = मुनयः, अभ्युपागमन् = समुपागताः । धर्मवृद्धेषु=तपोगरिष्ठेषु, वयः=बाल्यादिकं, न समीक्ष्यते=न प्रमाणीक्रियते ।

व्युत्पत्तिः—कृताऽभिषेकां=कृतः अभिषेकः यया सा कृताऽभिषेका, तां कृताऽभिषेकाम्, अनेन शरीरशुद्धिरुक्ता । हुतजातवेदसं = हुतः जातवेदाः यया सा हुतजातवेदाः, तां हुतजातवेदसम् । अनेनान्तःकरणशुद्धिरुक्ता । 'कृपीटयोनिर्ज्वलनो जातवेदास्तनूनपात' इत्यमरः । त्वगुत्तरासङ्गवतीम् = उत्तरे = ऊर्ध्वभागे आसज्यते इति उत्तरासङ्गः, 'षञ्ज सङ्गे' इति धातोर्घञ्प्रत्ययः । 'द्वौ प्रावारोत्तरासङ्गौ समौ बृहतिका तथा । संज्ञानमुत्तरीयं च' इत्यमरः । उत्तरासङ्गः अस्या अस्तीति उत्तरासङ्गवती, मतुप्प्रत्ययः । त्वचा = वल्कलेन, उत्तरासङ्गवती त्वगुत्तरासङ्गवती, तां त्वगुत्तरासङ्गवतीम् । अधीतिनीम् = अधीतम् अस्या अस्तीति अधीतिनी, ताम् अधीतिनीम् । 'इष्टादिभ्यश्च' इति इनिप्रत्ययः, ततः स्त्रीत्वविवक्षायाम् 'ऋन्नेभ्यो ङीप्' इति ङीप् । अनेनात्मशुद्धिरुक्ता । दिदृक्षवः = द्रष्टुम् इच्छवः दिदृक्षवः । सन्नन्तात् 'दृशिर् प्रेक्षणे' इति धातोः 'सनाशंसभिक्ष उः' इति उप्रत्ययः । धर्मवृद्धेषु = धर्मेण वृद्धाः धर्मवृद्धाः, तेषु धर्मवृद्धेषु, स्याद्धर्ममस्त्रियां पुण्यश्रेयसी सुकृतं वृषः' इत्यमरः । वयः = 'खगबाल्यादिनोर्वयः' इत्यमरः ।

चतुर्विधं हि वृद्धत्वम्—वैराग्यवृद्धत्वं, ज्ञानवृद्धत्वं, धर्मवृद्धत्वं, वयोवृद्धत्वं चेति । येषु त्रिविधं वृद्धत्वम्, एकैकं वा, तेषु वयोवृद्धत्वं न प्रयोजकम् । तस्याऽप्राधान्यादित्यर्थः । तथा चाह मनुः—

'न तेन वृद्धो भवति, येनाऽस्य पलितं शिरः ।
यो वै युवाऽप्यधीयानस्तं देवाः स्थविरं विदुः' ॥ इति ।

भावार्थः—बहुकालकृततपसोऽपि तां जिज्ञासवो महर्षयोऽघमर्षणस्नानेन शुद्धशरीरां वह्निहोमेन शुद्धान्तःकरणां वल्कलोत्तरीयवतीं कृतवेदाध्ययनां पार्वतीं द्रष्टुमिच्छवः सन्तः तामभ्युपागमन् । तपोवृद्धेष्ववस्था न निरूप्यत इति भावः ।

तादृशपार्वतीनिवासभूतस्य तपोवनस्यापि प्रभावातिशयमाह—

विरोधिसत्त्वोज्झितपूर्वमत्सरं द्रुमैरभीष्टप्रसवार्चिताऽतिथि ।
नवोटजाऽभ्यन्तरसम्भृतानलं तपोवनं तच्च बभूव पावनम् ॥ १७ ॥

अन्वयः—विरोधिसत्त्वोज्झितपूर्वमत्सरं द्रुमैः अभीष्टप्रसवार्चिताऽतिथि नवोटजाऽभ्यन्तरसम्भृताऽनलं तच्च तपोवनं पावन बभूव ।

व्याख्या—विरोधिसत्त्वोज्झितपूर्वमत्सरं = वैरिजन्तुत्यक्तपूर्ववैरं, हिंसारहितमित्यर्थः । द्रुमैः = वृक्षैः, अभीष्टप्रसवार्चिताऽतिथि = इष्टफलपूजिताऽभ्यागतं, नवोटजाऽभ्यन्तरसम्भृताऽनलं = नूतनपर्णशालाऽन्तःसञ्चिताऽग्नि, तच्च = पार्वत्याश्च, तपोवनं = तपोऽरण्यं, पावनं = पवित्रकारकं, बभूव = अभवत् ।

व्युत्पत्तिः—विरोधिसत्त्वोज्झितपूर्वमत्सरं=विरोधः अस्ति येषां ते विरोधिनः, इनिप्रत्ययः । 'वैरं विरोधो विद्वेषः' इत्यमरः । विरोधिनश्च ते सत्त्वाः विरोधिसत्त्वाः, 'द्रव्याऽसुव्यवसायेषु सत्त्वमस्त्री तु जन्तुषु' इत्यमरः । उज्झितः पूर्वः मत्सरः यस्मिन् तत् उज्झितपूर्वमत्सरं, 'मत्सरोऽन्यशुभद्वेषे तद्वत्कृपणयोस्त्रिषु' इत्यमरः । विरोधिसत्त्वैः उज्झितपूर्वमत्सरं विरोधिसत्त्वोज्झितपूर्वमत्सरम् । अभीष्टप्रसवार्चिताऽतिथि= अभीष्टश्चासौ प्रसवः अभीष्टप्रसवः, 'अभीष्टेऽभीप्सितं हृद्यं दयितं वल्लभ प्रियम्' इति, 'स्यादुत्पादे फले पुष्पे प्रसवो गर्भमोचने' इति चाऽमरः । अर्चिताः अतिथयः यस्मिन् तत् अर्चितातिथि, अभीष्टप्रसवेन अर्चिताऽतिथि अभीष्टप्रसवार्चितातिथि । नवोटजाऽभ्यन्तरसम्भृताऽनलं = नवाश्च ते उटजाः नवोटजाः, 'पर्णशालोटजोऽस्त्रियाम्' इत्यमरः । नवोटजानाम् अभ्यन्तराणि नवोटजाऽभ्यन्तराणि, 'अभ्यन्तरं त्वन्तरालम्' इत्यमरः । सम्भृता, अनलाः यस्मिन् तत् सम्भृताऽनलम्, 'आश्रयाशो बृह-

द्भानुः कृशानुः पावकोऽनलः' इत्यमरः । नवोटजाऽभ्यन्तरेषु सम्भृताऽनलं नवोटजाऽभ्यन्तरसम्भृतानलं । तपोवनं = तपसः वनं तपोवनम् । पावनं = पावयतीति पावनम् । अहिंसाऽतिथिसत्काराऽग्निपरिचर्याभिर्जगत्पावनं बभूवेत्यर्थः ।

भावार्थः—गजसिंहादिजन्तुभिस्त्यक्ताऽनादिवैरं वृक्षमधुरफलपूजिताभ्यागतमभिनवपर्णशालान्तर्गतसंरक्षिताग्नि तत् पार्वतीतपोवनं दर्शनमात्रेणापि शुद्धिकरमासीदिति भावः ।

इत्थमुपवर्णितस्य पार्वत्यास्तपसः परां काष्ठां वर्णयितुमुपक्रमते—

यदा फलं पूर्वतपःसमाधिना न तावता लभ्यममंस्त काङ्क्षितम् ।
तदाऽनपेक्ष्य स्वशरीरमार्दवं तपो महत्सा चरितुं प्रचक्रमे ॥ १८ ॥

अन्वयः—सा यदा तावता पूर्वतपःसमाधिना काङ्क्षितं फलं लभ्यं न अमंस्त, तदा स्वशरीरमार्दवम् अनपेक्ष्य महत् तपः चरितुं प्रचक्रमे ।

व्याख्या—सा = पार्वती, यदा = यस्मिन्काले, तावता = तावत्प्रमाणेन, पूर्वतपःसमाधिना=प्राक्तपोनियमेन, काङ्क्षितं=वाञ्छितं फलं=हरवशीकरणरूपं प्रयोजनं, लभ्यं = प्राप्यं, लब्धं शक्यमित्यर्थः । न अमंस्त=न अज्ञासीत्, अशक्यममंस्तेत्यर्थः । तदा = तत्काले, स्वशरीरमार्दवम् = आत्मदेहसौकुमार्यम् , अनपेक्ष्य = अविगणय्य, महत् = दुश्चरं, तपः = नियमं, चरितुं = साधयितुं, प्रचक्रमे = आरेभे ।

व्युत्पत्तिः—तावता = तत् प्रमाणमस्य तावान् , तेन तावता । पूर्वतपःसमाधिना = तपसः समाधिः तपःसमाधिः, पूर्वश्चाऽसौ तपःसमाधिः । पूर्वतपःसमाधिः, तेन पूर्वतपःसमाधिना, काङ्क्षितं=काङ्क्षा सञ्जाता अस्य तत् काङ्क्षितं तत्, इतच्प्रत्ययः । स्वशरीरमार्दवं=स्वस्य शरीरं स्वशरीरं, मृदोर्भावः मार्दवं, स्वशरीरस्य मार्दवं स्वशरीरमार्दवं, तत् । अनपेक्ष्य न अपेक्ष्य अनपेक्ष्य ।

भावार्थः—सा पार्वती यदा पूर्वोक्तपरिमाणेन तपसा वाञ्छितं हरवशीकरणरूपं फलं लब्धुं न शक्यमिति मन्यते स्म, तदा स्वशरीरस्य शिरीषपुष्पादप्यधिकं सौकुमार्यमविगणय्य कठिनशरीरैरप्यत्यन्तदुश्चरं तपः कर्तुमारेभे इति भावः ।

न केवलं पार्वती दुश्चरे तपसि मनश्चकार, अपितु तपस्समुद्रावगाहनमेव कृतवतीति सविस्मयमाह—

क्लमं ययौ कन्दुकलीलयाऽपि या तया मुनीनां चरितं व्यगाह्यत ।
ध्रुवं वपुः काञ्चनपद्मनिर्मितं मृदु प्रकृत्या च ससारमेव च ॥ १६ ॥

अन्वयः—या कन्दुकलीलया अपि क्लमं ययौ, तया मुनीनां चरितं व्यगाह्यत । ध्रुवम् अस्याः वपुः काञ्चनपद्मनिर्मितम्, अत एव प्रकृत्या मृदु च ससारम् एव च

व्याख्या—या = पार्वती, कन्दुकलीलया अपि=गेन्दुककेलिक्रीडया अपि, क्लमं=ग्लानिं, ययौ = प्राप, तया = देव्या, मुनीनाम् = ऋषीणां, चरितं = चरित्रं, तीव्रं तप इत्यर्थः। व्यगाह्यत = प्रविष्टं, ध्रुवं = निश्चयेन, अस्याः = पार्वत्याः, वपुः=शरीरं, काञ्चनपद्मनिर्मितं = सुवर्णकमलरचितमासीत्, अत एव, प्रकृत्या=स्वभावेन, पद्मस्वभावेनेत्यर्थः। मृदु च = सुकुमारम् अपि, काञ्चनस्वभावेन ससारम् एव च = कठिनम् एव च ।

व्युत्पत्तिः—कन्दुकलीलया=कन्दुकस्य लीला कन्दुकलीला, तया कन्दुकलीलया, व्यगाह्यत = व्युपसर्गपूर्वकात् 'गाहू विलोडने' इति धातोः कर्मणि लङ् । काञ्चनपद्मनिर्मितं=काञ्चनस्य विकारः काञ्चनं, 'चामीकारं जातरूपं महारजतकाञ्चने' इत्यमरः। काञ्चनं च तत् पद्मं काञ्चनपद्मं, तेन निर्मितं काञ्चनपद्मनिर्मितं । प्रकृत्या = 'संसिद्धिः प्रकृती त्विमे । स्वरूपं च स्वभावश्च निसर्गश्च' इत्यमरः । ससारं = सारेण सहितं ससारम् । अत्र श्लोके उत्प्रेक्षाऽलङ्कारः। सुवर्णोत्पादकत्वात्पार्वत्याः शरीरस्य सुकुमारस्याऽपि तीव्रतपःसमर्थत्वमस्तीत्युत्प्रेक्षाऽर्थः ।

भावार्थः—या पार्वती पूर्वं कन्दुककेलिक्रीडयाऽपि शरीरसादं प्राप, तया पार्वत्या कठिनशरीराणां महर्षिणामत्यन्तदुश्चरतपश्चरणरूपो व्यापारोऽवजगाहे । तेनेदमनुमीयते, यत् पार्वत्याः शरीरं सुवर्णकमलविरचितमासीत् । अत एव कमलस्वभावेन सुकुमारमपि सुवर्णस्वभावेन कठिनमेवाभूदिति भावः ।

अथ पार्वत्यास्तपःप्रकारा एव कथ्यन्ते । तत्रादौ ग्रीष्मकृतं तपःप्रकारमाह—

शुचौ चतुर्णां ज्वलतां हविर्भुजां शुचिस्मिता मध्यगता सुमध्यमा ।
विजित्य नेत्रप्रतिघातिनीं प्रभामनन्यदृष्टिः सवितारमैक्षत ॥ २० ॥

अन्वयः—शुचौ शुचिस्मिता सुमध्यमा ज्वलतां चतुर्णां हविर्भुजां मध्यगता सती नेत्रप्रतिघातिनीं प्रभां विजित्य अनन्यदृष्टिः सती सवितारम् ऐक्षत ।

व्याख्या—शुचौ = ग्रीष्मे, शुचिस्मिता = विशदमन्दहासा, सुमध्यमा=सुमध्या, सा पार्वतीत्यर्थः । ज्वलतां = दीप्तिमतां, चतुर्णां=चतुःसंख्याकानां, पुरतः पृष्ठे पार्श्वयोश्च स्थापितानामित्यर्थः । हविर्भुजाम् = अग्नीनां, मध्यगता = मध्यस्थिता सती, नेत्रप्रतिघातिनीम् = दृक्प्रतिहतिकारिणीं, प्रभां = तेजः, सूर्यस्येत्यर्थः । विजित्य = अभिभूय, अनन्यदृष्टिः=अन्यत्रास्थितनेत्रा, सती, सवितारं = सूर्यम्, ऐक्षत=ददर्श ।

व्युत्पत्तिः—शुचौ = 'शुचिर्ग्रीष्माऽग्निशुद्धारेष्वाषाढे शुद्धमान्त्रणि । उपेष्टे च पुंसि धवले शुद्धेऽनुपहते त्रिषु ॥' इति मेदिनी । शुचिस्मिता = शुचि स्मितं यस्याः सा शुचिस्मिता, 'शुक्लशुभ्रशुचिश्वेतविशदश्वेतपाण्डराः' इत्यमरः । 'ईषद्विकासि नयनं स्मितं स्यात् स्पन्दिताऽधरम्' इति साहित्यदर्पणः । सुमध्यमा = शोभनं मध्यमं यस्याः सा सुमध्यमा । 'मध्यमं चाऽवलग्नं च मध्योऽस्त्री' इत्यमरः । ज्वलतां = ज्वलन्ति इति ज्वलन्तः, तेषां ज्वलतां, 'ज्वल् दीप्तौ' इति धातोः लटः शत्रादेशः । हविर्भुजां = हवींषि भुञ्जन्तीति हविर्भुजः, तेषां हविर्भुजाम् । मध्यगता = मध्यं गता मध्यगता, 'द्वितीया श्रितातीतपतितगताऽत्यस्तप्राप्ताऽऽपन्नैः' इति द्वितीयातत्पुरुषः । नेत्रप्रतिघातिनीं = नेत्रे प्रतिहन्तीति तच्छीला नेत्रप्रतिघातिनी, तां नेत्रप्रतिघातिनीं, विनिप्रत्ययः, तदन्तान्ङीप् । अनन्यदृष्टिः = न विद्यते अन्यत्र दृष्टिर्यस्याः सा अनन्यदृष्टिः । सवितारं = 'भानुर्हंसः सहस्रांशुस्तपनः सविता रविः' इत्यमरः । ऐक्षत = 'ईक्ष् दर्शने' इति धातोर्लङ् । 'ग्रीष्मे पञ्चाऽग्निमध्यस्थो वर्षासु स्थाण्डिलेशयः' इति स्मरणात् पञ्चाऽग्निमध्ये तपश्चचारेत्यर्थः । तत्र सवितैव पञ्चमोऽग्निः । 'अग्निः सविता सवितैवाऽग्निः' इति श्रौतलिङ्गात् ।

भावार्थः—कृशावलग्ना सा पार्वती ग्रीष्मे चतुर्णां (पुरतः पृष्ठे पार्श्वयोश्च) स्थापितानां प्रदीप्तानामग्नीनां मध्यभागस्थिता सती द्रष्टुर्नेत्रयोश्चाकचिक्यप्रदां सूर्यरश्मिसततास्यासेन न्यग्भाव्योदयादारभ्यास्तमयपर्यन्तमन्यत किमप्यनवलोकयन्ती सती केवलं सूर्यमेवावलोकयन्ती पञ्चाग्निसाधनं तपश्चचारेति भावः ।

हेतुकमौज्ज्वल्यमेवाभूदित्याह—

तथाऽतितप्तं सवितुर्गभस्तिभिर्मुखं तदीयं कमलश्रियं दधौ ।
अपाङ्गयोः केवलमस्य दीर्घयोः शनैः शनैः श्यामिकया कृतं पदम् ॥२१॥

अन्वयः—सवितुः गभस्तिभिः तथा अतितप्तं तदीयं मुखं कमलश्रियं दधौ, अस्य दीर्घयोः अपाङ्गयोः केवलं शनैः शनैः श्यामिकया पदं कृतम् ।

व्याख्या—सवितुः = सूर्यस्य, गभस्तिभिः = किरणैः, तथा = तेन प्रकारेण, पूर्वोक्तप्रकारेणेत्यर्थः । अतितप्तं = सन्तप्तं, तदीय = पार्वत्याः, मुखम् = आननं, कमलश्रियं = पद्मशोभां, दधौ = प्राप, किन्तु, अस्य = मुखस्य, दीर्घयोः = आयतयोः, अपाङ्गयोः = नेत्राऽन्तयोः, केवलम्=एव, शनैः शनैः=मन्दं मन्दं, श्यामिकया=कालिम्ना, पदं = स्थानं, कृतं = विहितम् । नेत्राऽन्तयोः सौकुमार्यादित्यर्थः ।

व्युत्पत्तिः—गभस्तिभिः = 'किरणोऽस्रमयूखांऽशुगभस्तिघृणिरश्मयः' इत्यमरः । अतितप्तम् = अत्यन्तं तप्तम् अतितप्तम, 'सुप्सुपा' इति समासः । तदीयं = तस्या इदं तदीयं, छप्रत्ययः । कमलश्रियं = कमलस्य श्रीः कमलश्रीः, तां कमलश्रियम् । अपाङ्गयोः = 'अपाङ्गौ नेत्रयोरन्तौ' इत्यमरः ।

भावार्थः—सूर्यकिरणैः सन्तप्तं पार्वतीमुखं सूर्यरश्मिसंयोगे सति कमलमिव शुशुभे, न तु मम्लौ । किन्तु प्रकृतिमृदुत्वात् आयतयोस्तदीयनेत्रप्रान्तभागयोः केवलं कालिम्ना मन्दमन्दमवस्थानं कृतमिति भावः ।

तदवस्थायाः पार्वत्याः शरीरयात्रामाह—

अयाचितोपस्थितमम्बु केवलं रसात्मकस्योडुपतेश्च रश्मयः ।
बभूव तस्याः किल पारणाविधिर्न वृक्षवृत्तिव्यतिरिक्तसाधनः ॥ २२ ॥

अन्वयः—अयाचितोपस्थितं केवलम् अम्बु, रसात्मकस्य उडुपतेः रश्मयश्च, तस्याः पारणाविधिः बभूव किल । वृक्षवृत्तिव्यतिरिक्तसाधनः पारणाविधिः न बभूव ।

व्याख्या—अयाचितोपस्थितम् = अप्रार्थितोपनतं, केवलं = तन्मात्रम्, अम्बु = उदकं, रसात्मकस्य = अमृतमयस्य, उडुपतेः = तारापतेः, चन्द्रस्येत्यर्थः । रश्मयश्च= किरणाश्च, तस्याः = पार्वत्याः, पारणाविधिः = भक्षणकर्म, बभूव किल = अभवत् किल । तावन्मात्रसाधनकोऽभूदित्यर्थः । वृक्षवृत्तिव्यतिरिक्तसाधनः = तरुवर्तनाऽधिकोपायः, पारणाविधिः = भक्षणकर्म, न बभूव = न अभवत् ।

व्युत्पत्तिः—अयाचितोपस्थितं = न याचितम् अयाचितं, तच्च तत् उपस्थितम् अयाचितोपस्थितम् । अम्बु = 'अम्भोर्णस्तोयपानीयनीरक्षीराऽम्बुशम्बरम्' इत्यमरः ।

रसात्मकस्य=रसः आत्मा यस्य स रसात्मकः, तस्य रसात्मकस्य, समासाऽन्तः कप्। उडुपतेः = उडूनां पतिः उडुपतिः, तस्य उडुपतेः, 'नक्षत्रमृक्षं भं तारा तारकाऽप्युडु वा स्त्रियाम्' इत्यमरः। पारणाविधिः = पारणायाः विधिः पारणाविधिः। किल=इदं पदं प्रसिद्ध्यर्थकम्। साध्यसाधनयोः अभेदेन व्यवहारः साधनान्तरव्यावृत्तिनिमित्तकः। वृक्षवृत्तिव्यतिरिक्तसाधनः=वृक्षाणां वृत्तिः वृक्षवृत्तिः, 'आजीवो जीविका वार्ता वृत्तिर्वर्तनजीवने' इत्यमरः। विशेषेण अतिरिक्तं व्यतिरिक्तं, 'सुप्सुपा' इति समासः। 'अतिरिक्तः समधिकः' इत्यमरः। वृक्षवृत्तेः व्यतिरिक्तं वृक्षवृत्तिव्यतिरिक्तं, तत् साधनं यस्य सः वृक्षवृत्तिव्यतिरिक्तसाधनः, वृक्षोऽपि अयाचितोपस्थितेन मेघजलेन इन्दुकिरणैश्च जीवतीति प्रसिद्धम्। पार्वत्यपि तावन्मात्रमवालम्बतेत्यर्थः।

भावार्थः—घर्मकालपर्यन्तमुपोषितायाः पार्वत्यास्तदवसानसुलभानि मेघजलानि, दिनावसानपर्यन्तमुपोषितायास्तु निशायां चन्द्ररश्मयश्च व्रतसमाप्तिभोजनं बभूव। किं बहुना पूर्वोक्तवृक्षजीवनोपायातिरिक्तं कन्दमूलफलादिकमुपोषितभोजनं न बभूवेति भावः।

इत्थमुपवर्णितं ग्रीष्मकालकृतं तपो वर्षारम्भवृत्तान्तकथनेनोपसंहरति—

निकामतप्ता विविधेन वह्निना नभश्चरेणेन्धनसम्भृतेन सा।
तपात्यये वारिभिरुक्षिता नवैर्भुवा सहोष्माणममुञ्चदूर्ध्वगम्॥ २३॥

अन्वयः—विविधेन नभश्चरेण इन्धनसम्भृतेन वह्निना निकामतप्ता सा तपात्यये नवैः वारिभिः उक्षिता सती, भुवा सह ऊर्ध्वगम् ऊष्माणम् अमुञ्चत्।

व्याख्या—विविधेन = अनेकप्रकारेण, पञ्चविधेनेत्यर्थः। नभश्चरेण=खेचरेण, आदित्यरूपेणेत्यर्थः। इन्धनसम्भृतेन=काष्ठसमिद्धेन, वह्निना=अग्निना, निकामतप्ता=अतिसन्तप्ता, सा=पार्वती, तपात्यये=ग्रीष्मान्ते, प्रावृषीत्यर्थः। नवैः=नूतनैः, वारिभिः=जलैः, उक्षिता=सिक्ता सती, भुवा=पृथिव्या, पञ्चाऽग्नितप्तयेति शेषः, सह = सार्धम्, ऊर्ध्वगम् = ऊर्ध्वस्थम्, ऊष्माण = बाष्पम्, अमुञ्चत्=तत्याज।

व्युत्पत्तिः—विविधेन=विविधाः विधाः प्रकाराः यस्य स विविधः तेन, विविधेन। नभश्चरेण=चरतीति चरः, 'चरेष्टः' इति टप्रत्ययः। नभसः चरः नभश्चरः, तेन नभश्चरेण, 'नभोऽन्तरिक्षं गगनमनन्तं सुरवर्त्म खम्' इत्यमरः। इन्धनसम्भृतेन=इन्धनैः सम्भृतः इन्धनसम्भृतः, तेन इन्धनसम्भृतेन। 'काष्ठं दार्विन्धनं स्वेध इध्ममेधः समित्स्त्रियाम्' इत्यमरः। निकामतप्ता=निकामं तप्ता निकामतप्ता, 'सुप्सुपा' इति

समासः । तपाऽत्यये = तपस्य अत्ययः तपाऽत्ययः, तस्मिन् तपात्यये, 'ग्रीष्म उष्मकः । निदाघ उष्णोपगम उष्ण ऊष्मागमस्तपः' इत्यमरः । ऊर्ध्वगम्=ऊर्ध्वं गच्छतीति ऊर्ध्वगः, तम् ऊर्ध्वगम । ऊष्माणम् = 'ग्रीष्मोष्मबाष्पमूष्माणम्' इति यादवः ।

अत्र सहोक्तिरलङ्कारः । तल्लक्षणं यथा—

'सा सहोक्तिः सहार्थस्य बलादेकं द्विवाचकम्' इति ।

भावार्थः—इत्थं गगनस्थेन सूर्याग्निना काष्ठप्रज्वलितेन च भूतलाग्निना पञ्चविधेन भृशं सन्तप्ता सती, पुनश्च ग्रीष्मावसाने वर्षारम्भसम्भूतैः नूतनजलैः सिक्ता च सती सा पार्वती, ग्रीष्मकाले सन्तप्ता वर्षारम्भे जलैरुक्षिता भूमिरिवोर्ध्वगामि बाष्पं मुमोचेति भावः ।

इत्थं ग्रीष्मकालकृतं तप उपवर्ण्य सम्प्रति वार्षिकं तपो वर्णयितुमुपक्रमते—

स्थिताः क्षणं पक्ष्मसु ताडिताऽधराः पयोधरोत्सेधनिपातचूर्णिताः ।
वलीषु तस्याः स्खलिताः प्रपेदिरे चिरेण नाभिं प्रथमोदबिन्दवः ॥२४॥

अन्वयः—प्रथमोदबिन्दवः तस्याः पक्ष्मसु क्षणं स्थिताः ताडिताऽधराः पयोधरोत्सेधनिपातचूर्णिताः वलीषु स्खलिताः चिरेण नाभिं प्रपेदिरे ।

व्याख्या—प्रथमोदबिन्दवः=पूर्वजलपृषताः, प्रथमविशेषणात् बिन्दूनां विरलत्वं, बहुवचनान्नातिविरलत्वं च गम्यते । तथा च चिरत्वेनाभ्यन्तरगमनयोर्निर्वाहः । तस्याः = पार्वत्याः, पक्ष्मसु = नेत्रलोमसु, क्षणं = कञ्चित्कालं, स्थिताः = स्थितिं गताः, 'स्थिता' इत्यनेन पक्ष्मणां सान्द्रत्वं, क्षणमित्यनेन स्निग्धत्वं च गम्यते । अनन्तरम्, ताडिताऽधराः=व्यथितोष्ठाः, एतेन अधरस्य मृदुत्वं गम्यते । ततः पयोधरोत्सेधनिपातचूर्णिताः=कुचोपरिभागपतनजर्जरिताः, कुचकाठिन्यादित्यर्थः । तदनु, वलीषु= उदररेखासु, स्खलिताः=पतिताः, निम्नोन्नतत्वादित्यर्थः । इत्थम्, चिरेण = बहुसमयेन, न तु शीघ्रं, प्रतिबन्धबाहुल्यादिति शेषः । नाभिं=तुन्दिं, प्रपेदिरे=प्रविष्टाः, न तु निर्जग्मुरित्यर्थः । एतेन नाभेर्गाम्भीर्यं गम्यते ।

व्युत्पत्तिः—प्रथमोदबिन्दवः = उदकस्य बिन्दवः उदबिन्दवः, 'मन्थौदनसक्तुबिन्दुवज्रभारहारवीवधगाहेषु च' इति उदकशब्दस्य उदादेशः । 'कबन्धमुदकं पाथः पुष्करं सर्वतोमुखम्' इति, 'पृषन्ति बिन्दुपृषताः पुमांसो विप्रुषः स्त्रियः' इत्यप्यमरः । प्रथमे च ते उदबिन्दवः प्रथमोदबिन्दवः । ताडिताऽधराः = ताडितः अधरः यैस्ते

ताडिताऽधराः । पयोधरोत्सेधनिपातचूर्णिताः = धरतस्तौ धरौ, धृञ् धारणे' पचाद्यच् । पयसां धरौ पयोधरौ, 'स्त्रीस्तनाऽऽद्यौ पयोधरौ' इत्यमरः । पयोधरयोः उत्सेधः पयोधरोत्सेधः, तस्मिन्निपातः, तेन चूर्णिताः पयोधरोत्सेधनिपातचूर्णिताः । नाभिः = 'नाभिर्द्वयोस्तुन्दकूपौ तुन्दिस्तुन्दीकरः पुमान्' इति त्रिकाण्डशेषः । अत्र श्लोके प्रतिपदमर्थवत्त्वात् परिकरालङ्कारः । काव्यप्रकाशे तल्लक्षणं यथा—

'विशेषणैर्यत्साकूतैरुक्तिः परिकरस्तु सः' । इति ।

भावार्थः—वर्षारम्भसमयभाविप्रथमजलबिन्दवो नेत्ररोमसु क्षणकालमवस्थिताः, अत्युच्चस्थानादतिकठिनस्तनतटनिपातेन परमाणुतां प्राप्ताः, पुनश्च सम्भूयाऽधोगमनारम्भे वलित्रये स्खलनं प्राप्ताः सन्तो महता समयेन पार्वत्याः निम्ननाभिप्रदेशं प्रविविशुरिति भावः ।

वार्षिकं तपःप्रकारमेवाह—

शिलाशयां तामनिकेतवासिनीं निरन्तरास्वन्तरवातवृष्टिषु ।
व्यलोकयन्नुन्मिषितैस्तडिन्मयैर्महातपःसाक्ष्य इव स्थिताः क्षपाः ॥ २५ ॥

अन्वयः—निरन्तरासु अन्तरवातवृष्टिषु अनिकेतवासिनीं शिलाशयां तां महातपःसाक्षये स्थिताः क्षपाः तडिन्मयैः उन्मिषितैः व्यलोकयन् इव ।

व्याख्या—निरन्तरासु = नीरन्ध्रासु, अविच्छिन्नासु इत्यर्थः । अन्तरवातवृष्टिषु = मध्यवायुवर्षेषु, अनिकेतवासिनीम् = अगृहवासिनीम्, अनावृतदेशवासिनीमित्यर्थः । शिलाशयां = प्रस्तरशायिनीं, तां = पार्वतीं, महातपःसाक्षये = दुष्करतपःसाक्षिणे, स्थिताः = विद्यमानाः, क्षपाः=रात्रयः, तडिन्मयैः = विद्युद्रूपैः, उन्मिषितैः=अवलोकनैः, व्यलोकयन् इव = ददृशुः इव ।

व्युत्पत्तिः—निरन्तरासु=निर्गतम् अन्तरं याभ्यस्ताः निरन्तराः, तासु निरन्तरासु। अन्तरवातवृष्टिषु = अन्तरे वातः यासां ताः अन्तरवाताः, 'अन्तरमवकाशाऽवधिपरिधानाऽन्तर्धिभेदतादर्थ्ये । छिद्रात्मीयविनाबहिरवसरमध्येऽन्तरात्मनि च ॥' इत्यमरः। अन्तरवाताश्च ता वृष्टयः अन्तरवातवृष्टयः, तासु अन्तरवातवृष्टिषु। अनिकेतवासिनीं =निकेते=गृहे, वसतीति तच्छीला निकेतवासिनी, न निकेतवासिनी अनिकेतवासिनी, ताम् अनिकेतवासिनीं । शिलाशयां = शिलायां शेते शिलाशया, तां शिलाशयाम् । 'अधिकरणे शेतेः' इत्यचप्रत्ययः । महातपःसाक्षये = साक्षाद् द्रष्टा साक्षी, 'साक्षाद्

द्रष्टरि संज्ञायाम्' इति इनिप्रत्ययः। साक्षिणः कर्म साक्ष्यं, ष्यञ्प्रत्ययः। महच्च तत् तपः महातपः, 'आन्महतः समानाऽधिकरणजातीययोः' इति महत आत्वम्। महातपसः साक्ष्यं महातपःसाक्ष्यं, तस्मिन् महातपःसाक्ष्ये। क्षपाः = 'निशा निशीथिनी रात्रिक्षियामा क्षणदा क्षपा' इत्यमरः। तडिन्मयैः = तडितः एव तडिन्मयानि, तैः तडिन्मयैः, स्वार्थे मयट्। 'प्रत्यये भाषायां नित्यम्' इत्यनुनासिकः।

अत्र श्लोके उत्प्रेक्षालङ्कारः। इवेति चक्षुषा विलोकनमेव उत्प्रेक्ष्यते। साक्ष्यं तु—

'आदित्यचन्द्रावनिलोऽनलश्च द्यौर्भूमिरापो हृदयं यमश्च।
अहश्च रात्रिश्च उभे च सन्ध्ये धर्मश्च जानाति नरस्य वृत्तम् ॥'

इति महाभारतप्रमाणसिद्धत्वात् न उत्प्रेक्ष्यमिति चानुसन्धेयम्।

भावार्थः—निबिडधारास्वनवरतप्रवृत्तमारुतासु वृष्टिप्वनावृतदेशवासिनीं शिलातलशायिनीं तां पार्वतीं महातपःकर्मसाक्षित्वे विद्यमाना रात्रयो विद्युद्रूपैरक्षिपक्ष्मोद्घाटनैरवलोकयामासुरिव।

एवं वर्षासु विहितं तपःप्रकारमुक्त्वा सम्प्रति हेमन्ते तपश्चरणप्रकारमाह—

निनाय साऽत्यन्तहिमोत्किराऽनिलाः सहस्यरात्रीरुदवासतत्परा।
परस्पराक्रन्दिनि चक्रवाकयोः पुरो वियुक्ते मिथुने कृपावती ॥ २६ ॥

अन्वयः—सा अत्यन्तहिमोत्किरानिलाः सहस्यरात्रीः उदवासतत्परा परस्पराक्रन्दिनि पुरः वियुक्ते चक्रवाकयोः मिथुने कृपावती सती निनाय।

व्याख्या—सा = पार्वती, अत्यन्तहिमोत्किराऽनिलाः = अत्यर्थंतुहिनक्षेपिवाताः, सहस्यरात्रीः = पौषरजनीः, उदवासतत्परा = जलनिवासासक्ता, परस्पराक्रन्दिनि = अन्योन्याक्रोशिनि, पुरः = अग्रे, वियुक्ते = विरहिणि, वियोगयुक्ते इत्यर्थः। चक्रवाकयोः = चक्रवाक्याः चक्रवाकस्य च, मिथुने = द्वन्द्वे, कृपावती = दयावती सती, निनाय = यापयामास।

व्युत्पत्तिः—अत्यन्तहिमोत्किराऽनिलाः = उत्किरन्तीति उत्किराः 'कॄ विक्षेपे' इति धातोः 'इगुपधज्ञाप्रीकिरः क' इति कप्रत्ययः। हिमानाम् उत्किराः हिमोत्किराः, अत्यन्तं हिमोत्किराः अतिहिमोत्किराः, ते अनिलाः यासु ताः अत्यन्तहिमोत्किराऽनिलाः, ताः। सहस्यरात्रीः = सहसि = बले, साधुः सहस्यः, 'तत्र साधुः' इति यत्प्रत्ययः। 'पौषे तैषसहस्यौ द्वौ' इत्यमरः। सहस्यस्य रात्रयः सहस्यरात्रयः, ताः

सहस्यरात्रीः । उदवासतत्परा = उदके वासः उदवासः, 'पेषंवासवाहनधिषु च' इत्युदकस्य उदादेशः । उदवासे तत्परा उदवासतत्परा । परस्पराक्रन्दिनि=आक्रन्दतीति आक्रन्दि, परस्परं यथा स्यात्तथा आक्रन्दि परस्पराक्रन्दि, तस्मिन् परस्पराक्रन्दिनि। वियुक्ते = युक्तं योगः, विगतं युक्तं यस्य तत् वियुक्तं, तस्मिन् वियुक्ते। चक्रवाकयोः = चक्रवाकी च चक्रवाकश्च चक्रवाकौ, तयोः चक्रवाकयोः, 'पुमान्स्त्रिया' इत्येकशेषः। मिथुने = 'स्त्रीपुंसौ मिथुनं द्वन्द्वम्' इत्यमरः । कृपावती = कृपा अस्ति यस्याः सा कृपावती, मतुप्प्रत्ययः । निनाय = 'णीञ् प्रापणे' इति धातोर्लिट्, हेमन्ते जलाधिवास उक्तो मनुना यथा—

'अप्सु वासस्तु हेमन्ते क्रमशो वर्धयंस्तपः' । इति ।

भावार्थः—सा पार्वती हैमपवनातिशीतलाः पौषरजनीः (हेमन्तकालरजनीः) जलाधिवासनियता सती पुरोभागेऽन्योन्याक्रोशिनि विरहिणि चक्रवाकीचक्रवाकयोर्द्वन्द्वे दयमाना सती यापयामासेति भावः ।

इत्थमुग्रे तपसि वर्तमानाया अपि पार्वत्या वदनमुज्ज्वलमेवाभूदिति भङ्ग्यन्तरेणाह—

मुखेन सा पद्मसुगन्धिना निशि प्रवेपमानाऽधरपत्रशोभिना ।
तुषारवृष्टिक्षतपद्मसम्पदां सरोजसन्धानमिवाकरोदपाम् ॥ २७ ॥

अन्वयः—सा निशि पद्मसुगन्धिना प्रवेपमानाऽधरपत्रशोभिना मुखेन तुषारवृष्टिक्षतपद्मसम्पदाम् अपां सरोजसन्धानम् अकरोत् इव ।

व्याख्या—सा = पार्वती, निशि = रात्रौ, पद्मसुगन्धिना = कमलसुरभिणा, प्रवेपमानाऽधरपत्रशोभिना = प्रकम्पमानोष्ठदलशोभिना, मुखेन = आननेन, तुषारवृष्टिक्षतपद्मसम्पदां = तुहिनवर्षनाशितकमलसम्पत्तीनाम्, अपां = जलानां, सरोजसन्धानं = कमलसङ्घट्टनम्, अकरोत् इव = व्यधत्त इव ।

व्युत्पत्तिः – पद्मसुगन्धिना = शोभनः गन्धः यस्य सः सुगन्धिः, 'गन्धस्येदुत्पूतिसुसुरभिभ्यः' इति इत्वम् । पद्मम् इव सुगन्धिः पद्मसुगन्धिः, 'उपमानानि सामान्यवचनैः' इति समासः । तेन पद्मसुगन्धिना । प्रवेपमानाऽधरपत्रशोभिना = प्रवेपते इति प्रवेपमानः, 'टुवेपृ कम्पने' इति धातोः शानच्, 'आने मुक्' इति मुगागमः । प्रवेपमानश्चाऽसौ अधरः प्रवेपमानाऽधरः । प्रवेपमानाऽधर एव पत्रं प्रवेपमानाऽधरपत्रं, 'पत्रं पलाशं छदनं दलं पर्ण छदः पुमान्' इत्यमरः । प्रवेपमानाऽ-

धरपत्रेण शोभते तच्छीलं प्रवेपमानाऽधरपत्रशोभि, तेन प्रवेपमानाधरपत्रशोभिना । तुषारवृष्टिक्षतपद्मसम्पदां = तुषाराणां वृष्टिः तुषारवृष्टिः, तया क्षताः तुषारवृष्टिक्षताः, पद्मानां सम्पदः पद्मसम्पदः । तुषारवृष्टिक्षताः पद्मसम्पदः यासां ताः, तुषारवृष्टिक्षतपद्मसम्पदः, तासां तुषारवृष्टिक्षतपद्मसम्पदां । सरोजसन्धानं = सरसि जातानि सरोजानि, तेषां सन्धानं सरोजसन्धानं, तत् ।

अत्र हेमन्ते तुषारवर्षणादितरेषु सरोजेषु विनष्टेषु, पार्वत्याः वदनसरोजमेव जले तदानीं सरोजसन्ततिविच्छेदाभावमकरोदिवेत्यभिधानादुत्प्रेक्षाऽलङ्कारः । अधरस्य पत्ररूपणान्मुखस्य पद्मरूपणमर्थादायातमित्येकदेशविवर्ति रूपकं च । अन्यत् कमलं हिमेन उपहन्यते तन्मुखकमलं तु न तथा, इति व्यतिरेकाऽलङ्कारोऽपि व्यज्यत इत्येतेषां सङ्करः ।

भावार्थः—उदवासतत्परत्वादुदके मुखमात्रदृश्या सा पार्वती हेमन्तरात्रौ कमलवत्सुरभिणा शीतवशात् कम्पमानोष्ठदलसुन्दरेण मुखेन हिमनष्टपङ्कजसमृद्धीनां जलानामविच्छिन्नपङ्कजसम्बन्धमिव चकारेति भावः ।

अथास्यन्तदुश्चरं तपोविशेषमाह—

स्वयंविशीर्णद्रुमपर्णवृत्तिता परा हि काष्ठा तपसस्तया पुनः ।
तदप्यपाकीर्णमतः प्रियंवदां वदन्त्यपर्णेति च तां पुराविदः ॥ २८ ॥

अन्वयः—स्वयंविशीर्णद्रुमपर्णवृत्तिता तपसः परा काष्ठा हि । तया पुनः तत् अपि अपाकीर्णम्, अतः प्रियंवदां तां पुराविदः अपर्णा इति च वदन्ति ।

व्याख्या—स्वयंविशीर्णद्रुमपर्णवृत्तिता = स्वतश्च्युतवृक्षपत्रवर्तनत्वं, तपसः = नियमस्य, परा काष्ठा हि = परम् उत्कर्षो हि, तया = पार्वत्या, पुनः, तत् अपि=पर्णवर्तनम् अपि, अपाकीर्णम् = अपाकृतम्, अतः = अस्मात् हेतोः पर्णभक्षणत्यागात् हेतोरित्यर्थः । प्रियंवदां = हृद्यभाषिणीं, तां = पार्वतीं, पुराविदः = पुराणज्ञाः, अपर्णा इति च, वदन्ति = कथयन्ति ।

व्युत्पत्तिः—स्वयंविशीर्णद्रुमपर्णवृत्तिता=स्वयं विशीर्णानि स्वयंविशीर्णानि, द्रुमस्य पर्णानि द्रुमपर्णानि । स्वयंविशीर्णानि द्रुमपर्णानि एव वृत्तिर्यस्य स स्वयंविशीर्णद्रुमपर्णवृत्तिः, तस्य भावः स्वयंविशीर्णद्रुमपर्णवृत्तिता, 'आजीवो जीविका वार्ता वृत्तिर्वर्त-

नजीवने' इत्यमरः । काष्ठा = 'काष्ठोत्कर्षे स्थितौ दिशि' इत्यमरः । प्रियंवदां = प्रियं वदतीति प्रियंवदा, तां प्रियंवदां, 'प्रियवशे वदः खच्' इति खच्प्रत्ययः, 'अरुर्द्विषद्-जन्तस्य मुम्' इति मुमागमश्च । पुराविदः = पुरा=पुराणं, विदन्तीति पुराविदः, 'पुरा पुराणे निकटे प्रबन्धाऽतीतभाविषु' इति मेदिनी । अपर्णा = अविद्यमानं भक्ष्य-त्वेन पर्णम्, अपि यस्याः सा अपर्णा । 'अपर्णा पार्वती दुर्गा मृडानी चण्डिकाऽम्बिका' इत्यमरः ।

अत्र 'अपर्णाम्' इति अपपाठः । इति शब्दाऽभिहितेन द्वितीयाया अनुपपत्तेः । यथाऽऽह वामनः-'निपातेनाऽप्यभिहिते कर्मणि न कर्मविभक्तिः, परिगणनस्य प्राधि-कत्वात्' इति मल्लिनाथः ।

भावार्थः—कालपरिपाकवशात् स्वयमेव पतितैर्वृक्षाणां जीर्णपत्रैर्जीवनं हि तपश्च-र्यायाश्चरमसीमा भवति । तया पार्वत्या पुनः स्वयं पतितजीर्णपर्णभक्षणमपि परित्य-क्तम् । अत एव पूर्ववृत्तान्तवेदिनो मधुरभाषिणीं पार्वतीं नाम्नाऽपर्णेत्यजुहुवुरिति भावः ।

अथैवं क्रियमाणस्य तपसः सिद्धिमाह—

मृणालिकापेलवमेवमादिभिर्व्रतैः स्वमङ्गं ग्लपयन्त्यहर्निशम् ।
तपः शरीरैः कठिनैरुपार्जितं तपस्विनां दूरमधश्चकार सा ॥ २६ ॥

अन्वयः मृणालिकापेलवं स्वम् अङ्गम् एवमादिभिः व्रतैः अहर्निशं ग्लपयन्ती सा कठिनैः शरीरैः उपार्जितं तपस्विनां तपः दूरम् अधश्चकार ।

व्याख्या—मृणालिकापेलवं=पद्मिनीकन्दकोमलं, स्वम्=स्वकीयम्, अङ्गं=शरीरम्, एवमादिभिः = पूर्वोक्तजलादिवासैः, व्रतैः=नियमैः, अहर्निशम्=अहोरात्रं, ग्लपयन्ती= कर्शयन्ती, सा = पार्वती, कठिनैः=कठोरैः, क्लेशसहैरित्यर्थः । शरीरैः=देहैः, उपा-र्जितं = सम्पादितं, तपस्विनां = तापसानां, तपः = नियमविशेषं, दूरम् = अत्यन्तम्, अधश्चकार = तिरश्चकार, अतिशिश्ये इत्यर्थः ।

व्युत्पत्तिः—मृणालिकापेलवं=मृणालिका इव पेलवम् इति मृणालिकापेलवं, तत्, एवमादिभिः = एवम्=उक्तप्रकारतोयाऽग्निमध्यवासव्रतम्, आदिः येषां तानि एवमा-दीनि, तैः एवमादिभिः । अहर्निशम्=अहश्च निशा च अहर्निशं, तत् । समाहारे द्वन्द्वै-कवद्भावः । अत्यन्तसंयोगे द्वितीया । कठिनैः='कर्कशं कठिनं क्रूरं कठोरं निष्ठुरं दृढम्' इत्यमरः । तपस्विनां = तपः अस्ति येषां ते तपस्विनः, तेषां तपस्विनां, 'तपःसह-स्राभ्यां विनीनी' इति विनिप्रत्ययः ।

अनेन तपःसिद्धिकथनेन तपोवर्णनमुपसंहृतमित्यवसेयम् ।

भावार्थः—पद्मिनीकन्दकोमलं स्वकीयं शरीरं पूर्वोक्तप्रकारैस्तोयाग्निवासोपवासादिभिर्नियमैः रात्रिन्दिवं शोषयन्ती सा पार्वती जन्मतः प्रभृति परिचयवशादातपादिसंसर्गसहैर्दैहैः सम्पादितं महर्षीणां तपोऽत्यन्तं तिरश्चकारेति भावः ।

अथैवंविधतपःसमुद्बोधितदयासन्धुक्षितप्राक्तननैसर्गिकानुरागस्य भगवतो हरस्य ब्रह्मचारिव्याजेनाऽभियोगप्रकारं प्रपञ्चयति—

अथाऽजिनाषाढधरः प्रगल्भवाग्ज्वलन्निव ब्रह्ममयेन तेजसा ।
विवेश कश्चिज्जटिलस्तपोवनं शरीरबद्धः प्रथमाश्रमो यथा ॥ ३० ॥

अन्वयः—अथ अजिनाऽऽषाढधरः प्रगल्भवाक् ब्रह्ममयेन तेजसा ज्वलन् इव कश्चित् जटिलः शरीरबद्धः प्रथमाऽऽश्रमः यथा तपोवनं विवेश ।

व्याख्या—अथ = अनन्तरम्, अजिनाऽऽषाढधरः = मृगचर्मपलाशदण्डधरः, प्रगल्भवाक् = प्रौढवचनः, ब्रह्ममयेन = वेदाध्ययनमयेन, वेदाध्ययनप्रकर्षजनितेनेत्यर्थः । तेजसा=वर्चसा, ज्वलन् इव=देदीप्यमान इव, कश्चित्=कोऽपि, अनिर्दिष्ट इत्यर्थः । जटिलः=जटावान्, ब्रह्मचारीति शेषः । शरीरबद्धः=बद्धशरीरः, शरीरवानित्यर्थः । प्रथमाऽऽश्रमः यथा = ब्रह्मचर्याश्रमः इव, तपोवनं = तपःस्थलं, पार्वत्या इति शेषः । विवेश=प्रविष्टवान् ।

व्युत्पत्तिः—अजिनाऽऽषाढधरः=आषाढी=पूर्णिमा प्रयोजनम् अस्य सः आषाढः=पालाशदण्डः, 'विशाखाऽऽषाढादण् मन्थदण्डयोः' इत्यण्प्रत्ययः । 'पालाशो दण्ड आषाढो व्रते' इत्यमरः । अजिनं च आषाढश्च अजिनाषाढौ, 'अजिनं चर्म कृत्तिः स्त्री' इत्यमरः । धरतीति धरः, पचाद्यच् । अजिनाषाढयोः धरः अजिनाऽऽषाढधरः, अनेन ब्राह्मणत्वमपि विज्ञातं भवति । ब्राह्मणानामेव पालाशदण्डविधानात् । प्रगल्भवाक्=प्रगल्भा वाक् यस्य स प्रगल्भवाक्, 'प्रगल्भः प्रतिभाऽन्विते' इत्यमरः । ज्वलन्=ज्वलतीति ज्वलन् शतृप्रत्ययः । जटिलः=जटाः सन्ति यस्य स जटिलः, 'लोमादिपामादिपिच्छादिभ्यः शनेलचः' इति पिच्छादित्वादिलच् । ब्रह्मचारिणामपि जटाधरत्वमुक्तं मनुना, यथा—

'मुण्डो वा जटिलो वा स्यादथवा स्याच्छिखाजटः' । इति ।

शरीरबद्धः = शरीरं बद्धं यस्य स शरीरबद्धः, 'वाहिताग्न्यादिषु' इति पाठात्

साधुत्वम् । प्रथमाऽऽश्रमः=प्रथमश्चासौ आश्रमः प्रथमाश्रमः । 'ब्रह्मचारी गृहस्थश्च वानप्रस्थो यतिस्तथा' इति मनुस्मृतिवचनेन ब्रह्मचर्याश्रमस्यैवावलम्बनक्रमे प्राथम्यबोधनात् । तपोवनं=तपसः वनं तपोवनम् ।

अत्रोत्प्रेक्षालङ्कारः । शोभाधिक्यं लोकोत्तरप्रभावत्वञ्चोत्प्रेक्षाहेतुः । यथाशब्दोऽयमुत्प्रेक्षाद्योतकः ।

भावार्थः—अथ कृष्णाजिनपालाशदण्डधारी प्रौढवचनो ब्रह्मतेजसा देदीप्यमान इव जटावान् कश्चिदपरिचितो ब्रह्मचारी मूर्तिमान् ब्रह्मचर्याश्रम इव लक्ष्यमाणः पार्वत्यास्तपोवनं प्रविष्टोऽभूदिति भावः ।

अभ्यासः

प्रश्नाः

(१) उत्तरस्यां दिशि नगाधिराजः कथमवस्थितः ?
(२) सर्वे गिरयः कं वत्सं परिकल्प्य धरित्रीं दुदुहुः ?
(३) हिमप्रदेशे किराताः कथं मार्गं विदन्ति ?
(४) मृगान्वेषकाः किराताः कीदृशं वायुमासेवन्ते ?
(५) प्रजापतिः कै र्गुणै र्हिमवन्तं शैलाधिपत्यमकरोत् ?
(६) पार्वती शिवं पतिरूपेण प्राप्तुं किं कृतवती ?
(७) मेना स्वपुत्रीं पार्वतीं तपसो निवर्तयितुं किं कथितवती ?
(८) पार्वती तप्तुं कुत्र जगाम ?
(९) पार्वत्या स्वहस्तः किं कृतः ?
(१०) महार्हशय्योचिता पार्वती कुत्र अशेत ?
(११) पार्वत्या तपसा तपोवनं किमभूत् ? कथञ्च ?
(१२) तीव्ररूपेण तपस्यन्त्याःपार्वत्याःस्वरूपं निर्दिशत ।
(१३) पार्वत्या पारणाविधिं समुल्लिखत ।
(१४) हैमवत्या 'अपर्णे' ति नामधेयं कथमभूत् ?

(१५) उपमाकवेः कालिदासस्य निम्नाङ्कित पद्यानामर्थं स्पष्टीकुरुत

(क) पदंसहेत भ्रमरस्य पेलवं शिरीषपुष्पं न पुनः पतत्रिणः ।

(ख) क्षुद्रेऽपि नूनं शरणं प्रपन्ने ममत्वमुच्चैःशिरसां सतीव ।

(ग) एको हि दोषो गुणसन्निपाते निमज्जतीन्दोःकिरणेष्विवाङ्कः ।

(घ) नधर्मवृद्धेषु वयः समीक्ष्यते ।

समूह गायनमा गाउने राष्ट्रिय गीत

हटने होइन डटी लडने नेपालीको बानी हुन्छ
कहिले नझुक्ने शिर उभेको स्वाभिमानी नेपाली हुन्छ
विश्वको कुना काप्चामा खोज, नेपालीको मुटुमा खोज
त्यहाँ सिङ्गो नेपाल हुन्छ, त्यहाँ राजा रानी हुन्छ...२
श्रीपेचको नवै रङ्ग डाँफे चरीले बोकेर उड्छ
एकता अनि वीरताको गाथा सारङ्गीले गाउँदै हिंड्छ
खुकुरीको डोबभित्र वीरहरूको पाइला हुन्छ
पर्वतराज हिमालमुनि गुराँस त फुलेको हुन्छ
गुराँसको रङ्ग हेर, त्यो पनि त रातो हुन्छ
हाम्रो मुटुको रगत हेर, त्यो पनि त रातो हुन्छ
रातो रङ्ग सिम्रीकको रङ्ग, चन्द्र सूर्य झण्डाको रङ्ग, त्यो पनि त रातो हुन्छ
त्यहाँ सिङ्गो नेपाल हुन्छ, त्यहाँ राजा रानी हुन्छ...२
हाम्रो मादल शान्तिको लागि मरुभूमिमा परेड खेल्छ
स्वयम्भूको दुइटा आँखाले न्याय अन्याय छुट्याई हेर्छ
बाँच र बचाऊ भन्ने छातिभित्र कुँदिएको हुन्छ
ठेला उठेको हातमा हेर, पसीना त बगेको हुन्छ
पसीनाको नदी हेर, त्यो पनि त नीलो हुन्छ
हामी माथिको आकाश हेर, त्यो पनि त नीलो हुन्छ
नीलो रङ्ग शान्तिको रङ्ग, हाम्रो झण्डाको किनारको रङ्ग, त्यो पनि त नीलो हुन्छ
त्यहाँ सिङ्गो नेपाल हुन्छ, त्यहाँ राजा रानी हुन्छ
त्यहाँ सिङ्गो नेपाल हुन्छ, त्यहाँ राजा रानी हुन्छ